LIBRARY OF THE RAJAH OF COOCHBEHAR

PREFACE.

Colebrooke, in his essay on the Vedas, gives a brief account of the Kaushítaki Bráhmaṇa Upanishad, of which however he had only seen a small fragment among Sir R. Chambers' MSS., besides an abridgement of it in Vidyáraṇya's metrical paraphrase of twelve principal Upanishads. The Upanishad itself has always been highly esteemed by the Hindús, and S'ankaráchárya frequently quotes it in his commentary on the Vedánta Sútras. It appears, however, to be now but rarely met with; there is, I believe, no copy of the original in any of the libraries of Europe, and for some time I failed in my search for copies in India. At last I succeeded beyond my hopes, and the following is the list of the MSS. from which the present edition has been prepared.

A. An old MS. of the text only, 22 foll. Asiatic Society's Library.*

B. An old MS. (73½ foll.) of S'ankaránanda's commentary, containing the Kaushítaki-Bráhmaṇopanishad-Dípiká in four adhyáyas, and the Kaushítaki-Bráhmaṇopanishat-pada-yojaniká. The latter is continuously numbered from the former as the fifth to the ninth adhyáyas,—the ninth is unfinished, and the work has no proper close.† As. Soc.

* This and the next two were found in a puthi numbered 701 and called in the Catalogue Upanishad-Dípiká. It contains, besides these three MSS., S'ankaránanda's commentary on all the Atharva Upanishads, besides a commentary on several of them by another author.

† It is evident from this change of title as well as from S'ankaránanda's remarks in his introduction, that the Kaushítaki Bráhmaṇa

C. A MS. (foll. 87½) of S'ankaránanda's Dípiká only; this, however, seems only a less accurate transcript of B.'s original. As. Soc.

D. A modern but good copy of the text and the Dípiká only, borrowed, through Professor Griffith, from a pundit of Benares.

E. A MS. (47 foll.) of the Dípiká, in the Tailinga character, given by Walter Elliot, Esq. C. S. to Dr. Röer, and which the latter kindly left with me on his leaving India. It is a recent transcript and generally agrees with B. C. with one very important difference, viz. that it agrees with D. in noticing certain various readings, which are everywhere omitted in B. and C.*

F. A MS. (7 foll.) from the Benares College Library, containing the text only of the third and fourth adhyáyas.

Upanishad ends with the fourth adhyáya. He commences his introduction to the fifth adhyáya, *Sanhitopanishad uttarasminnadhyáye vakshyate; tatrádau bhagavatí S'rutir átmana eváptatwam vadantí mangaláchAranam karoti.* The Upanishad commences (after the well-known formulæ *ritam vadishyámi*, &c.)

अथातः संहिताया उपनिषत् पृथिवी पूर्वरूपं द्यौरुत्तररूपं वायुः संहितेति माण्डूकेय आकाशः संहितेत्यस्य माण्डव्यो वेदयाञ्चक्रे

thus far it agrees with the beginning of the third part of the Aitareya Áranyaka quoted in the Ind. Studien vol. ii. p. 212, but after this it seems to differ, but it is very difficult to determine the readings from the illegibility of the MS. The first words of the other adhyáyas are—

VI.—प्राणो वंश इति ह स्माह स्थविरः शाकल्यः

VII.—तत् सवितुर्वृणीमहे

VIII.—अथातोऽध्यात्मकं

IX.—प्रजापतिर्वा इमं पुरुषमुदसृजत्

* Thus in p. 4, l. 13-15 B. C. omit अन्यमहो • लोक इत्यर्थः ; and similarly elsewhere, as e. g. p. 49, l. 19—p. 50, l. 3; p. 50, ll. 19-21; p. 56, l. 20; p. 68, l. 19; p. 70, l. 20 (the omission here extends to p. 71, l. 11); p. 84, l. 4.

G. An inaccurate transcript from a Tailinga MS. belonging to Bábú Rájendralála Mitra; this, like F., has only the text of the third and fourth adhyáyas.

I also had a copy of the MS. of the Dípiká and Padayojaniká in the Benares College Library, but it was too inaccurate to be of use for my collation. It was in fact an inaccurate copy of an inaccurate original, as I have since found by a sight of the MS. itself.

I had not long commenced my collation, which at first included only the MSS. A. B. C., before I discovered an unexpected difficulty, viz. that my three MSS. represented two different recensions of the original text; and the fresh MSS., which I subsequently procured, only made the fact more evident. The text, as given in A. and D., represents one recension; and the MSS. of the commentary B. C. D. E., represent another, which is also given, with a very few verbal differences, by F. and G., so far as regards the third and fourth adhyáyas.

That the former recension is a real S'ákhá is proved by the fact that many of its more important variations are noticed in two of the MSS. of the commentary, though, as I before observed, two MSS. (B. and C.) omit all these allusions. Dr. Weber also, in his Catalogue of the Chambers MSS. in Berlin, gives an account of an imperfect MS. of the Kaushítaki Áranyaka, containing two books and a short fragment of a third, by which it appears that the third book was the commencement of the present Upanishad, and its fragment, as printed by Dr. Weber, follows the recension of A. D.* Similarly S'ankaráchárya, in his commentary on the Vedánta Sútras, fol-

* The first book commences प्रजापतिव संवत्सरस्तस्यैव, the second हिङ्कारेण प्रतिपद्यत एतदुक्थं. The fragment of the third is as follows, चित्रो ह वै गाङ्ग्यायनिर्यक्ष्यमाण आरुणिं वव्रे स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति तं हाभ्यागतं पप्रच्छ गौतमस्य पुत्रास्ति संवृतं लोके यस्मिन् मा धास्यस्यन्यतमो वाध्वा तस्य मा लोके धास्यसीति स हो—(Catalogue, p. 20).

lows the same recension in his quotations from this Upanishad.* Under these circumstances, I have given the text from these two MSS., adding at the foot of the page the more important various readings of the other recension as followed by the commentary. It is not always easy to decide the exact words of the text which S'ankaránanda had before him, as he often covers each word with such a cloud of interpretation, and I have therefore not attempted to give a copy of his recension for the first two books; but I have added, at the end of the Upanishad, the text of the third and fourth books, according to this recension, as found in the two MSS. F. and G. The differences are seldom more than verbal, and the commentary will generally serve to explain either recension, so far as regards the meaning. I may add that there exists a *third* recension of the fourth book, as given in the first chapter of the second book of the Brihad A'ranyaka; and this is more than once alluded to by S'ankaránanda (e. g. p. 112, l. 14) as *s'ákhántara.*

I have edited the commentary from a careful collation of B. and D.; C. and E. (especially the latter) have been used as ancillary, but neither gave much help except in occasional difficulties. Of the former two, D. presented the best readings, but in several places the words of the original appear to have been altered in the commentary to suit the recension of *the text* of the Upanishad, as in this text D. agrees with A. In the first adhyáya, I sometimes admitted these into the commentary and gave the readings of B. C. E. at the foot (as in p. 17), but maturer consideration has convinced me that this was an error, and that in nearly every case the latter should be advanced to the text of the comm., and the reading of D. relegated to the foot-note.

The origin of these two recensions and the source of the Upanishad itself, are questions which I cannot solve; and the

* e. g. compare infra p. 125 with Vedánta Sútras, p. 379, (Bibl. Ind. ed.)

MSS. only make the matter more difficult. I have followed the reading of D. (in its text) and, perhaps, the commentary of all the MSS. in calling the Upanishad the first four books of an Áranyaka, but I am by no means certain that this is correct. The MS. A. gives these four books as the *sixth, seventh, eighth* and *ninth* books of an Áranyaka,* (its concluding line is (इत्यरण्यके नवमोऽध्यायः); while F. gives the third and fourth as the *fifth* and *sixth* of the Kaushítaki Áranyaka (इति कौषीतक्यारण्यके षष्ठोऽध्यायः). G. only gives them as the third and fourth books of the Kaushítaki Bráhmaṇa Upanishad. It would at first seem as if F. agreed with the Kaushítaki Áraṇyaka of the Berlin library, as it is not improbable that, if complete, this would have given the four books of the Upanishad in its third and three following adhyáyas. But here we are met by the difficulty that these two belong to different recensions; while A., which does give the recension of this third adhyáya of the Berlin MS., calls it not the *third* but the sixth book of the Áraṇyaka.

The same difficulty applies to the name; no MS. calls it the Kaushítaki Upanishad, except A. and F. and even there it is only inserted in a later hand and ink, at the end of the MSS. The commentary every where calls it the Kaushítaki Bráhmaṇa Upanishad, but how it obtained this name is doubtful, as the proper Kaushítaki Bráhmaṇa, containing thirty books,† has no trace in it of this Upanishad. Vináyaka Bhaṭṭa in his commentary to the Kaushítaki Bráhmaṇa frequently refers to the Mahá-Kaushítaki-Bráhmaṇa, and Dr. Weber conjectures that this may be the Bráhmana, to which our Upanishad

* This would partly agree with Poley's addition to his translation of Colebrooke's Essays (Ind. Stud. i. 392), where he speaks of the Kaushítaki Upanishad as forming the first, seventh, eighth and ninth books of the Kaushítaki Bráhmaṇa.

† If Dr. Weber's conjecture be correct (Indische Stud. i. p. 146) the commentary to Páṇini v. 1, 62, proves that it never had more than thirty adhyáyas.

belongs. Most probably there were two different recensions of the Kaushítaki Áranyaka, and from these come our two recensions of the Upanishad.* S'ankaránanda calls it Kaushítaki-Bráhmanopanishad, as the Jnánakánda is one part of the Bráhmana portion of the Veda.†

The Kaushítaki Upanishad is placed by Dr. Weber in his first or oldest class of the Upanishads. It was one of those translated from the Persian by Anquetil, who calls it Kokhenk. The Persian translator has generally followed the recension in S'ankaránanda, whose remarks he often interpolates in his text; but occasionally he seems to have taken his notes from another source. The Bengal Asiatic Society has a MS. of the Persian translation, which I have occasionally consulted; the style is much simpler than Anquetil's barbarous jargon; but the mixture of Sanskrit words, marvellously disguised, makes it difficult.

The Áranyakas appear to belong to a class of Sanskrit writings, whose history has not yet been thoroughly investigated. Their style, if we may judge from that of the Taittiríya and Kaushítaki, is full of strange solecisms which sometimes half remind us of the gáthás of the Lalita Vistara. The present Upanishad has many peculiar forms, some of which a[illegible] common to both recensions, while others appear only in [illegible] Such are निषिञ्च in p. 10; प्रैति for प्रयन्ति in p. 51; संवेक्ष्यन् in p. 56; वेति for व्यति in p. 78; षदूढं in p. 89; &c.

In the Sarvopanishadarthánubhútiprakas'a‡ by Vidyáranya-

* The two before-mentioned commentaries on the Atharva Upanishads contain similar discrepancies in their respective texts.

† ब्राह्मणमपि त्रिविधं विधिरूपमर्थवादरूपं तदुभयविलक्षणञ्च—विध्यर्थवादोभयविलक्षणं तु वेदान्तवाक्यं। Madhusúdana's prasthána-bheda.

‡ This work contains twenty chapters and gives analyses of the twelve following Upanishads,—1. Aitareya, 108 s'l.; 2. Taittiríya, 150 s'l.; 3—5. Chhándogya, 330 s'l.; 6. Mundaka, 99 s'l.; 7. Pras'na 100 s'l.; 8, 9. Kaushítaki, 171 s'l.; 10. Maitráyaní, 150 s'l.; 11 Kathavalli, 121 s'l.; 12. S'wetás'watara, 119 s'l.; 13—18. Brihad-

muni,* we have an analysis of the last two chapters of the Kaushítaki Upanishad, as the Pratardana-vidyá and the Ajátas'atru-vidyá.

From his analysis of the fourth chapter, we find that Vidyáranya followed the recension of the commentary, as he gives the following order of Báláki's assertions of adoration, after the first (or áditya), of pp. 135-138.

चन्द्रे विद्युति मेघे खे वायावग्नौ जलेऽपि च ।
आदर्शे श्रवणे गन्तृशब्दे छायात्मतावपि ॥
देहे स्वप्ने दक्षिणेऽक्षिण्यपि वामेऽब्रवीत् क्रमात् ।
सर्वत्र राजा प्रत्युक्तो विप्रस्तूष्णीमवस्थितः ॥

As this analysis is in fact a second commentary on the Upanishad, I have added it as an Appendix.

áranyaka, 1193 s'l.; 19. Talavakára (Kena), 100 s'l.; 20. Nrisinhottaratápaníya, 153 s'l.

* Colebrooke calls Vidyáranya the preceptor of Mádhaváchárya, but Dr. Hall, in his excellent Catalogue, p. 133, identifies them as the same person. The whole question of the relation of Mádhava and Sáyana, and the authorship of the different works under their respective names, as well as the various spiritual teachers of each, has never yet been thoroughly investigated. Dr. Hall, in his Catalogue, p. 98, mentions S'ankara A'nanda as the guru of Mádhava A'chárya,—he may probably be the author of the present commentary.

VARIOUS READINGS OF THE COMMENTARY.

Page 8 l. 12. स्वर्गानिवासं B. C.
„ 10 l. 10. शुक्लपक्षहेतोः B. C. E.
„ 16 ll. 5, 7. अम्बायवः B. C. for अम्बायवौः, -व्यः.
„ 18 l. 8. घट्वा B. C. for दृत्वा.
„ 22 l. 9. मस्तकाधारगात्रस्य B. C. E.
——— l. 16. काष्ठचतुष्टये D.
„ 23 l. 5. स्नेहामलकम्रिपु B. C. E.
„ 24 l. 6. कालात्मकेन मया सम्बन्धी कालः। मम कालात्मनः तथा तादृशेनाभेदेन प्राप्तियतः D.
——— ll. 9, 11. उपासनकारणात् B. C. E.
„ 27 l. 16. प्राणेन and घ्राणेन are here and elsewhere frequently confused in the MSS. of the commentary
„ 30 l. 14. सर्वनियन्तृत्वं D.
„ 31 l. 4. विनेयस्य B. C. E. उपासकस्य D.
„ 48 l. 12. ससम्भारं सुवर्णादिचषकं B. C. E.
„ 49 l. 15. अमावास्यायां आदित्यस्य रश्मौ सोमस्य —B. C. E.
„ 56 l. 15. हृदयपुण्डरीकस्थ आनन्दात्मनि स्थितं निहितं B. C. E.
„ 61 l. 8. विस्मियन्ति D. for विनश्यन्ति.
„ 62 l. 16. तौ च पर्वतौ विकल्पावेकदेशस्थौ वेत्याशङ्का नेत्याह B.C. E.
„ 66 l. 11. जलरूपात् (query जन्यरूपात् ?) B. C. for तनुरूपात. E. corrupt.
„ 67 ll. 17, 20. सम्प्रतिकर्म B. C. सम्प्रत्ति° E. सम्पत्ति° D.
„ 75 l. 16. ननु किं तव ज्ञानेन तवान्यस्मात् यदि कश्चनातिशयो भवेत् D.
„ 79 l. 15. प्रपञ्चं ब्रह्म B. C. प्रपञ्चब्रह्म E.
„ 82 l. 9. उद्गापञ्च B. C. E. तद्राप्यञ्च D.
„ 95 ll. 11, 17. प्रज्ञपयेतां B. C. E.
„ 96 l. 8. B. C. E. end Section 7 here at नावगम्यत इत्यर्थः and in ll. 12, 13 read बुद्धेरभावः शब्द इत्यर्थः। इन्द्रियैः सह प्रज्ञामात्रमेव। ननु तं मामायुः &c. (correct त्वं into तं in the printed text).

Page 102 l. 12. D., after लोकाधिपतिः, reads पित्रादिवद्विशेषेण पालयिता लोकाधिपतिः तथापि सङ्कुचितमैश्वर्यमस्य स्यात् राजादिवत् इत्यत आह एष उक्तो लोकाधिपतिः सर्वेशः सर्वस्य &c.

„ 103 l. 13. सवसन्. Query संवसन्? A. D. F. G. have सवसन्, but B. has संलन्, C. सलन्, E. वसन्.

——— l. 15. All the MSS. have here अवसतेति, though they all have अवसत् in l. 12.

„ 104 l. 15. समाधनायाः D.

„ 118 l. 13. चतत्राणकारो B. C. E. (cf. Raghuv. ii. 53.) चचत्राणकारो D.

„ 122 l. 11. उपधानानन्द- B. C. for उपाधावानन्द-

„ 123 l. 9. नखाग्रशरीरात् बहिर्गतकेशान् B. C. E.

In Adhy. i. B. C. end § 2 at वदेत p. 10, l. 5; § 5 at इष्टः p. 25, l. 16; § 6 closes in p. 30.—In Adhy. ii. they join together §§ 1, 2; §§ 7, 8; §§ 9, 10; and §§ 12, 13.

कौषीतकिब्राह्मणोपनिषत्।

दीपिकासहिता।

ॐ नमो ब्रह्मणे।

आनन्द आत्मा स्थिरजङ्गमाना-
मस्यत्र चित्रस्तमहं प्रणम्य।
कौषीतकिब्राह्मणमात्मविद्यां
पदावलोकात् प्रकटीकरोमि॥ १॥

समधिगतमेतन्निघर्षणादीनां कर्मणां तैजसस्य द्रव्यस्यादर्शादेः शुद्धिहेतुत्वं तथा चाग्निहोत्रादीन्यश्वमेधान्तानि कर्माणि तैजसस्यान्तःकरणस्य शुद्धिहेतवः, *विविदिषासाधनत्वस्य श्रुतितोऽप्यवगमाच्च। अपि च स्वर्गादेः कर्मफलस्य सुखविशेषरूपत्वात्तस्य चान्तःकरणप्रसादापरपर्यायत्वात् कर्मिभिरपि कर्मणामन्तःकरणशुद्धिहेतुत्वमङ्गीकृतं यतस्ततोऽतिमहता सन्दर्भेण प्रथमतोऽभिधायेदानीं ब्रह्मविद्यां वक्तुं लब्धावसरा श्रुतिः प्रवर्तते। तत्र चित्रो ह वै गाङ्ग्यायनिरित्यादिका य एवं वेदेत्यन्ता चतुरध्यायी कौषीतकिब्राह्मणो-

---

* विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेनेति श्रुतिः।

पनिषत्। आद्येनाध्यायेन पर्यङ्कविद्यां सदक्षिणोत्तरमार्गान्तां, द्वितीयेन प्राणविद्यां तद्विदश्च बाह्याध्यात्मिकानि कर्माणि फलविशेषसिद्धये, तृतीयचतुर्थाभ्यां चात्मविद्यामाह। यद्यपि प्रतर्दनो हेत्यादिकमेव प्रथमतः पठनीयं तथापि शुद्धमप्यन्तःकरणं निर्गुणे ब्रह्मण्यभयेऽपि प्रथमतो ब्रह्मस्वभावमजानत् भयं प्राप्नुयात् गर्भस्थप्रोषितपितृको युवेव सद्वृत्तस्थः प्रथमतः पितृदर्शने। ततोऽस्य भयनिरासार्थमुत्तरमार्गार्थमेतल्लोकस्थराजादिवत् ब्रह्मलोकस्थं सगुणं ब्रह्म प्रथमत उक्तवती। तत्र च स आगच्छत्यमितौजसं पर्यङ्कं स प्राण इति प्राणस्य पर्यङ्कत्वं प्रथमेऽध्याय उक्तं। तस्मिन् प्राणे भवति श्रोतॄणां जिज्ञासा किमयं श्वासमात्रं प्राणः आहोस्वित् विविधभूतिजुष्ट इति। अस्या जिज्ञासाया निवृत्त्यर्थं प्राणोपासनं द्वितीयेनाध्यायेनोपक्रान्तं। तथा च लब्धावसरोत्तरत्र ब्रह्मविद्यामुक्तवतीत्यदोषः। तत्र ब्रह्मविद्यायाः सगुणाया अपि महद्भिर्गौतमश्वेतकेत्वादिभिरप्यमानित्वादिगुणैर्गुरुमुखादेवावगतिः कृता यतस्ततोऽमानित्वादिगुणैराधुनिकैरप्यधिकारिभिः सगुणा निर्गुणा च ब्रह्मविद्यावगन्तव्येत्येतदर्थमाख्यायिका।

ॐ चित्रो ह वै गाङ्ग्यायनिर्यक्ष्यमाण आरुणिं वव्रे स ह पुत्रं श्वेतकेतुं प्रजिघाय याजयेति तं हाभ्यागतं पप्रच्छ गौतमस्य पुत्रोऽसि* संवृतं लोके यस्मिन् मा

चित्रः चित्रनामकः कश्चित्त्रैवर्णिको ह किल वै प्रसिद्धः श्रुतेस्तत्कालीनानाञ्च †गाङ्ग्यायनिः गाङ्ग्यस्य युवापत्यं गाङ्ग्यायनिः यक्ष्यमाणः कश्चित् ज्योतिष्टोमादिकं यागं करिष्यमाणः आरुणिं अरुणस्यापत्यं वव्रे सदस्यसप्तदशान्यतमर्त्विक्त्वेन वरणं चक्रे त्वं मे प्रधानभूतो यज्ञे याजयिता भवेति। सः गाङ्ग्यायनिना चित्रेण वृत आरुणिर्ह प्रसिद्धः श्रुत्यन्तरे उद्दालकनामा, पुत्रं, पितरं पाप्मनः पुन्नाम्नो नरकात् त्रायत इत्यौरससन्तनय इत्यर्थः, तं श्वेतकेतुं श्वेतकेतुनामानं प्रजिघाय प्रहितवान्। तत्प्रेषणमाह याजय हे श्वेतकेतो चित्रं यागं कारय इत्यनेन प्रकारेण। तं चित्रगृहमागतं पित्रा प्रहितं श्वेतकेतुं ह प्रसिद्धं श्रुत्यन्तरे अभिमानिनं प्रवाहणादिभिः संवादकर्तारमासीनं चित्रदत्ते महत्यासने सूपविष्टं पप्रच्छ प्रश्नं कृतवान् चित्रः। प्रश्नमाह गौतमस्य पुत्र हे गौतमगोत्रीयस्य औरस अस्ति विद्यते संवृतं सम्यगावृतं गुप्तं स्थानं बहिर्मुखैरज्ञातमावृत्तिशून्यमित्यर्थः। लोकेऽस्मिन् स्थिरजङ्गमनिवासे। यस्मिन् संवृते स्थाने मा मां प्रष्टारं त्वच्छिष्यभूतं

* गौतमस्य पुत्रास्तीति टीकासम्मतं मूलस्य पाठान्तरं।

† गार्ग्यायनिः गार्ग्यस्य युवापत्यमिति सर्व्वत्र तैलिङ्गपुस्तके कुत्रचिच्च B. C. पुस्तकयोः पाठः।

*धास्यस्यन्यतमो वाध्वा तस्य मा लोके धास्यसीति स होवाच नाहमेतद्वेद हन्ताचार्यं पृच्छानीति स ह

धास्यसि त्वं याजयिता गुरुर्भूत्वा स्थापयिष्यसि। तत्रापि अन्यं सर्वस्माज्जगतो भिन्नं उत सर्वजगदात्मभूतं मां धास्यसीत्येकः पक्षो बहिरेवावगन्तव्यः। अहो सम्बोधने। अन्यत्वपक्षे दोषं दर्शयितुं धारणे गतिमाह। वाध्वा बद्धा काष्ठेनेव काष्ठं निःसन्धिबन्धनं जतुरज्जुलोहादिभिः सम्बध्य अन्यं मां धास्यसीत्यन्वयः। अन्यशब्दोऽयं तन्त्रेणोच्चारितो लिङ्गव्यत्यासेनावगन्तव्यः, ततोऽस्ति संवृतं स्थानमन्यद्वा। अन्यस्थानपक्षे आह तस्य तस्मिन्नसंवृते स्थाने मा मां राज्यादिवन्तं कञ्चित्कालं परतन्त्रफलभोक्तारमुक्तं लोके धास्यसीति व्याख्यातं। इत्यनेन प्रकारेण बुद्धिपरीक्षार्थं पितुः सपुत्रस्याभिमानपरिहारार्थं वा राजा पप्रच्छेत्यन्वयः। अन्यमहो वाध्वा तस्येति पाठे व्याख्येयं। अन्यतमो वाऽध्वा तस्येति पाठे धूमार्चिरन्यतमो वाऽध्वा मार्गस्तस्य सम्बन्धिनि लोके इत्यर्थः। सः गौतमपुत्रः श्वेतकेतुश्चित्रपृष्टः ह प्रसिद्धः उवाच उक्तवान्। श्वेतकेतुः किमाह नाहमेतद्वेद अहं श्वेतकेतुरेतदुक्तं लोके संवृतमसंवृतं वा स्थानं नामाधेयमनन्यत्वेनान्यत्वेन वा बद्धाऽबद्धा वेति न जानामि, हन्त हर्षसम्बोधने, त्वत्प्रश्ननिमित्तं ममाप्येतदवगतं भविष्यतीत्यर्थः। आचार्यं सर्वज्ञं सर्वशास्त्रा-

* धास्यस्यन्यमहो वाध्वा इति टी०।

पितरमासाद्य पप्रच्छेतीति माप्राक्षीत् कथं प्रतिब्रवाणीति स होवाचाहमप्येतन्न वेद सदस्येव वयं स्वाध्यायमधीत्य हरामहे यन्नः परे ददत्येह्युभौ गमि-

र्थस्य ज्ञातारमनुष्ठातारमाचारे स्थापयितारञ्च पितरं पृच्छानीति प्रश्नं करवाणि पितुर्गमनात् पूर्वं विस्मृतिर्माभूत् तत्र गत्वा प्रश्नं करिष्यामीत्यर्थः। इत्यनेन प्रकारेण उवाचेत्यन्वयः। सः चित्रदेयोत्तरः श्वेतकेतुः ह प्रसिद्धः पितरमाचार्यमारुणिं जनकमासाद्य संप्राप्य पप्रच्छेति अनेन वक्ष्यमाणेन प्रकारेण प्रश्नं कृतवान्। तत्प्रश्नप्रकारमाह इति माप्राक्षीत् मां श्वेतकेतुं गौतमस्येत्यादिना धास्यसीत्यन्तेनेत्यनेन वाक्येन प्रश्नमकरोत्, कथं प्रतिब्रवाणि अस्य प्रश्नस्य केन प्रकारेण प्रत्युत्तरं वदामीत्यर्थः। इत्यनेन प्रकारेण पप्रच्छेत्यन्वयः। सः पुत्रपृष्ट आरुणिः ह प्रसिद्ध उवाच उक्तवान् अहमप्येतन्न वेद, वेदाचार्योऽप्यहमारुणिरेतच्चित्रपृष्टं न जानामि सदस्येव चित्रस्य गाङ्ग्यायनेः सभायामेव न त्वन्यत्र वयमारुणिश्वेतकेतुप्रभृतयः स्वाध्यायमधीत्य एतदर्थप्रतिपादकं वेदभागं सार्थमधिगम्य चित्रात् गाङ्ग्यायनेर्हरामहे अधिगच्छामः। यद्यस्मात् कारणात् नोऽस्मभ्यं गौतमादिभ्योऽपरिहार्येभ्योऽवर्ज्योपक्रमेभ्यो याचकेभ्यः परे धनविद्यादातारः ददति प्रयच्छन्ति तच्चित्रो न दास्यतीति शङ्का न करणीया इत्यर्थः। एहि आगच्छ चित्रं प्रति उभौ गमिष्यावः आवां यास्यावः,

ष्याव इति स ह समित्पाणिश्चित्रं गाङ्ग्यायनिं प्रतिच क्राम उपायानीति तं होवाच ब्रह्मग्राह्यसि* गौतम यो न मानमुपागा एहि व्येव त्वा ज्ञपयिष्यामीति ॥१॥

इत्यनेन प्रकारेण उवाचेत्यन्वयः। स आरुणिः सपुत्रः ह प्रसिद्धः समित्पाणिर्गुरुदर्शनार्थं समिद्धस्तः चित्रं चित्रनामानं गाङ्ग्यायनिं गाङ्ग्यस्य युवापत्यं प्रतिचक्रमे। उपायानीति त्वां विशिष्टविद्याविदं चित्रं गुरुत्वेन उपागच्छामि प्राप्तोऽस्मीत्यर्थः। इत्यनेन प्रकारेण प्रतिचक्रमे प्रतिचक्राम समीपं गतवान्, तं शिष्यत्वेनात्मानं प्राप्तमारुणिं ह प्रसिद्धं उवाचोक्तवान्। चित्रोक्तिमाह ब्रह्मार्घः ब्रह्मणो हिरण्यगर्भस्य परस्य ब्रह्मणो वा अर्घः अर्घ्यं पूजा इति यावत् तद्यस्य स ब्रह्मार्घः ब्रह्मवत् माननीय इत्यर्थः, असि भवसि गौतम हे गौतमगोत्रीय। तत्र कारणमाह यो वेदविदामग्रणीर्मम गुरुभूतो याजकः सन् मया पुत्रद्वारेण पृष्टः न मानमुपागा मां शिष्यभूतं प्रष्टुं समागतो भवान् न तु किमनेन शिष्यभूतेन पृष्टेनेत्यभिमानं गतवान्। एहि आगच्छ व्येव त्वा ज्ञपयिष्यामीति त्वां गौतमं विज्ञापयिष्याम्येव स्पष्टं बोधयिष्यामि न तु सन्देहादिकं जनयिष्यामीति अनेन प्रकारेण प्रतिज्ञामकरोदिति शेषः ॥ १ ॥

---

* ब्रह्मार्घोऽसीति टी०।

स होवाच ये वै केचास्माल्लोकात् प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति तेषां प्राणैः पूर्वपक्ष आप्यायते तानपरपक्षेण* प्रजनयत्येतद्वै स्वर्गस्य लोकस्य द्वारं यच्चन्द्रमास्तं यः प्रत्याह तमतिसृजतेऽथ यो न

सः चित्रः कृतप्रतिज्ञः ह प्रसिद्धः उवाचोक्तवान्। प्रश्नमतोऽगुप्तं स्थानं भेददर्शिनां कर्मिणामाह ये वै केच ये केच त्रैवर्णिकाः प्रसिद्धाः अग्निहोत्रादिकर्मानुष्ठातारः अस्मात् प्रत्यक्षात् लोकादवलोकनयोग्यात् त्रैवर्णिकदेहात् प्रयन्ति अपसर्पन्ति म्रियन्त इत्यर्थः। चन्द्रमसमेव ते सर्वे गच्छन्ति, ते विमुक्तदेहाः कर्मिणो निखिला धूमरात्रिकृष्णपक्षदक्षिणायनाकाशान् गत्वानन्तरं कर्मफलभूतं स्वर्गापरपर्यायं चन्द्रमण्डलं गच्छन्ति न त्वादित्यादिकं। तेषां स्वर्गिणां कर्मिणां प्राणैरिन्द्रियैः प्राणापानादिसहितैः पूर्वपक्षे शुक्लपक्ष आप्यायते आप्यायनं गतो भवति चन्द्रमाः राजभृत्यकरादिभिरिव राजा, तान् कर्मिणः प्राणान् अपरपक्षे कृष्णपक्षे न प्रजनयति नोत्पादयति। अयमर्थः। क्षीणभृत्यस्येव राज्ञः परिचारान् न जनयति द्रव्यालाभः, एवं चन्द्रः क्षीणः स्वर्गिणां तृप्तिं न जनयतीति। ननु स्वर्गकामो जुहुयादिति श्रूयते न चन्द्रमण्डलकाम इत्यत आह एतदुक्तं चन्द्रमण्डलं वै प्रसिद्धं अमृतरूपं स्वर्गस्य लोकस्य स्वर्गाख्यस्य स्थानस्य द्वारं गृह-

* तानपरपक्षे नेति टी०।

प्रत्याह तमिह वृष्टिर्भूत्वा वर्षति स इह कीटो वा पतङ्गो वा मत्स्यो वा शकुनिर्वा सिंहो वा वराहो वा परस्वान् वा शार्दूलो वा पुरुषो वान्यो वा तेषु तेषु

स्येवान्तःप्रवेशमार्गः, एतच्छब्दार्थमाह यः प्रसिद्धः चन्द्रमाः इन्दुः। संवृतं स्थानं विवचुराह तं चन्द्रमसं दक्षिणमार्गाख्यं योऽधिकार्यमानित्वादिगुणः प्रत्याह निराचष्टे अहमेतस्मिन् सन्ततसम्पाते न गमिष्यामीति तं निराकृतचन्द्रमसमतिसृजते चन्द्रमसमतीत्य विद्युदाद्यातिवाहिकेषु सृजते उत्पादयति उपासनामङ्कल्पो ब्रह्मलोकं नयतीत्यर्थः। अथ पक्षान्तरे यः कर्मी स्वर्गाभिलाषवान् एनं चन्द्रमसं न प्रत्याह न निराचष्टे गमिष्याम्यहं स्वर्गमिति सङ्कल्पवानित्यर्थः। तं कामिनं स्वर्गनिवासमिहास्मिन् लोके रमणीयारमणीयचरणफलभूते वृष्टिर्भूत्वा कर्मफलोपभोगनियमोऽनुशयसहितो वर्षधाराभावं प्राप्य वर्षति मेघोदरेभ्यो नीरधारां सहानुशयिनं मुञ्चति। स वृष्टिरूपेणागतो भूलोकमनुशयी यदि कपूयचरणस्तदा दक्षिणोत्तरमार्गभ्रष्ट इहास्मिन् लोके कीटो वा कीटो वज्रसारसमानोऽल्पकायो जीवविशेषः वाशब्दात् पिपीलिकादिः, पतङ्गो वा पतङ्गः दीपतेजोविरोधी क्षुद्रो जीवः वाशब्दात् खद्योतादिः, शकुनिर्वा शकुनिः पक्षी वाशब्दाद्वानरादिः, शार्दूलो वा शार्दूलो व्याघ्रः वाशब्दाच्छूकरादिः, सिंहो वा सिंहो गजघातको जीवविशेषः वाशब्दात्

स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यं तमागतं पृच्छति कोऽसीति तं प्रतिब्रूयाद्विचक्षणाहृतवो रेत

सरभादिः, मत्स्यो वा मत्स्यो मीनो वाशब्दात् मकरादिः, परश्वा वा परश्वा दन्दशूकविशेषः वाशब्दाद्वृश्चिकादिः। यदा कपूयरमणीयोभयचरणः तदा पुरुषो वा पुरुषो नरः वाशब्दान्नारी नपुंसकञ्च। पुरुषस्यापि रमणीयचरणीयवाङ्क्षे ब्राह्मणत्वादिकमवगन्तव्यं। एवं शुभाशुभचरणमभिधाय पुनः प्रकृतं कपूयचरणं संक्षेपेणाह अन्यो वा उक्तेभ्योऽन्यो दुःखभागी जङ्गमः वाशब्दात्स्थावरः। एतेषु पूर्वोक्तेषु कीटादिषु स्थानेषु पूर्वोक्तेषु देहेषु अनुशयवान् प्रत्याजायते स्वर्गात् प्रत्यावृत्य समन्तादुत्पद्यते। उत्पत्तौ निमित्तमाह यथाकर्म यादृशं शुभमशुभं व्यामिश्रं वा कर्म, यथाविद्यं यादृशी शास्त्रीयाशास्त्रीया व्यामिश्रा वा विद्या, कर्मविद्यानुसारेण शुभमशुभं व्यामिश्रं च शरीरं भवतीत्यर्थः। एवं कर्मणां गतिं स्वर्गनरकोभयात्मिकां वैराग्यार्थमुपदिश्य गुरुशिष्ययोः करणीयं विवक्षुः प्रथमतो गुरोः करणीयमाह तं नरकादिव स्वर्गादपि विरक्तं विज्ञातनरकस्वर्गगतिं त्रिविधतापसन्तप्तमानसममानित्वादिगुणं शिष्यमागतं शुभाशुभाभ्यां कर्मभ्यां स्वर्गात् भूलोकं प्राप्यात्युत्कटेन पुण्येन केनचिदात्मानं प्रत्यागतं पृच्छति करुणारसपूर्णहृदयो वेदान्तार्थयाथात्म्यवित् गुरुलक्षणसम्पन्नो गुरुः प्रश्नं करोति पृच्छेदित्यर्थः। गुरोः प्रश्नमाह कः प्रश्ने

आभृतं पञ्चदशात् प्रसूतात् पित्र्यावतस्तन्मा पुंसि कर्तर्येरयध्वं पुंसा कर्त्रा मातरि मा निषिञ्च स जाय

शरीरेन्द्रियादिरूप आहोस्वित्तद्विलक्षणः असि भवसि इत्यनेन प्रकारेण पृच्छतीत्यन्वयः, तमेवं पृच्छन्तं स्वगुरुं शिष्यो गुरुप्रश्नानन्तरं प्रतिब्रूयात् प्रत्युत्तरं वदेत्। शिष्यो देहादिसंहतमात्मानमुररीकृत्याह विचक्षणात् बहुविधभोगदानकुशलात् सूर्यसुषुम्नानाडीरूपाच्चन्द्रमस ऋतवः ऋतोः सन्तायृतुस्वरूपात्, न हि चन्द्रमसमन्तरेण ऋतवः, रेतः श्रद्धासोमवृष्ट्यन्नपरिणामरूपं शुक्रं आभृतं रेतःसिचि पुरुषाग्नौ देवैरन्नाहुतिप्रक्षेपेण स्थापितं, पञ्चदशात्पञ्चदशकलात् पञ्चदशकलात्मकात् शुक्लकृष्णपक्षहेतोरित्यर्थः, प्रसूतात् सायं प्रातरग्निहोत्राहुतिद्वयात्पूर्वापरपर्यायश्रद्धातः सञ्जातात् सोमप्रकृतिविकाररूपाद्वा, *पित्र्यावतः पितृमतः पितृलोकस्वरूपादित्यर्थः, तदुक्तं रेतो मा मां मत्स्वरूपं मयानुशयिना सहितमित्यर्थः, पुंसि रेतःसिचि कर्तरि ग्राम्यधर्मानुष्ठातरि एरयध्वं समन्तान्नानाङ्गेषु वर्त्तमानमेकत्र हृदयप्रदेशे प्रेरयत प्रेरणं कृतवन्त इत्यर्थः, यद्यप्यत्र कर्ता कोऽपि न प्रतीयते प्रेरणे तथाप्यर्थलाभात्पञ्चाग्निविद्यागता देवा एवावगन्तव्याः। पुंसा रेतःसिचा निमित्तभूतेन कर्त्रा ग्राम्यधर्मानुष्ठात्रा मातरि पञ्चमाग्निरूपायां योषिति सा मां रेतसा सहितमनुशयिनं †निषिञ्च सेचितवन्तः देवाः। स यो-

* पित्र्यवत इति B. C. E.

† सिषिक्त इति B. C. E.

उपजायमानो *द्वादशत्रयोदशोपमासो द्वादशत्रयोदशेन पित्राऽऽसं तद्विदेऽहं प्रतितद्विदेऽहं तन्म ऋत-

षिति रेतोरूपेण सिक्तोऽनुशयी अहं जाये जनने आविर्भावनिमित्तमित्यर्थः, उपजायमानः रेतःसेकमनु स्वकर्मसमीपे शरीरं गृह्णानः, द्वादशत्रयोदशः द्वादशसङ्ख्यया विशिष्टः स्वभावतः कदाचित्त्रयोदशसङ्ख्यया विशिष्टा द्वादशत्रयोदशः, उपमासः मासानां समीपे वर्तनं यस्य सोऽयमुपमासः संवत्सरः, संवत्सरकालोपलक्षितजीवनत्वादनुशय्यपि द्वादशत्रयोदश उपमास इत्यविरुद्धं। द्वादशत्रयोदशेन उक्तरीत्या द्वादशत्रयोदशमासात्मकसंवत्सरोपलक्षितेन पित्रा रेतःसिक्त्रा जनकेन आसम् तादात्म्यं गतोऽभूवं रेतःसेकात्प्राक् तद्विदे तस्य ब्रह्मणो ज्ञानार्थं सति भाग्ययोगे, वैपरीत्ये तु प्रतितद्विदे तद्वेदनस्य प्रतिकूलज्ञानार्थं, अहं स्वर्गाद्भ्रष्टोऽनुशयी शास्त्रदृष्टिः। तत् तत्रैवं स्थिते तस्मात् वा, मे मह्यं मदर्थमित्यर्थः, ऋतवः ऋतून् अनेककालं आब्रह्मसाक्षात्कारं जीवनमित्यर्थः, अमर्त्यवेऽमर्त्याय ब्रह्मज्ञानपरिपूर्तये, आभरध्वं हे देवाः समन्ताद्धारयध्वं। तेन विचक्षणादित्यादिना उक्तेन सत्येन यथार्थवचनेन, तेन चन्द्रनिवाससमारभ्य आयोनिनिर्गमनेन तपसा क्लेशेन, ऋतुः उक्तरीत्या संवत्सराद्यात्मको मर्त्य इत्यर्थः, अस्मि भवामि, आर्त्तवः ऋतुजः शुक्रशोणितशरीरात्मक इत्यर्थः, अस्मि भवामि। एवं ब्रुवाणं चेच्छिरःकम्पहस्तविधूननादिना निवारयसि तर्हि कथय कः प्रश्ने कार्यकारण-

* द्वादशत्रयोदशो मास इति A। द्वादशत्रयोदश उपमास इति टी०।

वोऽमृत्यव आभरध्वं तेन सत्येन तेन तपसा ऋतुरस्म्यार्तवोऽस्मि *कोऽसि त्वमस्मीति तमतिसृजते ॥ २ ॥

विलक्षणः को नामाहमस्मि भवामि। एवमुक्ते वक्ष्यमाणाध्याय-द्वयोक्ते आत्मन्युपदिष्टे पुनः कोऽसीति पृष्टे शिष्य आह त्वं ममोपदेष्टा प्राणप्रज्ञात्मावस्थात्रयातीतः सगुणत्वेन पर्यङ्के समासीनः अस्मि भवामि। विचक्षणादृतोः पञ्चदशात्मसृतात्पितृमतः आभृतं रेतो यत्तन्मा हे देवाः पुंसि कर्त्तरि प्रेरितवन्तः। ततः पुंसा कर्त्रा निमित्तेन मातर्यपि मां सेचितवन्तः। द्वादशत्रयोदशेन पित्रा ऐक्यं गत आसं संवत्सरो द्वादशत्रयोदश उपमासस्तद्विदे प्रतितद्विदे जाये उपजायमानो वर्त्त इति यतः ततो मेऽमर्त्याय ब्रह्मज्ञानपरिपूर्त्यर्थमृतुरूपमायुराभरध्वं। यस्मादेवं जानानो देवान् प्रार्थये तेन सत्येन तेन तपसा ऋतुरस्म्यार्तवोऽस्मीति सम्बन्धः। विचक्षणादित्यारभ्याभरध्वमित्यन्तं हेत्वर्थ उपोद्घातनयेन, अतो न व्यधिकरणत्वशङ्कापि। प्रार्थनायामपि शब्दतो लभ्यमानानामृतूनां वा प्रार्थना। अस्मिन् पक्षे त्वेवं व्याख्येयो मन्त्रः, हे विचक्षणा हे ऋतवः यतोऽहं ब्रह्मज्ञानार्थी तन्मे मां हे ऋतवो हे मर्त्यवो मृत्युहेतवः। समानमन्यद्देवपक्षे। इत्यनेन प्रकारेण, प्रतिब्रूयादित्यन्वयः। तं विचक्षणादादि त्वमस्मीत्यन्तं ब्रुवाणं नरकादिव चन्द्रमसोऽपि भीतं ब्रह्मविदमतिसृजते संसारादतीत्योत्पादयति ब्रह्मविद्यया विमोचयतीत्यर्थः ॥ २ ॥

---

* कोऽस्मि कोऽसीति टी० ।

स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजापति-लोकं स ब्रह्मलोकं तस्य ह वा एतस्य लोकस्यारो

सः सगुणब्रह्मवित्पर्यङ्काद्यन्यतमविद्यावान् प्राणप्रयाणसमये प्राज्ञेनात्मनैकीभूतो हृदयाग्रप्रद्योतनेन प्रदर्शितसुषुम्नाद्वारः, एतं वक्ष्यमाणं देवयानं देवैरर्चिरादिभिरुह्यमानेनोपासकेन प्राप्यत इति देवयानस्तं पन्थानं मार्गमापद्य सुषुम्नाद्वारा मूर्द्धानं भित्त्वा निर्गतः प्राप्य प्रथममग्निलोकं, अग्रे देवयानमार्गोपक्रमे सगुणब्रह्मविदो नयतीत्यग्निः स चासौ लोकः प्रकाशश्चाग्निलोकः, तमर्चिरभिमानिनीं देवतामित्यर्थः, आगच्छति प्राप्नोति। ततः अहरापूर्यमाणपक्षोदगयनषण्मास-संवत्सरदेवलोकाभिमानिनीर्देवता यथाक्रमेण प्राप्यानन्तरं सः प्राप्तदेवलोको वायुलोकं वायुदेवतां। आगच्छतीत्येतत् वक्ष्यमाणेष्वप्यनुषज्यते। स वायुलोकात् प्राप्तादित्यचन्द्रविद्युल्लोको विद्युल्लोकादमानवेन पुरुषेण नीयमानो वरुणलोकं वरुणदेवतां। स वायुदत्तरथचक्रछिद्रोपममार्गो वायुलोकादनन्तरं आदित्यलोकमादित्यदेवतां डम्बराकाशसमानमार्गदात्रीं चन्द्रमसः पूर्वभाविनीं। स अमानवेन पुरुषेण नीयमानः वरुणात् प्राप्तसहायको वरुणलोकादनन्तरमिन्द्रलोकमिन्द्रदेवतां। सः प्राप्तेन्द्रसहायकस्ततः प्रजापतिलोकं प्रजापतिदेवतां विराड्रूपां। स

ह्रदो मुहूर्ता *येष्टिहा विजरा नदील्यो वृक्षः सालज्यं संस्थानमपराजितमायतनमिन्द्रप्रजापती द्वारगोपौ

प्राप्तविराट्सहायकः ततः ब्रह्मलोकं हिरण्यगर्भलोकं अमानवपुरुषैकगम्यं। तं ब्रह्मलोकं वर्णयति। तस्य अमानवपुरुषनयनेन प्राप्तस्य, ह शास्त्रप्रसिद्धस्य वै ब्रह्मविद्भिः स्मर्यमाणस्य, एतस्य प्रत्यक्षस्यैव प्रकृतत्वेन ब्रह्मलोकस्य हिरण्यगर्भनिवासस्य आरो ह्रदः प्रथमं ब्रह्मलोकप्रवेशे ब्रह्मलोकमार्गनिरोधकः समुद्रशतसमानगाम्भीर्योऽजस्रनीलजलोऽरिभिः कामक्रोधादिभिर्विरचितत्वेनार इतिनामा ह्रदः। तस्येत्यादि वक्ष्यमाणेष्वप्यनुवर्त्तते। आरह्रदस्य परपारे वर्त्तमानाः मुहूर्त्ता घटिकाद्वयकालाभिमानिनो देवाः। तान्विशिनष्टि येष्टिहाः †या ब्रह्मप्राप्त्यां इष्टिरिष्टं ब्रह्मलोकानुकूलमुपासनं कामक्रोधादिप्रवृत्त्युत्पादनेन घ्नन्तीति येष्टिहाः, विजरा नदी विगता जरा यद्दर्शनादिना सेयमुपासनक्रियैव तन्नाम्नी नदी। इल्यो वृक्षः इला पृथिवी तद्रूपत्वेन इल्य इतिनामा तरुः, यमन्यत्राश्वत्थः सोमसवन इत्याचक्षते। सालज्यं संस्थानं सालवृक्षसमाना ज्या धनुषां गुणा इव वस्तु यत्रोपतीरं तत्सालज्यं संस्थानं, अनेकशुभ्रसौधसमानारामवापीकूपतडागसरिदादिविविधजलपरिपूर्णमित्यर्थः, संस्थानमनेकजननिवासरूपं पत्तनमित्यर्थः, अपराजितमायतनं न केनचित्पराजितमनेक-

* यष्टिहा इति A.

† ये यत् इष्टिमिति B. C. E.

विभुप्रमितं विचक्षणासन्द्यमितौजाः पर्यङ्कः प्रिया च मानसी प्रतिरूपा च चाक्षुषी पुष्पाण्यादायावयतो* वै

सूर्यसमानत्वेनेत्यपराजितं ब्रह्मणो निवासस्थलं हिरण्यगर्भस्य राजमन्दिरमित्यर्थः। तस्मिन्नपराजितनाम्न्यायतने इन्द्रप्रजापती स्तनयित्नुयज्ञत्वेन उपलक्षितौ वाय्वाकाशौ इन्द्रप्रजापतिनामानौ द्वारगोपौ द्वाररक्षकौ द्वारस्थावित्यर्थः, विभुप्रमितं अत्यन्तमभ्यधिकं अहङ्कारस्वरूपं अहमित्येव मामान्येन प्रमितं विभुप्रमितं, ब्रह्मणः सभास्थलमेतन्नाम। विचक्षणासन्दी विचक्षणा कुशला बुद्धिर्महत्तत्त्वमित्यादिशब्दाभिधेया आसन्दी सभामध्ये वेदिः। अमितौजाः पर्यङ्कः अमितमपरिमितं प्राणसंवादादौ प्रसिद्धमोजो बलं यस्य सोऽयममितौजाः प्राणः पर्यङ्कः ब्रह्मण आसनभूतो मञ्चकः सिंहासनं। प्रिया च मानसी मनसः कारणभूता प्रकृतिर्मनोगताह्लादकारिणी भार्या चकारस्तस्या अलङ्करणादिकमपि सैवेत्येतदर्थः। प्रतिरूपा च चाक्षुषी चक्षुःप्रकृतिभूता तैजसी प्रतिरूपा प्रतिच्छाया, चकारः प्रतिरूपालङ्करणादेरपि चाक्षुषीत्वसङ्ग्रहार्थः। पुष्पाण्यादायावयतौ वै च जगानि जगन्ति चतुर्विधानि भूतानि सलोकसंस्थानानि पुष्पाणि कुसुमानि वै प्रसिद्धानि पुष्पसमानधर्मत्वेन न केवलं पुष्पाणि जगानि किन्तु आवयतौ च आ समन्तात् तन्तुसन्तानेन निष्पादितौ पटावण्याच्छादनपरिधानरूपौ, अनयो-

* पुष्पाण्यादायावयताविति टी०।

च जगान्यम्बाश्चाम्बायवीश्चाप्सरसोऽम्बया नद्यस्तमित्थं-विदागच्छति तं ब्रह्माहाभिधावत मम यशसा विजरां वा अयं नदीं प्रापन्न वा अयं जरयिष्यतीति ॥ ३ ॥

रपि श्रुतेः सङ्कोचविकाशादिसामान्यमत्रगन्तव्यं। अम्बाश्चाम्बा-यवीश्चाप्सरसः, अम्बा जगज्जनन्यः श्रुतयः। अम्बायवो न विद्यते ऽम्बोऽभ्यधिकोऽयवश्च न्यूनो यासां ताः अम्बायवाः बुद्धयः। अम्बायवा एव अम्बायव्यः श्रुतिबुद्धयः। अप्सरसः साधारणो यो-षितः। चकारावुभयोरपि प्रत्येकमप्सरस्त्वयोगार्थौ। अम्बया नद्यः अम्बमम्बकं लोचनं ब्रह्मज्ञानं यान्तीत्यम्बयाः उपासनाः नद्यो वारां प्रवाहधारिण्यः पुरायतनादिवासिलोकभोग्याः। तमुक्तं ब्रह्मलोकं आरो ह्रद इत्यादिना अम्बया नद्य इत्यन्तेन इत्थंविद् उक्तेन प्रकारेण वक्ष्यमाणेन वा पर्यङ्कस्थब्रह्मवित् आगच्छति समन्तात्प्राप्नोति। तममानवेन पुरुषेणानीयमानमुद्दिश्य ब्रह्मा हिरण्यगर्भ आह ब्रूते स्वपरिचारकान् अप्सरसश्च। ब्रह्मोक्ति-माह अभिधावत पर्यङ्कविद्याविदं समन्ततः सम्मुखं धावत गच्छत मम यशसा मदीयकीर्त्या, ममाहं सम्भारं स्वीकृत्य मत्प्रतिपत्त्या पूजां कुरुतेत्यर्थः। ननु भवानजरोऽयं भवतो विपरीतः कथं भवतः पूजामर्हतीत्यत आह। विजरां जरा-हारिणीं सार्थकनामधारिणीं वै प्रसिद्धामस्मदादीनां अयं पर्यङ्कविद्यावित् नदीं सिन्धुं प्रापदवाप्तः। न वै नैव अयं प्राप्त-विजरः जरिष्यति वयोहानिमवाप्स्यति इत्यनेन प्रकारेणा-हेत्यन्वयः ॥ ३ ॥

तं पञ्चशतान्यप्सरसां प्रतियन्ति शतं फलहस्ताः शतमाञ्जनहस्ताः शतं माल्यहस्ताः शतं वासोहस्ताः शतं चूर्णहस्तास्तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति स ब्रह्मालङ्कारेणालङ्कृतो ब्रह्मविद्वान् ब्रह्माभिप्रैति स

एवं ब्रह्मण उक्त्यनन्तरं अनेकब्रह्मसभास्थजनैः समं तं ब्रह्मलोकमागतं पर्यङ्कविद्याविदं पञ्चशतानि पञ्चशतसङ्ख्याकानि अप्सरसां रूपयौवनसम्पन्नानां मनोरमाणां स्तनजघनभारवशीकृतमध्यदेशानां मदनमदमोमुह्यमानदिगन्तराणां साधारणस्त्रीणां प्रतिधावन्ति सम्मुखं आगच्छन्ति तद्दर्शनलालसानां। संविभागेन सम्भारानाह, शतं शतसङ्ख्याकाः माल्यहस्ताः अनेकवर्णविचित्रगन्धपुष्पदामकराः, शतं शतसङ्ख्याकाः आञ्जनहस्ताः अञ्जनोपयोगिद्रव्यमाञ्जनं कर्पूरकस्तूरीकङ्कोलकतैलादिकराः, शतं शतसङ्ख्याकाः चूर्णहस्ताः हरिद्राकेसरकुङ्कुमचन्दनादिचूर्णकराः, शतं शतसङ्ख्याकाः वासोहस्ताः विविधदुकूलादिकराः, शतं शतसङ्ख्याकाः *फलहस्ताः विविधाभरणहस्ताः, तं अनुत्तीर्णारह्रदं प्राप्तब्रह्मलोकं ब्रह्मालङ्कारेणालङ्कुर्वन्ति हिरण्यगर्भयोग्येन मण्डनेन मण्डयन्ति। स पर्यङ्कविद्याविदप्सरोभिर्ब्रह्मालङ्कारेणालङ्कृतः स्पष्टं ब्रह्मविद्वान् हिरण्यगर्भज्ञानवान् ब्रह्मैवाभिप्रैति हिरण्यगर्भरूपमेव सर्वतः प्राप्नोति, न त्वन्यत्। ब्रह्मप्राप्तौ क्रममाह, स प्राप्तब्रह्मलोकोऽप्सरोभिर्ब्रह्मालङ्कारेणालङ्कृतः, ताभिः सभाजनैश्च सह आगच्छति

* पात्रहस्ता इति B. C. E.

आगच्छत्यारं ह्रदं तं मनसात्येति तमित्वा सम्प्रतिविदो मज्जन्ति स आगच्छति मुहूर्त्तान् येष्टिहांस्तेऽस्माद्‌पद्रवन्ति स आगच्छति विजरां नदीं तां मनसैवा-

---

प्राप्नोत्यारं ह्रदं आरनामानं ह्रदं, तं आरं ह्रदं मनसा नावाद्यनपेक्षः केवलेनान्तःकरणेनात्येति अतीत्य गच्छति। युक्तं ह्येतत्। न ह्यारः कामक्रोधादिवृत्तिभेदः स्वातिक्रमणे मनोव्यतिरिक्तं साधनान्तरमपेक्षते। ये हि ब्रह्मविद्याशून्यास्तेषामनर्थमाह, तं आरं ह्रदं इत्वा केनचित् कर्मणा प्राप्य सम्प्रतिविदः आत्मनः प्रतिकूलं वैषयिकं सुखं तत्सम्यक्त्वेनानुकूलत्वेन जानन्तीति सम्प्रतिविदः अज्ञा इत्यर्थः, मज्जन्ति भिन्ननौका इव समुद्रे पान्थाः अपुनरुद्धारं मग्ना भवन्ति। सोऽतिक्रान्तारह्रद आगच्छति प्राप्नोति मुहूर्त्तान् येष्टिहान् येष्टिहेतिनामकान् मुहूर्त्तान्। ते मुहूर्त्ताः कामक्रोध इत्युत्पादकाः अस्मान्मनसातिक्रान्तात् अपद्रवन्ति अपगच्छन्ति स्वप्राणशरीप्सवो हतहिरण्यकशिपोर्नृसिंहादिव विप्रचित्तिप्रभृतयः। सः स्वदर्शनेनापद्रावितमुहूर्त्तः आगच्छति प्राप्नोति विजरां नदीं विजरेति नाम्नीं नदीं। तां विजरां नदीं मनसैव साधनान्तरनिरपेक्षेणान्तःकरणेनैव अत्येति अतिगच्छत्येव, न तु आरह्रदोत्तारवन्मुहूर्त्तादिद्रावणं किञ्चित्करोति। ननु सुकृतमप्यस्ति सहायमस्य विजरोत्तार इत्यत आह, तत्तत्र शरीरपरित्यागावसरे उपास्यमानसाक्षात्कारावसरे वा सुकृ-

त्येति तत्सुकृतदुष्कृते धुनुते वा* तस्य प्रिया ज्ञातयः सुकृतमुपयन्त्यप्रिया दुष्कृतं तद्यथा रथेन धावयन् रथचक्रे पर्यवेक्षेतैवमहोरात्रे पर्यवेक्षेतैवं सुकृतदुष्कृते

तदुष्कृते पुण्यपापे धुनुते वा अश्व इव रोमाणि कम्पनेन सुकृतदुष्कृतयोः परिपाकज्ञानेन परित्यजति। ननु सुकृतदुष्कृतयोः सतोः कथं परित्याग इत्याशङ्क्य यथाग्निना सतां काष्ठानां दाहस्तथेति परमं परिहारं परित्यज्य प्रसङ्गात् ब्रह्मविदुषि प्रीतिद्वेषयोः फलं विवक्षुर्ब्रह्मविद्यां स्तौति, तस्य ब्रह्मविदुषः शत्रुमित्रादिसमबुद्धेः प्रियाः प्रीतिं कुर्वाणाः ज्ञातयः ज्ञात्युपलक्षिता मनुष्याः सुकृतं पुण्यमुपयन्ति प्राप्नुवन्ति विष्णोरिव प्रियाः, अप्रिया ब्रह्मविदुषि द्वेषं कुर्वाणा दुष्कृतं पापं उपयन्तीत्यनुवर्त्तते। ननु इदमतिचित्रं यो हि यत्करोति न स तत्प्राप्नोतीत्याशङ्क्य दृष्टान्तेन समाधानमाह, तत्तच्च कारयितुरलेपे, यथा दृष्टान्ते। अयं दृष्टान्तः, रथेन निमित्तभूतेन करणेन वा धावयन् भूमौ प्रेरयन् रथचक्रे रथाङ्गे पर्यवेक्षेत भूमौ संयोगविभागफलवती रथचक्रे समन्तादवलोकयेत, नतु तत्फलं प्राप्नुयात्। एवमनेन प्रकारेणान्तःकरणशरीरादिकृतादृष्टनिमित्तं प्रवर्त्तमाने अहोरात्रे रात्र्यहनी पर्यवेक्षते समन्तादवलोकयति, एवं यथा रात्र्यहनी पर्यवेक्षेत तथा सुकृतदुष्कृते पुण्यपापे। न केवलं ते एव अपि तु सर्वाणि च द्वन्द्वानि छाया-

* धनुवात इति A. धुन्वत इति B. C. E.

सर्वाणि च द्वन्द्वानि स एष विसुकृतो विदुष्कृतो ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति ॥ ४ ॥

स आगच्छतील्यं वृक्षं तं ब्रह्मगन्धः प्रविशति स आगच्छति सालज्यं संस्थानं तं ब्रह्मरसः प्रविशति स आगच्छत्यपराजितमायतनं तं ब्रह्मतेजः प्रविशति स आ-

---

तपशीतोष्णसुखदुःखादीनि निखिलान्यपि द्वन्द्वानि पर्यवेक्षते न तु तत्फलभाग्भवति। न हीक्षितुः फलं कलहादेः द्रष्टुर्मध्यस्थस्य दुःखस्यादर्शनात्। स उपासक एष प्राप्तब्रह्मलोको ब्रह्मलोकप्राप्तेः पूर्वमेव विसुकृतो विदुष्कृतः अपगतपुण्योऽपगतपापः ब्रह्मविद्वान् ब्रह्मैवाभिप्रैति व्याख्यातं ॥ ४ ॥

स उपासकः उत्तीर्णविजर आगच्छति प्राप्नोति इल्यं वृक्षं इल्यनामानं वृक्षं। तं प्राप्तेल्यवृक्षं ब्रह्मगन्धः अननुभूतपूर्वः सर्वसुरभिगन्धातिशायी ब्रह्मगन्धः, येनाघ्रातेन ब्रह्मलोकव्यतिरिक्तलोकेषु सुगन्धेष्वपि दुर्गन्धबुद्धिर्भवति तादृशः, विड्वराहाणामिव मनुष्यजन्मन्याघ्रातचम्पकादिगन्धो विड्गन्धे दुर्गन्धबुद्धिजनकः, प्रविशति घ्राणद्वारेणान्तर्हृदयकमलमुकुलमागच्छति। स आघ्रातब्रह्मगन्धः आगच्छति प्राप्नोति सालज्यं संस्थानं सालज्यनामकं पत्तनं। तं प्राप्तसालज्यं ब्रह्मरसः अनास्वादितपूर्वोऽन्यरसहेयताबुद्धिजनको ब्रह्मलोक एवासक्तिजनकोऽपूर्वरसो रसनाद्वारेण प्रविशति व्याख्यातं। स आस्वादितब्रह्मरसः आगच्छति प्राप्नोति अपराजितमायतनं अपरा-

गच्छतीन्द्रप्रजापती द्वारगोपा तावस्मादपद्रवतः स आगच्छति विभुप्रमितं तं ब्रह्मयशः प्रविशति स आगच्छति विचक्षणामासन्दीं बृहद्रथन्तरे सामनी पूर्वौ पादौ श्यैतनौधसे चापरौ पादौ वैरूपवैराजे अनूच्ये शाक्कर-

---

जितनामकं ब्रह्मगृहं। तं प्राप्तापराजितं ब्रह्मतेजः अदृष्टपूर्वं सर्वतेजसां न्यक्कारकारकं ब्रह्मलोक एवासक्तिकारकं चक्षुर्द्वारा प्रविशति व्याख्यातं। स प्रविष्टब्रह्मतेजा आगच्छति प्राप्नोति इन्द्रप्रजापती द्वारगोपौ इन्द्रप्रजापतिनामानौ द्वाररक्षाकारकौ द्वारस्थौ। तौ इन्द्रप्रजापती द्वारस्थौ अस्मात् प्राप्तब्रह्मगन्धरसतेजसः ब्रह्मण इव दर्शनमात्रेण बद्धाञ्जली परित्यक्तासनौ द्वारप्रदेशात् सरभसं जय जयेति शब्दमुच्चारयन्तौ अपद्रवतः अपसरतः। स अपद्रावितेन्द्रप्रजापतिक आगच्छति प्राप्नोति विभुप्रमितं विभुनामकं प्रमितं सभास्थलं। तं प्राप्तविभुप्रमितं ब्रह्मयशः ब्रह्माहमस्मीति ब्रह्मकीर्त्तिरहङ्कारो मनसा द्वारेण प्रविशति व्याख्यातं। स प्राप्तब्रह्मयशा आगच्छति प्राप्नोति विचक्षणामासन्दीं विचक्षणेतिनामिकां वेदिकां। सा विचक्षणासन्दी प्रज्ञा महत्तत्त्वरूपिणी बुद्धिः। तस्या आसन्द्याः प्रकारमाह बृहद्रथन्तरे सामनी अस्याः पूर्वौ पादौ श्यैतनौधसे सामनी अस्या अपरौ पादौ वैरूपवैराजे सामनी अस्या अनूच्ये दक्षिणोत्तरे अस्ते शाक्करैवते सामनी अस्यास्तिरश्ची पूर्वपश्चिमे। सा चतुरस्रा वेदी प्रज्ञा। तत्रागतस्य फलमाह, प्रज्ञया हि विपश्यति हि यस्माद्विचक्षणां प्राप्तः

रैवते तिरश्ची सा प्रज्ञा प्रज्ञया हि विपश्यति स आगच्छत्यमितौजसं पर्यङ्कं स प्राणस्तस्य भूतञ्च भविष्यच्च पूर्वौ पादौ श्रीश्चेरा चापरौ भद्रयज्ञायज्ञीये शीर्षण्ये बृहद्रथन्तरे अनूच्ये ऋचश्च सामानि च प्राचीना-

---

तस्मात्प्रज्ञयात्मबुद्ध्या विविधं विश्वं पश्यति। स प्राप्तप्रज्ञ आगच्छति प्राप्नोति अमितौजसं पर्यङ्कम् अमितौजोनामकं पर्यङ्कं, स अमितौजाः पर्यङ्कः प्राणः पञ्चवृत्तः सर्व्वेन्द्रियेभ्योऽभ्यधिकः क्रियाशक्तिः। तस्यामितौजसः पर्यङ्कस्य भूतञ्च भविष्यच्च पूर्व्वौ पादौ मस्तकाधारगात्रस्याधस्ताद्वर्त्तमानौ प्राच्यां दिशि चरणौ अतीतं भावि च विश्वं। चकारावेकैकस्यैकैकपादत्वार्थौ। श्रीश्चेरा चापरौ, इरा इला, पादगात्रस्याधस्ताद्वर्त्तमानौ पश्चिमायां दिशि अन्यौ पादौ लक्ष्मीः धरणी च। चकारौ पूर्व्ववत्। बृहद्रथन्तरे अनूच्ये दक्षिणोत्तरयोर्दीर्घे खट्वाङ्गे अ··· बृहद्रथन्तरे सामनी, भद्रयज्ञायज्ञीये शीर्षण्ये पूर्वपश्चिमयोर्ह्रस्वे खट्वापादाधारे शीर्षपादस्थले शीर्षण्ये ते भद्रयज्ञायज्ञीये सामनी। एवं कोष्ठचतुष्टये पादचतुष्टयेन निष्पन्ने। पट्टिकामाह ऋचश्च सामानि च प्राचीनातानं प्राक्प्रत्यगुपर्य्यधोभावेन वर्त्तमाना दीर्घाः पट्टिकाः प्राचीनातानं, तदृचश्च सामानि च। चकारौ ऋक्सामयोरधऊर्द्धभागनियमार्थौ। यजूंषि तिरश्चीनानि यजूंषि प्रसिद्धानि दक्षिणोत्तरयोस्तिर्यक्पट्टिकारूपाणि। सोमांशव उपस्तरणं। सोमकिरणाः सुको-

तानं* यजूंषि तिरश्चीनानि सोमांशव उपस्तरणमुद्गीथोऽपरश्च यः श्रीरुपबर्हणं† तस्मिन् ब्रह्मास्ते तमित्थंवित्पादेनैवाग्र आरोहति तं ब्रह्मा पृच्छति‡ कोऽसीति तं प्रतिब्रूयात् ॥ ५ ॥

मलकशिपुस्वरूपं। उद्गीथ उपश्रीः उद्गीथः सामभक्तिविशेषः उपस्तरणस्योपरि आपादमस्तकं प्रक्षिप्यमाणं चीरगौरं मृदुतरं वस्त्रमुपश्रीः तदुद्गीथः, श्रीरुपबर्हणं उच्छीर्षकं लक्ष्मीः, यद्यपीयं पादत्वेन पूर्वमुक्ता तथापि पूर्वा लौकिक्युत्तरा तु वैदिकीति विभागादपुनरुक्तिः। तस्मिन् प्राणपर्यङ्के भूतश्चेत्यारभ्य श्रीरुपबर्हणमित्यन्तेनोक्ते ब्रह्मास्ते हिरण्यगर्भस्वरूपं स्वतादात्म्येनोपास्यमानं उपविष्टं वर्त्तते। तं ब्रह्मण आसनभूतं पर्यङ्कमुक्तं इत्थंवित् उक्तपर्यङ्कस्थेन ब्रह्मणा तादात्म्यवित्, पादेनैव चरणेनैव, नतु पादावधस्तात् प्रक्षिप्य जघनकराद्यारोपणेन, अग्रे प्रथमतः आरोहति आरोहणं करोति। तं पादेनैव उक्तपर्यङ्कमारोहन्तं प्रियं पुत्रमिव पिता ब्रह्माह हिरण्यगर्भो ब्रूते। ब्रह्मोक्तिमाह, कः प्रश्ने असि भवसि इत्यनेन प्रकारेण श्रुतिः शिक्षयति तं कोऽसीति ब्रुवाणं ब्रह्माणं प्रतिब्रूयात् प्रत्युत्तरं वदेत् ॥ ५ ॥

---

* प्राचीनातानानीति A.

† उद्गीथ उपश्रीः श्रीरुपबर्हणमिति टी०।

‡ ब्रह्मा ह पृच्छतीति D. ब्रह्माहेति टी०।

ऋतुरस्म्यार्तवोऽस्म्याकाशाद् योनेः सम्भूतो *भार्यायै रेतः संवत्सरस्य तेजो भूतस्य भूतस्यात्मा भूतस्य भूतस्य त्वमात्मासि यस्त्वमसि सोऽहमस्मि त-

वक्तव्यं प्रत्युत्तरमाह, ऋतुरस्मि वसन्ताद्यृतुस्वरूपो भवामि। कालात्मकत्वे उपपत्तिमाह, आर्तवोऽस्मि ऋतुसम्बन्धी भवामि कालात्मकेन मया सम्बन्धात्। मम कालात्मनस्त्वया तादृशेनाभेदप्राप्तिर्यतस्ततः कालः कालसम्बन्धी च भवामीत्यर्थः। तर्हि किं यथा चन्द्रमसः सकाशात् स ऋतुरार्तवश्च तथेत्याशङ्क्य नेत्याह, आकाशादव्याकृताद्योनेः उपादानकारणात् सम्भूत उत्पन्नः। †भार्यै भायाः स्वयं प्रकाशाद्ब्रह्मणः। अयमर्थः। न केवलं जडमुपादानकारणं किन्तु स्वयंप्रकाशं ब्रह्म शबलमिति। ‡रेतः संवत्सरस्य तेजो भूतस्य भूतस्यात्मा भूतस्य भूतस्य। ननु कथं भाया आकाशाद्योनेः सम्भूतः कथमृतुरार्तवश्चेत्यत आह, भूतस्य अतीतस्य भूतस्य यथार्थस्य का[illegible]णरूपस्य भूतस्य चतुर्विधचेतनाचेतनात्मकस्य भूतस्य पञ्चमहाभूतात्मकस्य, नहि संवत्सरमन्तरेण चतुर्विधानि भूतानि पञ्च भूतानि चोत्पद्यन्ते, संवत्सरस्य वसन्ताद्यनेकर्तुस्वरूपस्य ‡रेतः संवत्सरप्रवर्तकमन्तर्बहिर्वर्तमानं तेजो दीप्तिस्वरूपं मद्बुद्धिप्रकाशकं आत्मा आत्मेति प्रत्ययव्यवहारयोग्यं संवत्सरस्य

* भार्यै भाया इति टी॰ B. C. E.

† भार्यायै भार्याया इति D.

‡ एतत् संवत्सरस्येति B. C. E.

माह कोऽहमस्मीति सत्यमिति ब्रूयात् किं तद्यत्सत्य-
मिति यदन्यद्देवेभ्यश्च प्राणेभ्यश्च तत्सदथ यद्देवाश्च
प्राणाश्च तत्त्यं तदेतया वाचाभिव्याह्रियते सत्यमित्ये-

च तत्कार्यस्य च मयि स्वयंप्रकाशस्वरूपेऽध्यस्तत्वात्। *यदा-प्येतत्संवत्सरस्य अस्य संवत्सरस्य तेजोभूतस्य तेजःस्वरूपस्य आदित्यादितेजसः प्रवर्त्यमानत्वात् भूतस्य व्यवहारयोग्यस्य चेतनाचेतनात्मकप्रपञ्चस्य भूतस्य कारणस्य भूतस्य कार्यस्य आत्मा अधिष्ठानभूत इति व्याख्येयं तदापि ऋतुत्वमार्तवत्वं चाविरुद्धं कालस्यापि कारणस्य समानत्वात्। ननु कोऽयमा-त्मेत्यत आह, त्वं पर्यङ्कस्थो ब्रह्मात्मासि आत्मशब्दप्रत्ययभाग् भवसि। यद्येवं किं तवेत्यत आह, यः प्रसिद्धः पर्यङ्कस्थस्त्वमसि ब्रह्मा मत्पुरतः स्थितोऽसि स त्वच्छब्दप्रत्ययालम्बन उक्तः अह-मस्मि अस्मच्छब्दप्रत्ययालम्बनो भवामि इत्यनेन प्रकारेण प्रतिब्रूयादित्यन्वयः। तमेवं वदन्तमुपासकमाह पर्यङ्कस्थो ब्रह्मा ब्रूते कः प्रश्ने अहमस्मि, यस्त्वमात्मासीति भवतोक्तः स कोऽहं ब्रह्मा भवामि। इत्यनेन प्रकारेण ब्रह्मणा पुनः पृष्ट उपासको ब्रह्माणं प्रति सत्यं सत्यशब्दाभिधेयाधिष्ठानं इति ब्रूयात् अनेन प्रकारेण वदेत्। एवमुक्ते पुनर्ब्रह्मा पृच्छति किं प्रश्ने तद्भवतोक्तं यद्भवतः प्रसिद्धं सत्यं सत्यशब्दाभिधेयं। इत्यनेन प्रकारेण ब्रह्म-णा पृष्टः पुनः प्रत्युत्तरं ब्रूयात् यत्प्रसिद्धमन्यद्देवेभ्यश्च प्राणे-

---

* पाठान्तरव्याख्यारम्भः।

तावदिदं सर्वमिदं सर्वमसीत्येवैनं तदाह *तदेतच्छ्लोकेनाभ्युक्तम् ॥ ६ ॥

यजूदरः सामशिरा असावृङ्मूर्तिरव्ययः स ब्रह्मेति विज्ञेय ऋषिर्ब्रह्ममयो महानिति तमाह केन

भ्यश्च इन्द्रियाधिष्ठातृभ्योऽग्न्यादिभ्यः इन्द्रियेभ्यः सप्राणेभ्यो व्यतिरिक्तं। चकारौ वाय्वाकाशाभ्यामप्यन्यदित्येतदर्थौ। तत् उक्तमिन्द्रियप्राणव्यतिरिक्तं सत् सच्छब्दालम्बनं। अथ पक्षान्तरे यत्प्रसिद्धं देवाश्च प्राणाश्च अग्न्यादय इन्द्रियाणि सप्राणकानि वाय्वाकाशौ च पूर्व्ववत् तदुक्तं देवादिकं त्यं त्यच्छब्दालम्बनं। तदुक्तं सचराचरं विश्वमेतया उक्तया सत्यरूपया वाचा वचनेनाभिव्याह्रियते सर्वत उच्यते। एतच्छब्दार्थमाह सत्यं सत्यशब्दरूपं, इति सत्यानुकरणार्थः। एतावदियत्परिमाणमिदं प्रत्यक्षादिप्रमाणगम्यं सर्वं निखिलं जगत्। इदानीं श्रुतिराह इदं सर्वमसि इदं प्रत्यक्षादिप्रमाणगम्यं सर्वं निखिलं भूतभौतिकात्मकं जगत् ब्रह्म त्वं भवसि, इत्येवैनं तदाह। तदा तस्मिन् ब्रह्मणो मञ्चकसमीपागमनकाले इत्येवोक्तेनैव प्रकारेण न त्वन्येन, एनं ब्रह्माणमाह उपासकः समागतो ब्रूते। †तदेतत् श्लोकेनाभ्युक्तम् ॥ ६ ॥

श्रुत्याप्येतद्ब्रह्मणः सर्वात्मत्वमुक्तमित्युपासकः श्रुतिमुदाहरति। तमुपासकं स्वात्मनः सर्वात्मत्वं श्रवाणं आह ब्रह्मा ब्रूते,

* तदेतदृक्श्लोकेनेति A.

† तदेतदित्यादि उदाहरतीत्यन्तं B. C. E. पुस्तकेषु नास्ति।

मे पौंस्तानि नामान्याप्नोषीति प्राणेनेति ब्रूयात् केन नपुंसकानीति मनसेति केन स्त्रीनामानीति वाचेति केन गन्धानिति *प्राणेनेति केन रूपाणीति चक्षु-

केन करणभूतेन रूपेण वा, मे मम ब्रह्मणः सर्वात्मनः, पौंस्तानि पुंलिङ्गसम्बन्धीनि नामानि नामधेयान्याप्नोषि प्राप्नोषि। इत्यनेन प्रकारेण ब्रह्मणा पृष्टे प्राणेन पञ्चवृत्त्यात्मकेन साधिदैविकेन करणेन रूपेण वा इति ब्रूयात्, अनेन प्रकारेण प्रत्युत्तरं वदेदुपासकः। पुनर्ब्रह्मा पृच्छति केन करणेन रूपेण वा स्त्रीनामानि स्त्रीलिङ्गनामधेयानि आप्नोषीत्यत्र वक्ष्यमाणेषु चानुवर्तते। इत्यनेन प्रकारेण पृष्टे वाचा प्राणनिष्पाद्यया वर्णाभिव्यक्तिहेतुभूतया इत्यनेन प्रकारेण ब्रूयादित्यनुवर्ततेऽत्र वक्ष्यमाणेषु च। पुनः पृच्छति केन करणेन रूपेण वा नपुंसकानि नपुंसकलिङ्गनामानि। इत्यनेन प्रकारेण एवं पृष्टे उत्तरमाह मनसा अन्तःकरणेन साधिदैविकेन इति अनेन प्रकारेण। पुनः पृच्छति केन करणेन गन्धान् पृथिव्येकगुणान् इति अनेन प्रकारेण। उत्तरमाह प्राणेन साधिदैविकेन इत्येव ब्रूयात् अनेन प्रकारेण वदेत् ब्रूयादित्यनुवर्तते, इत्येतदर्थं मध्येऽपि ग्रहणमन्ते च ग्रहीष्यति। एवकारः प्राणशब्दस्य द्विरभिधानं कथं करणीयमितिशङ्कानिवारणार्थः। पुनः पृच्छति केन करणेन रूपाणि तेजोऽसाधारणगुणभूतानीत्यनेन प्रकारेण। चक्षुषा नेत्रेन साधिदैविकेन करणेनेति अनेन प्रकारेण। केन

* प्राणेनेत्येवेति टी०। प्राणेनेति A.

षेति केन शब्दानिति श्रोत्रेणेति केनान्नरसानिति जिह्वयेति केन कर्माणीति हस्ताभ्यामिति केन सुखदुःखे इति शरीरेणेति केनानन्दं रतिं प्रजाति-

---

स्पर्शान् त्वचेति प्रश्नोत्तरे वहिरेवावगन्तव्ये। पुनः पृच्छति केन करणेन शब्दान् ध्वनिवर्णपदवाक्यादिरूपान् इत्यनेन प्रकारेण। उत्तरमाह श्रोत्रेण शब्दोपलब्धिकरणेन साधिदैविकेन इत्यनेन प्रकारेण। पुनः पृच्छति केन करणेन अन्नरसान् अन्नस्य अदनीयस्य लेह्यपेयचोष्यचर्व्यभोज्यस्य रसान् कटुकाम्लतीक्ष्ण-लवणकषायमधुरान् रसान् इत्यनेन प्रकारेण। उत्तरमाह जिह्वया रसनेन्द्रियेण साधिदैविकेन इत्यनेन प्रकारेण। पृच्छति केन करणेन कर्माण्यादातव्यानि इत्यनेन प्रकारेण। उत्तरमाह हस्ताभ्यां हस्तद्वयरूपेण करणेन साधिदैविकेन इति अनेन प्रकारेण। पृच्छति केन करणेन सुखदुःखे अनुकूल-प्रतिकूले वेदनीये इत्यनेन प्रकारेण। उत्तरमाह शरीरेण स्थूलसूक्ष्माख्येन पुण्यापुण्यसहकृताज्ञानहेतुना देहेन इत्यनेन प्रकारेण। पृच्छति केन करणेनानन्दं मैथुनावसानसमुत्थं सुखं, रतिं मैथुनरागजं सुखमामैथुनावसानं योषिदालिङ्गनसुखमा-रभ्य, प्रजातीः प्रजाः कन्यासुतादिरूपाः इत्यनेन प्रकारेण। उत्तरमाह उपस्थेन उपस्थाख्येन करणेन स्त्रीपुंलिङ्गभेदेन भिन्नेन साधिदैविकेन इत्यनेन प्रकारेण। पृच्छति केन करणेन इत्याः गतीः इत्यनेन प्रकारेण। उत्तरमाह पादाभ्यां

मित्युपस्थेनेति केनेत्या इति पादाभ्यामिति केन धियो विज्ञातव्यं कामानिति प्रज्ञयैवेति ब्रूयात्तमाह आपो वै खलु मे लोकोऽयं तेऽसाविति सा या ब्रह्मणो

पादद्वयाख्येन करणेन साधिदैविकेनेत्यनेन प्रकारेण। पृच्छति केन करणेन *धियो बुद्धिवृत्तीः, विज्ञातव्यं धियां विषयज्ञानं, कामान् विविधेच्छापरपर्यायरूपानित्यनेन प्रकारेण। उत्तरमाह प्रज्ञया स्वयंप्रकाशेनात्मबोधेन। यद्यपि सर्वमिदमनयैवाप्यते तथापि वागादिकं नामाद्यवाप्तौ साक्षात्करणमस्ति व्यवधायकं न त्वेवं बुद्ध्यादौ किञ्चिदस्ति। यद्यपि सुखदुःखे अपि प्रज्ञैकवेद्ये तथापि मम पादे सुखं शिरसि च दुःखमित्यादिप्रत्ययानुसारेण शरीरेणेत्युक्तं। यद्यपि नाममात्राप्तौ करणं वाक् प्राणश्च जीवनमन्तरेण न करणं, मनश्च सर्वोपलब्धिसाधारणकरणं तथापि स्त्रीपुंव्यक्तिवत् झटित्येव नपुंसकव्यक्तेर्बाह्यकरणैः प्रत्ययानुदयादस्ति नपुंसकाधिगमे मनसोऽभ्यधिको व्यापारो यतस्तत उक्तं मनसा नपुंसकानीति। प्राणस्य जीवनमन्तरेण अकरणस्यापि वाग्व्यापारसहकारित्वाद्वाक्प्राणौ नामाप्तौ करणं भवतः। स्थिते च करणत्वे प्राणस्य पुरुषत्वाद्वाचः स्त्रीत्वाच्च वाक्प्राणयोर्विभागेन करणत्वमविरुद्धं। प्रतर्दनाग्निहोत्रे च वाक्प्राणयोर्नामाप्तौ करणत्वमर्थाद्व्यति यावद्वा इत्यादिना (अ०२।ख०५)। इति ब्रूयाद्व्याख्यातं। तं पादेन पर्यङ्कमारूढमुक्तोत्तरवादिनमाह पर्यङ्कस्थो ब्रह्मा ब्रूते।

* धियो बुद्धेरिति D.

वाक् परिवेष्ट्री स यो ह वा एतस्य प्राणस्य ब्रह्मणो मनो दूतं वेद दूतवान् भवति यश्चक्षुर्गोप्तृ गोप्तृमान् भवति यः श्रोत्रं संश्रावयितृ संश्रावयितृमान् भवति यो वाचं परिवेष्ट्रीं परिवेष्ट्रीमान् भवति तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्त्येवं

मनः सङ्कल्पविकल्पात्मकमन्तःकरणं दूतं महाराजस्येव सन्धिविग्रहकारिभृत्यवद्वर्तमानं। वाक् ताल्वादिस्थानस्थमिन्द्रियं परिवेष्ट्री परिवेषणस्य कर्त्री महाराजस्य विश्वासनीया योषिदिव। चक्षुः रूपोपलब्धिकरणमिन्द्रियं *गोप्तृ गोशब्दवाच्यानामिन्द्रियाणां रक्षकं महाराजस्येव गोर्भूमेः रक्षको मन्त्री। श्रोत्रं शब्दोपलब्धिकरणं संश्रावयितृ सम्यक् श्रवणकारकं प्रतीहाररूपं। तस्मै वा एतस्मै प्राणाय ब्रह्मणे कृतं व्याख्यानं, हकारषष्ठ्योरभावो विशेषः। अत्र चतुर्थी तु बलिशब्दयोगार्था। एता उक्ता मनआद्याः सर्वा निखिला देवता देवताशब्दवाच्याः अयाचमानाय इदं मह्यमाहरन्त्विति प्रार्थनामकुर्वाणाय बलिं गर्भदासा इव राज्ञः करमपेक्षितमर्थजातमित्यर्थः, हरन्ति आहरन्ति अर्पयन्तीत्यर्थः। तथो एव अपि तथैव न त्वन्यथा, अस्मै प्राणोपासकाय सर्वाणि निखिलानि भूतानि स्थिरजङ्गमानि अयाचमानायैव इदं मे प्रयच्छन्तु इति प्रार्थनामकुर्वाणायैव न तु कुर्वाणायापि, बलिं हरन्ति व्याख्यातं। अस्मै इति य

* गोप्त्रमिति E.

हैवास्मै* सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति त एवैनमुपमन्त्रयन्ते ये पुरस्तात् प्रत्याचक्षीरन्नेष धर्मो

उक्तस्तमाह, यः प्रसिद्ध उपासकः एवं वेद उक्तेन प्रकारेण उपास्ते तस्य प्राणस्य ब्रह्मणो मनो दूतमित्यादिनोपासकस्य उपनिषद्रहस्यव्रतं न याचेत् प्राणात्ययेऽपि याञ्चां न कुर्यात्। इति उपनिषत्कथनसमाप्त्यर्थः। अयाञ्चायां दृष्टान्तमाह, तत् तत्रायाञ्चायां दृष्टान्तः, यथा दृष्टान्ते ग्रामं ब्राह्मणादिसमाकीर्णं देशविशेषं भिक्षित्वा भिक्षार्थं प्रतिगृहं गत्वा अलब्ध्वा एकमपि सिक्थमप्राप्य उपविशेत् ततो भिक्षाप्राप्तौ निराशः सन्नुपवेशनं कुर्यात् तदप्राप्तौ सञ्जातक्रोधः, एवं सङ्कल्पवान्। भिक्षुकस्य सङ्कल्पमाह, नाहमतो दत्तमश्नीयामनेन ग्रामेण मिलितेनामिलितेन वा दत्तं समर्पितं नाश्नीयामहं भोजनं न करवाणि अहं भिक्षुकः। इत्यनेन प्रकारेण सङ्कल्पे वर्तमानेऽस्मिन्, य एवादाढत्वेन प्रसिद्धास्त एव न लब्धे, एनं स्वस्मादप्राप्तभिक्षं खेन्नो विगतस्पृहं ये पुरस्तात् पूर्वमस्मात् सङ्कल्पात् प्रत्याचक्षीरन् गच्छास्मत्तो न दास्याम इति निराकरणं कुर्युः, त एव प्रत्याख्यातार एव न लब्धे एनमयाचकं तन्मुखावलोकनपराङ्मुखमुपमन्त्रयन्ते उपमन्त्रणं

* तथो एवास्मा इति टी॰ ।

F

*ऽयाचतो †भवत्यन्नदास्त्वेवैनमुपमन्त्रयन्ते ददाम त इति ॥ १ ॥

प्राणो ब्रह्मेति ह स्माह पैङ्ग्यस्तस्य वा एतस्य प्राणस्य ब्रह्मणो वाक् परस्ताच्चक्षुरारुन्धते‡ चक्षुः परस्ताच्छ्रोत्रमारुन्धते श्रोत्रं परस्तान्मन आरुन्धते मनः

कुर्वन्ति ददाम दानं करवाम ते तुभ्यं पूर्वमस्मत्प्रार्थिकाय ददानीमपगताशाय इत्यनेन प्रकारेण। एष प्रत्यचो दीनत्वलज्जादिलक्षणो धर्मो गुणविशेषो याचतो याचकस्य भवति स्पष्टं। अन्यतस्त्वेव, तुशब्दः पचान्तरे, अन्यस्मान्निःस्पृहः प्रसन्नवदनः अन्य एव अयाच्ञायामेव न तु याच्ञायां यदि वर्तते तदा एवैनमुपमन्त्रयन्ते ददाम त इति व्याख्यातं। एवं याच्ञायाच्ञयोर्गुणदोषान् पर्यालोच्य न याचेदित्यर्थः ॥ १ ॥

यथा कौषीतकिस्तद्वत् पैङ्ग्यनामापि ऋषिरित्याह प्राणो ब्रह्मेति ह स्माह पैङ्ग्यस्तस्य ह वा एतस्य प्राणस्य ब्रह्मणः, पैङ्ग्यनामा पैङ्ग्यगोत्रो वा, व्याख्यातमन्यत्। ननु मनोदूतत्वादिलक्षणेन ब्रह्मत्वं प्राणस्य यद्यपि तथाप्यप्रत्यक्षादब्रह्मत्वमपीत्यत आह वाक् वागिन्द्रियात् परस्तात् परतः चक्षुश्चक्षुरिन्द्रियमारुन्धे समन्तादावृत्य तिष्ठति। वाचश्चक्षुरान्तरं युक्तं दृष्टेः प्रायेण विसंवादाभावात्। चक्षुश्चक्षुरिन्द्रियात् पर-

---

* याचित इति B. C. E. याचत इति D. टीका।

† भवत्यन्यतस्त्वेवेति टी०।

‡ आरुन्ध इति सर्वत्र टीका। आरुध्यत इति तु समीचीनः पाठः।

परस्तात् प्राण आरुन्धते तस्मै वा एतस्मै प्राणाय ब्र-
ह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्त्येवं
हैवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य
एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षि-
त्वाऽलब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति त एवैन-
मुपमन्त्रयन्ते ये पुरस्तात् प्रत्याचक्षीरन्नेष धर्मोऽयाच-
तो भवत्यन्नदास्त्वेवैनमुपमन्त्रयन्ते ददाम त इति ॥ २ ॥

स्याच्छ्रोत्रमारुन्धे श्रोत्रं श्रवणेन्द्रियं, व्याख्यातमन्यत्। चक्षुषा शुक्तिकां रजतवत् पश्यन्ति न त्वेवं श्रोत्रमविद्यमानं शृणोति ततो युक्तं चक्षुष आन्तरत्वं श्रोत्रस्य। श्रोत्रं श्रोत्रेन्द्रियात् परस्तान्मनः सङ्कल्पविकल्पात्मकमन्तःकरणं, व्याख्यातमन्यत्। मनसः सावधानत्वे श्रोत्रेण श्रवणं, ततो युक्तं श्रोत्रादान्तरत्वं मनसः। मनः मनसः परस्तात् परतः आन्तरः प्राणः पञ्चवृत्तिः, प्राणबन्धनं हि मनः प्रसिद्धं, आरुध्यते समन्तादावृत्य तिष्ठतीत्यवगम्यते पण्डितरूपैः। एवमान्तरत्वेन ब्रह्मत्वं युक्तं। तस्मै वा एतस्मै प्राणाय ब्रह्मण एताः सर्वा देवता अयाचमानाय बलिं हरन्ति, तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति य एवं वेद तस्योपनिषन्न याचेदिति तद्यथा ग्रामं भिक्षित्वाऽलब्ध्वोपविशेन्नाहमतो दत्तमश्नीयामिति य एवैनं पुरस्तात् प्रत्याचक्षीरंस्त एवैनमुपमन्त्रयन्ते ददाम त इत्येष धर्मो याचतो भवत्यन्यतस्त्वेवैनमुपमन्त्रयन्ते ददाम त इति व्याख्यातं ॥ २ ॥

अथात एकधनावरोधनं यदेकधनमभिध्यायात् पौर्णमास्यां वामावास्यायां वा शुद्धपक्षे वा पुण्ये नक्षत्र एतेषामेकस्मिन् पर्वण्यग्निमुपसमाधाय परिसमूह्य परिस्तीर्य पर्युक्ष्य दक्षिणं जान्वाच्य स्रुवेणाज्याहुती-

प्राणविदोऽर्थेच्छायां सत्यां कर्तव्यतामाह, अथ प्राण-ब्रह्मज्ञानानन्तरं अतो यस्मादिच्छा जाता अस्मात् कारणा-देकधनावरोधनं एकधन इति प्राणस्य नामधेयं जगत्यस्मि-न्नेक एव धनरूप एकधनः। प्राणांस्तु सततं रक्षेद्दारैरपि धनैरपीति न्यायेन प्राणस्य परमधनत्वात् तस्यावरोधनमेकत्र स्थापनमेकधनावरोधनं, अयमर्थः। सत्यामर्थेच्छायामर्थाप्राप्तौ व्याक्षिप्तचेतसो न प्राणब्रह्मचिन्तनं, वक्ष्यमाणेनोपायेनार्थप्राप्तौ प्रसन्नचेतसः प्राणचिन्तनस्य सम्भवादिदमेकधनावरोधनं स्यात्। यद् यद्येकधनं प्राणमभिध्यायात् सर्वतो ध्यानं कुर्यात् स्युः तदार्थावाप्त्या इदं कुर्यादिति शेषः। अथवा एकमनन्यलभ्यं धनं तस्यावरोधनं प्राप्त्युपायः तद्धनोचितं। एवमपि यद्येकधनमभि-ध्यायात् प्राणोपासकः तदा पौर्णमास्यां वामावास्यायां वा, वाशब्द इच्छाविकल्पार्थः स्पष्टमन्यत्। शुद्धपक्षे वा शुक्लपक्षे वाशब्दः कृष्णपक्षविकल्पार्थः, पुण्ये धन्ये, आत्मनोऽनुकूले इत्यर्थः, नक्षत्रेऽश्विन्यादौ शास्त्रविहिते। अग्निमुपसमाधाय अग्निं श्रौतं स्मार्तं वा स्वशाखोक्तक्रमेण कुण्डस्थण्डिलादौ प्रक्षिप्य परिसमूह्य समन्तात् तृणादिकमपनीय, परिस्तीर्य

जुहोति वाङ्नाम देवतावरोधनी सा मेऽमुष्मादिदम-वरुन्ध्यात्तस्यै स्वाहा प्राणो नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै स्वाहा चक्षुर्नाम देवताव-रोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै स्वाहा श्रोत्रं नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै

समन्ताद्दर्भानवकीर्य, पर्युक्ष्य मन्त्रपूतेन वारिणा समन्तात् परिषिच्य, उत्पूयाज्यं स्वगृह्योक्तप्रकारेणोत्पवनसंस्कारेण सं-स्कृत्य, दक्षिणं जान्वाच्य दक्षिणं जान्वधो निपात्य, स्रुवेण वा, चमसेन वा कंसेन वा, स्रुवचमसौ प्रसिद्धौ याज्ञिकानां, कंसं कांस्यदर्व्यादिकं तेन करणेन, वाचयं तु प्राप्तीच्छयोरनियत्यर्थं। एता वक्ष्यमाणाः आज्याहुतीराज्यभागविशेषान् जुहोति जुहुयात्। होममन्त्रानाह वाङ्नाम देवता वागभिधाना देव-ताऽवरोधनी उपासकाभीष्टार्थसम्पादिका सा उक्ता देवता मे मम प्राणोपासकस्य अर्थेच्छोरमुष्मात् मदभीष्टार्थस्वा-मिनः सकाशादिदं मदभीष्टमर्थजातमवरुन्ध्यात्* अवरो-धनं कुरुतां सम्पादयत्वित्यर्थः। तस्यै उक्तनाम्न्यै देवतायै स्वाहा होमाहुतिमेतदर्थप्रधानां स्वीकरोतु स्वाहुतं स्वीक-रोतु। प्राणो नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्या-त्तस्यै स्वाहा। चक्षुर्नाम देवतावरोधनी सा मेऽमुष्मादिदमव-रुन्ध्यात्तस्यै स्वाहा। श्रोत्रं नाम देवतावरोधनी सा मेऽमुष्मा-

---

* अवरुंद्धामिति B. C. E.

स्वाहा मनो नाम देवतावरोधनी सा मेऽमुष्मादिदम-वरुन्ध्यात्तस्यै स्वाहा प्रज्ञा नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै स्वाहेत्यथ धूमगन्धं प्रजिघ्रायाज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्यार्थं ब्रूयाद्दूतं वा प्रहिणुयाल्लभते हैव ॥ ३ ॥

दिदमवरुन्ध्यात्तस्यै स्वाहा। मनो नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै स्वाहा। प्रज्ञा नाम देवतावरोधनी सा मेऽमुष्मादिदमवरुन्ध्यात्तस्यै स्वाहा। प्राणो नाम प्राणाभिधानात् घ्राणग्रहणञ्च तन्त्रेणावगन्तव्यं, तेन घ्राणाभिधानेति मन्त्रान्तरमनुक्रमपि सिद्धं भवति। श्रोत्रं नाम श्रोत्राभिधाना। प्राणचक्षुःश्रोत्रमनःप्रज्ञामन्त्रा वाङ्मन्त्रवद्व्याख्येयाः। प्रज्ञया ब्रह्मत्वं चोक्तं। इति मन्त्रपरिसमाप्त्यर्थः। अथ होमानन्तरं धूमगन्धं होमधूमगन्धं प्रजिघ्राय प्रतिघ्राय आघ्राणं कृत्वा आज्यलेपेन होमावशिष्टाज्यलेपेन अङ्गान्यनुविमृज्य होमधूमघ्राणमनु सर्वगात्राण्युपलिप्य वाचंयमो मौनी अभिप्रव्रज्य होमदेशाद्यत्र क्वाप्यवस्थितमर्थस्वामिनं गत्वा अर्थं स्वाभीष्टमर्थं ब्रूयात् ब्रवीत इदं मे त्वत्तो भूयादिति वदेत्। अर्थस्वामिनो दूरदेशावस्थाने दूतं वा प्रहिणुयात् स्वभृत्यसुतादिकं दूतं प्रेरयेत्, भृत्याद्यभावे वाचं वेति वहिरेवावगन्तव्यं। लभते हैव प्रसिद्धमर्थं स्वाभीष्टं स्वात्मदूतवाक्यानामन्यतमेन गतेन प्राप्नोत्येव न तु न प्राप्नोति ॥ ३ ॥

अथातो दैवः स्मरो यस्य प्रियो बुभूषेद्यस्यै *वा येषां वा यासां वैतेषामेवैकस्मिन् पर्वण्येतयैवावृतैता आज्याहुतीर्जुहोति वाचं ते मयि जुहोम्यसौ स्वाहा प्राणं ते मयि जुहोम्यसौ स्वाहा चक्षुस्ते मयि जुहो-

एवमर्थोपायमुक्त्वा वश्योपायमाहोपासकस्य, अथ प्राणब्रह्मज्ञानानन्तरमतः यस्मादात्मनः प्रियस्येच्छा अस्मात्कारणात् दैवः देवैर्वागादिभिः सम्पाद्यः स्मरोऽभिलाषः सम्पन्नो भवति यथा तथा कथ्यत इति शेषः। यस्य पुरुषस्य व्यक्तिविशेषस्यात्मन्यनुरागशून्यस्य प्रियो बुभूषेत् प्राणवत् प्रियो भवितुमिच्छेत्, यस्यै यस्याः स्त्रियाः वै प्रसिद्धाया राजादिपत्न्याः, येषां प्रत्यक्षाणां राजादीनां श्रीमतां सर्वस्नेहशून्यानां वै प्रसिद्धानां, यासां वान्यस्त्रीणां, तेषामेव वागाद्यधिष्ठातृणामग्न्यादीनां न त्वन्येषां। अत्र वाशब्दाध्याहारेण योजनीयं, यस्यै वा प्रियो बुभूषेत्, येषां वा प्रियो बुभूषेत्, यासामेव वा प्रियो बुभूषेत्। एकस्मिन् पर्वणि दर्शपूर्णमासयोरन्यतरस्मिन् शुक्लपक्षात्मके वा पुण्ये नक्षत्रे पर्वदिवसे अग्निमुपसमाधाय व्याख्यातं। एतयैवावृता उक्तेन प्रकारेण परिसमूह्येत्यादिना एताः वक्ष्यमाणमन्त्राका आज्याहुतीर्जुहोति व्याख्यातं। वाचं वागिन्द्रियरूपां ते तव मयि प्रीतिं करिष्यतः मयि प्रीतिविषये तवाप्रीत्यौदासीन्ययोरन्यतरेन्धनसन्दीप्तेऽग्नौ जुहोमि प्रक्षिपामि, असौ

* वाक्याने वै इवि टी०।

म्यसौ स्वाहा श्रोत्रं ते मयि जुहोम्यसौ स्वाहा मनस्ते मयि जुहोम्यसौ स्वाहा प्रज्ञां ते मयि जुहोम्यसौ स्वाहेत्यथ धूमगन्धं प्रजिघ्रायाज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्य संस्पर्शं जिगमिषेदपि वा-

---

एतन्नामाहमयं कामो वा मम सम्पन्नो भवतु, स्वाहा मदीया वाक् ममैतत्कामिन आज्याहुतेरनुज्ञां प्रयच्छतु। प्राणं ते मयि जुहोम्यसौ स्वाहा, चक्षुस्ते मयि जुहोम्यसौ स्वाहा, श्रोत्रं ते मयि जुहोम्यसौ स्वाहा, मनस्ते मयि जुहोम्यसौ स्वाहा, प्रज्ञां ते मयि जुहोम्यसौ स्वाहा, प्राणचक्षुःश्रोत्रमनःप्रज्ञामन्त्रा वाङ्मन्त्रवद्व्याख्येयाः। इत्यथ धूमगन्धं प्रजिघ्रायाज्यलेपेनाङ्गान्यनुविमृज्य वाचंयमोऽभिप्रव्रज्य व्याख्यातं। संस्पर्शं जिगमिषेत् स्वसाध्यस्य संस्पर्शं गन्तुमिच्छेत् गच्छेदित्यर्थः। अथ स्वसाध्यस्य महाविभूत्यादिमत्त्वेन स्पर्शः कर्तुमशक्यः। तदा पक्षान्तरमाह अपि वातादा सम्भाषमाणस्तिष्ठेत् अपि वेति पक्षान्तरे साध्यस्य स्पर्शाभावे तेन सह वार्तां कुर्वन् तिष्ठेत्। सम्भाषणस्यापि कर्तुमशक्यत्वे वाशब्दः पक्षान्तरमाह वातात् तिष्ठेत् स्वशरीरवातसंस्पर्शो यथा भवति तथावस्थानं कुर्यादित्यर्थः। अथवा वातात्सम्भाषमाणस्तिष्ठेत् स्वकीयाः शब्दा यथा वायुनास्य कर्णरन्ध्रे स्थानं कुर्वन्ति तथा कुर्यादित्यर्थः। एवं कृते फलमाह प्रियो हैव भवति ह प्रसिद्धः सर्वस्य साध्यस्य प्रिय एव भवति न त्वप्रियः, न केवलं प्रियत्वमात्रं स्वसन्निधौ

तादा तिष्ठेत् सम्भाषमाणः प्रियो हैव भवति स्मरन्ति हैवास्य ॥ ४ ॥

अथातः संयमनं प्रातर्दनमान्तरमग्निहोत्रमित्याचक्षते यावद्वै पुरुषो भाषते न तावत् प्राणितुं शक्नोति प्राणं तदा वाचि जुहोति यावद्वै पुरुषः प्राणिति

किन्तु स्मरन्ति हैव अस्मिन् ग्रामान्तरादिगते ह प्रसिद्धा राजादयोऽस्य साध्याः, अस्य स्मरन्त्येव न तु विस्मरन्ति पित्रादेरिव पुत्रादयः। अयञ्च तान् सर्वान् हन्तुकामानिवासक्तिशून्यः अस्मात् प्रचिपेत् यत्र कार्यस्य विधेयास्तु भवन्तीत्यर्थः ॥ ४ ॥

इदानीं प्राणोपासकस्याग्निहोत्रफलं विवक्षुराध्यात्मिकमग्निहोत्रमाह, अथ प्राणब्रह्मोपासनानन्तरं, अतो यस्मादग्निहोत्रफलस्येच्छावान् वाह्यमग्निहोत्रमनुष्ठातुमशक्तोऽनिच्छुर्वा अस्मात् कारणात् संयमनं सम्यग्यमनमहिंसादिकं यत्* तत् संयमनं, प्रातर्दनं प्रतर्दनेन दैवोदासिनानुष्ठितत्वेन तन्नामाङ्कितं प्रातर्दनं, आन्तरमग्निहोत्रमिति चाचक्षते आन्तरं वाह्यसाधननिरपेक्षमग्निहोत्रनामाङ्कितं कर्म इत्याचक्षते अनेन प्रकारेण कथयन्ति। चकारोऽग्निहोत्रान्तरत्वयोः प्रत्येकं मिलितयोरपि सञ्ज्ञात्वसमुच्चयार्थः। विद्वांसो यदान्तरमित्याचक्षते तदुक्तं वाक्प्राणयोरमितव्यापारकर्तृत्वमाह, यावद्यत्परिमाणं, वै प्रसिद्धं, पुरुषः पुरुषाकारशरीर-

---

* यत् सम्बन्धि तत् सांयमनमिति B. C. E.

न तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोत्येते अनन्ते अमृते आहुती जाग्रच्च स्वपंश्च सन्ततं जुहोत्यथ या अन्या आहुतयोऽन्तवत्यस्ताः कर्ममय्यो हि

धारी जन्तुः भाषते वाग्व्यापारं करोति न तावत् प्राणितुं शक्नोति वाग्व्यापारपरिमाणं प्राणव्यापारं कर्तुं न शक्नोति। अथवा वाक्प्राणयोः समकालं व्यापारं वारयति यावदित्यादिना। अस्मिन् पक्षे यावत्तावच्छब्दौ कालपरौ व्याख्येयौ। प्राणं वाग्व्यापारे सति स्वव्यापारशून्यं वाचो न्यूनव्यापारं दधिपयःसमानं, तदा तस्मिन् वाग्व्यापारकाले, वाचि व्यापारत्वेनाधिकायामग्निसमानायां जुहोति होमं करोति। वाक्समानधर्मत्वं प्राणस्य प्राणसमानधर्मत्वं वाचश्चाह यावद्वै पुरुषः प्राणिति न तावद्भाषितुं शक्नोति वाचं तदा प्राणे जुहोति स्पष्टं। सिद्धं हि वदन्न श्वसिति श्वसन्न ब्रूते चेति सर्वजनीनं। इदानीमग्निहोत्रमाह एते वाक्प्राणरूपे उक्ते, अनन्ते असङ्ख्यातव्यापाराधारे परस्पराग्नौ प्रविशन्त्यावपक्षीणे वा, अमृताहुती अन्तवद्धि म्रियते यतोऽन्तशून्ये ततोऽमृतरूपे आहुती अमृतत्वफलहेतुत्वाद्वा अमृताहुती। जाग्रच्च स्वपंश्च जाग्रति स्वप्ने च, चकारौ जाग्रत्स्वप्नयोरितरेतरयोगार्थौ। सन्ततं निरन्तरमागर्भनिर्गमनादोत्तरश्वासं अव्यवच्छिन्नं भोजनाच्छादनादिव्यवधानशून्यं, न हि वाक्श्वसनयोरन्यतरेण शून्यः कालो जीवतः, जुहोति होमं करोति होमबुद्धिं कुर्यादि-

भवन्ति *तद्ध स्मैतत् पूर्वे विद्वांसोऽग्निहोत्रं न जुहवाञ्चक्रुः॥ ५॥

उक्थं ब्रह्मेति ह स्माह शुष्कभृङ्गारस्तदृगित्युपासीत

त्यर्थः। एतदग्निहोत्रं स्तोतुमन्यं निन्दति। अथ पक्षान्तरे याः प्रसिद्धाः पयोदध्यादिद्रव्यसाध्या अन्या वाक्प्राणाहुतिभ्यां व्यतिरिक्ता आहुतयः आसेचनान्ता देवतामुद्दिश्य द्रव्यत्यागाः, अन्तवत्यः स्वरूपेण फलतोऽपि नाशवत्यः। तत्र हेतुमाह ताः वाक्प्राणाहुतिभ्यामन्यत्वेन प्रसिद्धाः, कर्ममय्यः शरीरव्यापारसाध्याः कृतकाः फलतः स्वरूपतश्च हि यस्मात् तस्मादन्तवत्यो भवन्ति स्पष्टं। अस्याग्निहोत्रस्य ज्ञाने सर्वसङ्गपरित्यागलक्षणसन्न्यासमाह एतद्ध वै पूर्वे विद्वांसः ह प्रसिद्धाः, वै स्मर्यमाणाः, पूर्वेऽतीताः, एतद्विद्वांसो वाचि अग्नौ भाषणव्यापारवत्यां प्राण आज्यं निःश्वासोच्छ्वासव्यापारशून्यो हूयते, प्राणे चाग्नौ निःश्वासोच्छ्वासव्यापारवति वागाज्यं भाषणव्यापारशून्या हूयत इत्येतत् ज्ञानवन्तः, अग्निहोत्रं न जुहवाञ्चक्रुः अग्निहोत्रहोमं न कृतवन्तः सर्वसङ्गपरित्यागलक्षणं सन्न्यासं कृतवन्त इत्यर्थः॥ ५॥

प्राणो वा उक्थमिति काण्वादिशाखासूक्थशब्दस्य प्राणे प्रसिद्धत्वात् तां प्रसिद्धिमनुरुन्धाना श्रुतिः प्राणमुक्थशब्देन निर्दिश्य तत्र ऋगादिदृष्टीर्विधातुं, अस्य ब्रह्मत्वे कौषीतकिपैङ्ग्य-

---

* एतद्ध वै पूर्वे इति टी०।

सर्वाणि हास्मै भूतानि श्रैष्ठायाभ्यर्च्यन्ते।तद्यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठाय युज्यन्ते तत्सामेत्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठाय सन्नमन्ते तच्छ्रीरित्युपासीत तद्यश इत्युपासीत तत्तेज इत्युपा-

---

वत् शुष्कभृङ्गारसम्मतिमाह, उक्थं उक्थशब्दाभिधेयः प्राणः ब्रह्मेति ह स्माह व्याख्यातं शुष्कभृङ्गारः एतन्नामा मुनिः। तत उक्थं ऋगिति ऋग्बुद्ध्या उपासीत। यावत् प्राण ऋगिति ऋगाकारो भवति तावद्विजातीयप्रत्ययशून्यं सजातीयप्रत्ययप्रवाहं कुर्वीत। प्राणे ऋग्बुद्धौ कृतायां फलमाह सर्वाणि निखिलानि ह प्रसिद्धानि अस्मै प्राणे उक्थे ऋग्बुद्धिकर्त्रे भूतानि स्थिरजङ्गमानि श्रैष्ठ्याय प्रशस्यतमत्वाय अभ्यर्च्यन्ते सर्वतः पूजां कुर्वन्ति। तद्यजुरित्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय युज्यन्ते। तत्सामेत्युपासीत सर्वाणि हास्मै भूतानि श्रैष्ठ्याय सन्नमन्ते। ऋग्बुद्ध्या समत्वं यजुःसामबुद्ध्योः। युज्यन्ते उद्युक्तानि भवन्ति, सन्नमन्ते सम्यक् प्रह्वीभूतानि भवन्ति, अन्यत् कृतव्याख्यानं। ऋग्यजुःसाम्नाञ्च पादबद्धाविवर्चितच्छन्दस्कप्रगीतमन्त्रात्मकानां प्रसिद्धत्वान्न ऋगादिपदस्य व्याख्या कृता। तच्छ्रीरित्युपासीत तद्यश इत्युपासीत तत्तेज इत्युपासीत। मनुष्यादेर्विभूतिः श्रीः, कीर्तिर्यशः, भास्वरं प्रकाशादिकारणं ज्योतिस्तेजः, व्याख्यातमन्यत्। श्रीयशस्तेजोबुद्धीनां सदृष्टान्तं फलमाह, तत्तत्र श्रीयशस्तेजोबुद्धिषु फले दृष्टान्तः,

सीत तद्यथैतच्छ्रीमत्तमं यशस्वितमं तेजस्वितममिति शस्त्रेषु भवत्येवं हैव स सर्वेषु भूतेषु श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति य एवं वेद तदेतदैष्टिकं

यथा दृष्टान्ते, एतदाकर्णपूर्णं गुणनिबद्धपृष्ठं पृथुतरसुवर्णपट्टिकावृतसर्वगात्रं पृथापुत्रसमधन्विकरस्थं वमदग्निमण्डलशरसमूहवृष्टिकरं धनुः शस्त्राणां खड्गपट्टिशतोमरशक्त्यृष्टिगदाभिन्दिपालचक्रचुरिकायमदंष्ट्रादीनां श्रीमत्तममतिशयेन विभूतिमत्, न ह्यन्यच्छस्त्रं धनुष्मतः सुभटस्य विभूतिं दधाति धन्वी चेत्तुरगारूढो जयत्येकोऽपि मेदिनीमिति प्रसिद्धेः। यशस्वितममतिशयेन यशःसम्पन्नं, विशिखा इव राजन्ते धनुषः सगुणादिव। निर्गताः शस्त्रसम्पाताः शूराणां लघुयोधिनामिति प्रसिद्धेः। तेजस्वितममतिशयेन तेजःसम्पन्नं यद्यपि लोहेषु शस्त्रेषु तेजस्वितमत्वं प्रसिद्धं तथापि सम्प्रहारावसरेऽन्यान्यपगतसौवर्णाद्यावरणानि भवन्ति, धनुस्तु तस्मिन्नप्यवसरे सुवर्णमणिरत्नादियुक्तमिति तेजस्वितमं, धन्विनश्च श्रीयशस्तेजांसि प्रसिद्धानि पार्थादेर्भवन्ति स्पष्टं। तथा एवं उ अपि धनुर्वदेव न त्वन्यथा एवं विद्वान् प्राणः श्रीयशस्तेजोबुद्धीनामालम्बनमिति जानन्, श्रीयशस्तेजोबुद्धिरूपासक इत्यर्थः। सर्वेषां भूतानां निखिलानां स्थिरजङ्गमानां मध्ये श्रीमत्तमो यशस्वितमस्तेजस्वितमो भवति स्पष्टं। इदानीं त्रयीविद्यानां कृतसंसारफलान्तर्वर्तिनामपि प्राणविज्ञानं मोक्षसाधनमित्याह

कर्ममयमात्मानमध्वर्युः संस्करोति तस्मिन् यजुर्मयं प्रवयति यजुर्मय ऋङ्मयं होता ऋङ्मये साममयमुद्गाता

तमुक्थशब्दाभिधेयं ऋगादिबुद्ध्यालम्बनं एतं मुखविलान्तर्वर्तमानं प्रत्यक्षमिव ऐष्टकं इष्टकासम्बन्धिरूपमैष्टकं कर्ममयं कर्मस्वरूपमात्मानमध्वर्युशब्दप्रत्ययालम्बनं अध्वर्युर्ऋत्विग्विशेषः प्राणबुद्ध्या संस्करोति संस्कारं करोति योषितमिवाग्निबुद्ध्या। अयमर्थः योऽयमिष्टकासु चितोऽग्निः कर्मसाधनः सोऽपि प्राणात्मक एव प्राणस्य ऋगात्मकत्वात्, अयञ्च ऋगादिसाध्यकर्मनिष्पादकः, अहञ्च तत ऋगात्मकः सर्वात्मा प्राणोऽहमस्मि अयमग्निश्च मदात्मकः इत्यात्मानं संस्करोतीति। तस्मिन् प्राणबुद्ध्या संस्कृतेऽग्न्यभिन्ने आत्मनि यजुर्मयं यजुःसाध्यं कर्मवितानं कुविन्द इव प्रवयति प्रकर्षेण कर्ममन्त्रतन्तुभिर्विस्तारयति। यजुर्मये यजुःसाध्ये कर्मविताने प्रवृत्ते सति आधारभूते वा ऋङ्मयं ऋक्साध्यं कर्मवितानं प्रवयति होता ऋत्विग्विशेषः। ऋङ्मये ऋक्साध्ये कर्मणि प्रवृत्ते सत्याधारभूते वा साममयं सामसाध्यं कर्मवितानं प्रवयति उद्गाता ऋत्विग्विशेषः। स अध्वर्युः संस्कारहेतुः प्राणः, एष मुखविलान्तःस्थः सर्वस्यै सर्वस्या निखिलायास्त्रयीविद्यायाः त्रयी ऋग्यजुःसामरूपा या सैव विद्या तस्या आत्मा आप्त्यादेः कर्ता शरीरस्येव जीवः। उक्तेन प्रकारेण उक्तमाख्यानं श्रुतिग्राह्विकयाह एष उ एव अपि मुखविलान्तःस्थ एव न त्वन्यः, अस्यात्मा अस्या

स एष *त्रय्यै विद्यायाः आत्मैष उ एवैतदिन्द्रस्यात्मा† भवति य एवं वेद ॥ ६ ॥

अथातः सर्वजितः कौषीतकेस्त्रीण्युपासनानि भवन्ति सर्वजिद्ध स्म कौषीतकिरुद्यन्तमादित्यमुपतिष्ठते

आत्मा उक्तायास्तय्या आत्मा उक्तः। इदानीमेतज्ज्ञाने फलमाह एतदात्मा भवति प्राणरूपो भवति यः प्रसिद्धः कर्मणि ऋत्विग्यजमानादिः एवं प्राणबुद्ध्या संस्तुते अध्वर्युरूपाग्नौ यजुर्मयमध्वर्युर्यजुर्मय ऋङ्मयं होता ऋङ्मये साममयमुद्गातेति वेद जानाति एतदात्मा भवतीत्यन्वयः ॥ ६ ॥

प्राणो ब्रह्मेति कौषीतकिपैङ्ग्यशुष्कभृङ्गारमतैः सोपपत्तिकैरुक्तं, तत्र च ऋगादिदृष्टयः। स हि प्राणो वाह्य आध्यात्मिकश्च। वाह्य आधिदैविकः पुत्रादिरूपश्च आधिदैविकस्त्वादित्यः स चाग्नीषोमात्मकः। तत्राधिदैविकं प्राणमुररीकृत्य फलविशेषसिद्ध्यर्थं प्रथमतः कानिचिदुपासनान्याह, अथ प्राणो ब्रह्मेति कथनानन्तरमतो यस्मात् फलान्तरस्यापोच्छोपासकस्य अस्मात् कारणात् सर्वजितः स्ववर्णाश्रमाचारैर्निखिलांस्त्रैवर्णिकान् जयतीति सर्वजित् तस्य कौषीतकेः कुषीतकस्यापत्यस्य त्रीणि त्रिसङ्ख्याकानि उपासनानि आधिदैविकस्य प्राणस्य ज्ञानानि भवन्ति वर्तन्ते। कौषीतकिदृष्टानि कथयिष्यामीत्यर्थः। यज्ञो-

---

* सर्वस्यै त्रय्यै इति टी०।

† एष उ एवास्यात्मा एतदात्मेति टी०।

यज्ञोपवीतं कृत्वोदकमानीय त्रिः प्रसिच्योदपात्रं वर्गो ऽसि पाप्मानं मे वृङ्धीत्येतयैवावृता मध्ये सन्तमुद्वर्गो ऽसि पाप्मानं म उद्वृङ्धीत्येतयैवावृतास्तं यन्तं संवर्गो ऽसि पाप्मानं मे संवृङ्धीति तद्यदहोरात्राभ्यां पापम-

---

पवीतं कृत्वा यज्ञोपवीतं विधाय, यद्यपि त्रैवर्णिकत्वेनैव यज्ञोपवीतं प्राप्तं तथाप्यपमृत्य्वादिविकारनिवारणार्थमिदं वचनं। अप आचम्य स्पृष्ट्वा, अपामाचमनमपि यज्ञोपवीतवत्प्राप्तं तथापि त्वरादिनिमित्तनिवारणार्थमवगन्तव्यं तेनोभयत्र नियमः सिद्धो भवति। त्रिस्त्रिवारमुदपात्रं सौवर्णं राजतं ताम्रं वा चषकं प्रसिच्य शुद्धैः स्वच्छैर्जलैः प्रकर्षेण सेचनं विधाय उद्यन्तं उदयं गच्छन्तमादित्यं अदितिपुत्रं भास्करं उपतिष्ठेत जानुभ्यामवनिं गत्वा ससम्भारनीरपूर्णचषकमुद्धृत्य समन्त्रमुपस्थानं कुर्यात्। मन्त्रमाह वर्गः सर्वमिदं जगत् आत्मबाधेन तृणवद्वृङ्क्ते परित्यजतीति वर्गः, असि भवसि, पाप्मानं कृतमागामि च पापं फलस्वरूपेणैव मे मम समन्त्रकेणार्घेणादित्यमुपस्थातुः वृङ्धि वर्जय विनाशयेत्यर्थः, इति मन्त्रसमाप्तौ। एतयैव उक्तयैव यज्ञोपवीतमित्यादिना न त्वन्यथा आवृता प्रकारेण मध्ये सन्तं मध्याह्ने वर्तमानमादित्यमुपतिष्ठेत। उपस्थानमन्त्रमाह उद्वर्गोऽसि पाप्मानं म उद्वृङ्धीति उदुत्कर्षार्थः अतिशयेन नाशयेत्यर्थः, व्याख्यातमन्यत्। एतयैवावृतास्तं यन्तं संवर्गोऽसि पाप्मानं मे संवृङ्धीत्यस्तं यन्तमस्तं गच्छ-

करोत् सं तद्वङ्क्ते तथो एवैवं विद्वानेतयैवावृतादित्य-मुपतिष्ठते यदहोरात्राभ्यां पापं करोति सं तद्वङ्क्ते॥ ॥ ७ ॥

अथ मासि मास्यमावास्यायां वृत्तायां पश्चाच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवावृता हरिततृणे वा* प्रत्य-

---

न्तमुपतिष्ठेत समित्यादिमन्त्रेण, सं सम्यगर्थः। व्याख्यातमन्यत्। एवं त्रिवारमादित्यस्यार्घं कुर्वतः फलमाह यत्प्रसिद्धं दृष्टफलमहोरात्राभ्यां अहनि रात्रौ च पापं करोति स्पष्टं, सं तद्वङ्क्ते तदशास्त्रीयं कर्म फलतः संवृङ्क्ते सम्यक् परित्यजति पापफलं न प्राप्नोतीत्यर्थः। एकमिदमुपासनं कर्मात्मकं ॥ ७ ॥

इदानीं द्वितीयमाह, अथ पूर्वस्मात् कर्मरूपादुपासनात् प्रकृतादर्थादग्निरूपादादित्यादनन्तरं कर्मरूपमुपासनान्तरमादित्यस्य वाह्यप्राणस्य सुषुम्णानाडीरूपसोमात्मकं मासि मासि प्रतिमासमभ्यासबलादासंवत्सरमिति निश्चीयते, अमावास्यायां अमाख्यरश्मौ सोमस्य निवासदिवसे पश्चाच्चन्द्रमसमादित्यस्य पश्चिमभागे सुषुम्णाख्ये रश्मौ वर्तमानं सोमं दृश्यमानं शास्त्रतोऽवलोक्यमानमुपतिष्ठेत वर्गाद्वर्गसंवर्गमन्त्रैः उदये मध्याह्ने अस्तमये च उपस्थानं कुर्यात्, एतयैव यज्ञोपवीतमित्यादिकयैव न त्वन्यया आवृता प्रकारेण। अमावास्यायां

---

* वाख्याने याचमिति टी०।

स्यति यन्मे सुसीमं हृदयं दिवि चन्द्रमसि श्रितं मन्ये ऽहं मां तद्विद्वांसं माहं पौत्रमघं रुदमिति न ह्यस्मात्

कृत्तायामिति पाठे द्वितीयायां चन्द्रोदये इति व्याख्यानं। तत्र विशेषमाह हरिततृणाभ्यामशुष्काभ्यां दूर्वाङ्कुराभ्यां सह अर्घानन्तरं वाचं यत्त इत्यादिमन्त्ररूपां प्रत्यस्यति चन्द्रमसं प्रति अस्यति क्षिपति क्षिपेदित्यर्थः। वाचं मन्त्ररूपामाह यत् प्रसिद्धं योषितां स्तनमण्डलाधारं ते तव सोमात्मिकायाः प्रकृतेः सुसीमं शोभनमर्यादावत् आदित्यात्मकपुरुषस्यैकदेशरूपं हृदयं पद्माकारं पञ्चच्छिद्रमधोमुखं मांसखण्डं हृत् तदयति गच्छति यदानन्दात्मस्वरूपं तत् हृदयं अधिचन्द्रमसि श्रितं चन्द्रमण्डलं स्तनाकारमधिकृत्य श्रितं वर्तमानं। तेन उक्तेन चन्द्रमण्डलसंस्थेन हृदयेन हेतुना अमृतत्वस्यानन्दरतिप्रजातिरूपस्य निरतिशयानन्दाभिव्यक्तिहेतुत्वेन च निरपेक्षस्य मोक्षस्य ईशाने हे नियन्त्रि माहं पौत्रमघं रुदं, अहं सोमात्मिका स्त्री अग्न्यात्मकः पुमानिति ज्ञातवान् अघं पापं निरूपमदुःखकरं पुत्रसम्बन्धि पुत्रस्य प्राक्-प्रध्वंसाभावाभ्यां शारीरव्याध्यादिना मन्तत्याद्यभावेन च कृतं पौत्रं मा रुदं रोदनं मा कुर्यां तवेशानायाः प्रसादत इति शेषः। इति मन्त्रपरिसमाप्त्यर्थः। मन्त्रे पाठान्तरं यन्मे सुसीमं हृदयं दिवि चन्द्रमसि श्रितं मन्येऽहं मां तद्विद्वांसं माहं पुत्र्यमघं रुदमिति। तदाहं मां तस्य चन्द्रमसो विद्वांसं मन्य इत्यन्वयः।

पूर्वाः प्रजाः प्रैतीति नु जातपुत्रस्याथाजातपुत्रस्या-
प्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा यमा-
दित्या अंशुमाप्याययन्तीत्येतास्तिस्र ऋचो जपित्वा

न ह्यास्मात्पूर्वाः प्रजाः प्रैतीति। अस्मादुक्तप्रकारिणो ह प्रसि-
द्धात् उपासकात् पूर्वाः प्रथमत एतन्मरणमन्तरेणेत्यर्थः, प्रजाः
पुत्रादिरूपा न प्रैति न प्रयन्ति न म्रियन्ते, इति नु एवं खलु अयं
प्रकार इत्यर्थः, जातपुत्रस्य उत्पन्नसुतस्य न त्वनुत्पन्नसुतस्य।
अथ जातपुत्रस्य उपासनकथनानन्तरं अजातपुत्रस्य अनुत्पन्नतन-
यस्योपासनप्रकारः कथ्यत इति शेषः। अजातपुत्रो जातपुत्रवत्
सर्वतन्त्रं समाप्य हरितदृणे स्थीकृत्य यान्मन्त्रान् जपेत् तानाह,
आप्यायस्व आप्यायनं गच्छ, समेतु सम्यक् गच्छतु, ते तव त्वयी-
त्यर्थः, अयमृक्पादः श्रुत्या प्रतीकत्वेन पठितः। एतावृक्पादौ
परिशिष्टौ, विश्वतः सोम वृष्ण्यं भवा वाजस्य सङ्गथे। विश्वतः
सर्वतोऽग्निरूपात्पुरुषगात्रात् हे सोम स्त्रीरूप वृष्ण्यं वृष्णः पुरु-
षस्य हेतुभूतं शुक्रमाग्नेयं तेजः वाजस्यान्नस्य सङ्गथे भवा सङ्गते
भव। अयमर्थः, पुत्रोत्पत्तिद्वारा पितृणां पिण्डाद्यन्नदो भवेति।
प्रजासम्पत्त्या त्वदीयं वृष्ण्यमाप्यायनं विश्वतः समेतु, मह्यं विश्वतो
वाजस्य सङ्गमाय भवेति वार्थः। इदानीं मन्त्रान्तरप्रतीकभूतं
पादान्तरमाह सं ते पयांसि समु यन्तु वाजा इति। ते तव सोमा-
त्मिकायाः प्रकृतेः सं पयांसि सम्यक् चीराणि स्तनेन्दुमेघमण्ड-
लस्थानि समु यन्तु वाजाः उ अपि वाजाः वाजिनोऽन्नोपजीविन-

मास्माकं प्राणेन प्रजया पशुभिराप्यायिषाः योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तस्य प्राणेन प्रजया पशु-

---

स्त्रनयान् संयन्तु सम्यग्गच्छन्तु। इदमपि पठितं श्रुत्वा, शिष्टं पादत्रयं, संवृष्ण्यान्यभिमातिषाहः। आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व। संवृष्ण्यानि सम्यक् पुरुषोपकारीणि, अभिमातिषाहः वैरिसाहः। पुत्रप्रवृद्ध्या चोराणि वैरिणामभिभवकारीणीत्यर्थः। हे सोम अमृताय अमृतत्वाय पुत्रोत्पत्त्यर्थमित्यर्थः, आप्यायमानः स्वेनाग्नेयेन च तेजसा आप्यायनं आह्लादनं गच्छन् दिवि स्वर्गे अवांस्युत्तमानि श्रवणयोग्यानि पयांसि प्रौढानि धिष्व धत्स्व। तृतीयमन्त्रस्य प्रतीकं पादमाह, यं तृतीयं प्रसिद्धं सर्वोत्पत्तिकारणमादित्या अग्न्यात्मकाः पुमांसः अंशुं सूर्यस्य सोषुम्णं किरणं सोमं स्वरूपं आप्याययन्ति आह्लादयन्ति। मन्त्रस्यापठितं श्रुत्वा पादत्रयं। यमक्षितमक्षितयः पिबन्ति। तेन नो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः। यं सोमं राजानं प्रकृतिरूपं सूर्यं सुषुम्णानाडीरूपेण अक्षितमक्षीणं अक्षितयः क्षयशून्या आदित्यादयः पुरुषाः पतिपुत्रत्वादिना वर्तमानाः पिबन्ति लावण्यदुग्धादिरूपेण पानं कुर्वन्ति, तेनांशुनाऽक्षितरूपेण सुषुम्णानाम्नेत्यर्थः। नोऽस्मान् सोमस्योपासकान् भुवनस्य गोपा लोकस्य रक्षकः प्रजापतिः बृहस्पतिर्वरुणो राजा चाप्याययन्तु आनन्द-

भिराप्याययस्वेत्यैन्द्रीमावृतमावर्त आदित्यस्यावृतम-न्वावर्त इति दक्षिणं बाहुमन्वावर्तते ॥ ८ ॥

यन्तु, इति मन्त्रत्रयप्रतीकपादत्रयपरिसमाप्त्यर्थः। एता उक्तपा-दत्रयाद्यास्तिस्रः त्रिसङ्ख्याका ऋचः पादवद्धान् मन्त्रान् जपित्वा वाचनिकं जपं विधाय अनेन वक्ष्यमाणेन मन्त्रेण सोमाभिमुखं दक्षिणं हस्तं निःसारयेदित्याह मास्माकं प्राणेन प्रजया पशुभि-राप्याययिष्ठाः अस्माकं सोमोपासकानां मुखविलान्तःसञ्चारिणा वायुना प्राणेन पुत्रादिरूपया प्रजया गवादिरूपैः पशुभिः अ-स्मत्प्राणप्रजापश्वभावेनेत्यर्थः, माप्याययिष्ठाः अस्मच्छत्रूनानन्दं मा नयेथाः, किन्तु यः प्रसिद्धोऽस्मद्द्वेषी अस्मान्सोमोपासकान् द्वेष्टि द्वेषं करोति, यञ्च कृतापकारमकृतापकारं वा प्रसिद्धं प्रति-कूलं, चकारोऽस्मासु द्वेषिणः अस्य च समुच्चयार्थः, वयं सोमोपा-सका द्विष्मो द्वेषं कुर्मः, तस्य अस्माभिरज्ञातस्य च वैरिणः प्राणेन प्रजया पशुभिर्व्याख्यातं। आप्यायस्व अस्मानानन्दयेति। एव-मेतन्मन्त्रार्थरूपां दैवीं देवेन भवता सम्पाद्यामावृतं सञ्चरण-क्रियां आवर्ते समन्ताद्वर्तनं कुर्वे, आदित्यस्य अग्नीषोमात्मकस्य आवृतं सञ्चरणक्रियामन्वावर्ते भवतः सोमस्य प्रसादमनु आ-वर्तनं कुर्वे। इति मन्त्रपरिसमाप्त्यर्थः, एतैर्मन्त्रैरित्यर्थः। दक्षिणं बाहुं दक्षिणभुजं पूर्वं सोमाभिमुखं नीतं अन्वावर्तते मन्त्र-पाठमनु निःसारयति ॥ ८ ॥

अथ पौर्णमास्यां पुरस्ताच्चन्द्रमसं दृश्यमानमुपतिष्ठेतैतयैवावृता सोमो राजासि विचक्षणः पञ्चमुखोऽसि प्रजापतिर्ब्राह्मणस्त एकं मुखं तेन मुखेन राज्ञोऽत्सि तेन मुखेन मामन्नादं कुरु राजा त एकं मुखं तेन मुखेन विशोऽत्सि तेन मुखेन मामन्नादं कुरु श्येनस्त एकं मुखं तेन मुखेन पक्षिणोऽत्सि तेन मुखेन

उपासनद्वयमुक्त्वा तृतीयमुपासनं पुनः सोमस्याह, अथ अमावास्योपासनात्प्रकृतादुपासनान्तरं कथ्यत इति शेषः। पौर्णमास्यां पञ्चदश्यां षोडशकलचन्द्रसहितायां पुरस्ताच्चन्द्रमसं दृश्यमानं स्वस्याभिमुखे न प्रत्यहं षोडशकलं सोममुपतिष्ठेतैतयैवावृता पूर्ववद्व्याख्येयं। उपस्थानमन्त्रमाह सोम उमया विश्वप्रकृत्या सह वर्तमानः प्रियदर्शनः सोमो वा, राजा दीप्तिमानसि भवसि, विचक्षणः सर्वलौकिकवैदिककार्यकुशलः, पञ्चमुखः पञ्चवदनोऽसि भवसि, प्रजापतिः प्रजानां स्थिरजङ्गमानां पालयिता। पञ्चापि मुखानि विभागेन प्रार्थयते, ब्राह्मणो द्विजोत्तमः ते तव सोमस्य एकं मुखं एकं वदनं, तेन मुखेन उक्तेन वदनेन राज्ञः राजजातीयान् क्षत्रियानत्सि भक्षयसि, तेन मुखेन उक्तेन वदनेन मां सोमोपासकमन्नादं कुरु स्पष्टं। राजा त एकं मुखं, तेन मुखेन विशोऽत्सि तेन मुखेन मामन्नादं कुरु। श्येनस्त एकं मुखं, तेन मुखेन पक्षिणोऽत्सि तेन मुखेन

मामन्नादं कुर्वग्निष्ट एकं मुखं तेनेमं लोकमत्सि तेन मुखेन मामन्नादं कुरु त्वयि पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु मास्माकं प्राणेन प्रजया पशुभिरपक्षेष्ठा योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरपक्षीय-

---

मामन्नादं कुरु। अग्निष्ट एकं मुखं तेन मुखेनेमं लोकमत्सि तेन मुखेन मामन्नादं कुरु। त्वयि पञ्चमं मुखं तेन मुखेन सर्वाणि भूतान्यत्सि तेन मुखेन मामन्नादं कुरु। राजा मूर्द्धाभिषिक्तः क्षत्रियः। विशो वैश्यप्रधानाः प्रजाः। श्येनः पक्षिमांसाशी क्रूरः पक्षी। पक्षिणः कपोतादीन् विहङ्गमान्। अग्निः प्रसिद्धो दाहपाकप्रकाशनहेतुः कृशानुः। इमं लोकं प्रत्यक्षादिप्रमाणगम्यं अवाप्याकाशं विश्वं। त्वयि सोमे राजनि पञ्चमं ब्राह्मणराजश्येनाग्न्यपेक्षया पञ्चसङ्ख्यापूरणं। सर्वाणि भूतानि निखिलानि स्थिरजङ्गमानि। शेषं ब्राह्मणपर्यायवद्राजश्येनाग्निसोमपर्यायेषु व्याख्येयं। मास्माकं प्राणेन प्रजया पशुभिरवक्षेष्ठाः योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तस्य प्राणेन प्रजया पशुभिरवक्षीयस्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते, अवक्षेष्ठा अस्मद्बन्धूनामवक्षयं मा कार्षीः, अवक्षीयस्व अस्मद्वैरिबन्धूनवक्षयं नय, अन्यत्पूर्ववद्व्याख्येयं। अथवाप्यायमावक्षयौ भाविशुक्लकृष्णपक्षापे-

स्वेति दैवीमावृतमावर्त आदित्यस्यावृतमन्वावर्त इति दक्षिणं बाहुमन्वावर्तते ॥ ९ ॥

अथ संवेश्यन् जायायै हृदयमभिमृशेत् यत्ते सुसीमे हृदये श्रितमन्तः प्रजापतौ तेनामृतत्वस्येशाने मा त्वं पुत्र्यमघं निगा इति न ह्यस्याः पूर्वाः प्रजाः प्रैतीति॥१०॥

त्वया चन्द्रनिष्ठौ व्याख्येयौ। तथा चैकेनैव पत्नेण स्वात्मनो वृद्धिर्वैरिणो नाशश्चेति फलप्राप्तिरर्थादुक्ता भवति ॥ ९ ॥

अथ एवं सोमप्रार्थनानन्तरं संवेश्यन् भार्यया सह सम्यगानन्दरतिप्रजात्यर्थं वेश्यन् उपवेशनं करिष्यन् जायायै जायाया हृदयं स्तनमण्डलाधारदेशमभिमृशेद्वक्ष्यमाणेन मन्त्रेण सर्वतः स्पृशेत्। मन्त्रमाह यत्प्रसिद्धं शरीरान्तरकारणं सुखं ते तव सोमरूपायाः स्त्रियाः सुसीमे हे शोभनगात्रे हे सुसीमन्विति वा, अथवा सप्तम्यन्तमिदं हृदयविशेषणं शोभना सीमा पुरुषस्य केदाररूपा यस्य तत् सुसीमं, तस्मिन् हृदये हृदयपुण्डरीकाख्ये आनन्दात्मनिवासे श्रितं निहितं चन्द्रमण्डल इवामृतं अन्तर्मध्ये प्रजापतौ प्रजापालके अथवा प्रजापतौ प्रजापतिना स्रष्टा मयेत्यर्थः। मन्येऽहं मां तद्विद्वांसं अहं सोमोपासकस्तव पतिस्तदुक्तं प्रजापतिना निहितं मां सोमोपासकं विद्वांसं समस्तशास्त्रार्थविदं मन्येऽवगच्छामि, तेन सत्येन माहं पौत्रमघं रुदमिति। तेनामृतत्वस्येशाने मा त्वं पुत्र्यमघं निगा इति पाठो वा। न ह्यस्मात्पूर्वाः प्रजाः प्रैतीति व्याख्यातं ॥ १० ॥

अथ प्रोष्यायन् पुत्रस्य मूर्धानमभिजिघ्रेत्* । अङ्गा-दङ्गात्सम्भवसि हृदयादधिजायसे। आत्मा वै पुत्र ना-मासि स जीव शरदः शतमिति नामास्य दधात्यश्मा भव परशुर्भव हिरण्यमस्तृतं भव तेजो† वै पुत्र नामासि स जीव शरदः शतमिति नामास्य गृह्णात्यथैनं परिगृ-

इदानीं सपुत्रस्य सामोपासकस्य पुनः कृत्यान्तरमाह, अथ सोमोपासनानन्तरं प्रोष्य ग्रामान्तरं देशान्तरं वा गत्वा आयन् आगच्छन् आगतः सन्नित्यर्थः, पुत्रस्य पितुर्दुःखनिवारकस्य वा-ल्यस्य प्राणस्य मूर्धानं मस्तकमभिम्टशेत् करेण संस्पृशेत्। संस्पर्श-मन्त्रमाह अङ्गादङ्गात् गात्रात् गात्रात् शिरःपाण्यादिभ्यः सर्वे-भ्यो गात्रेभ्य इत्यर्थः सम्भवसि निर्गच्छसि हृदयादधिजायसे सर्वेभ्यो गात्रेभ्यो निर्गतो हृदयादधिकं प्रकटीभवसि आत्मा मत्स्वरूपः, पुत्र हे पुत्र त्वं पुन्नाम्नो निरयात् मा मामावित्य मम रक्षणं कृतवान्, स मम रक्षकः जीव प्राणान् धारय शरदः शतं शतं संवत्सरान् असौ एतन्नामा इत्यनेन मन्त्रेणास्य नाम गृह्णाति अस्य पुत्रस्य नामग्रहणं करोति पिता। नामग्रहणे पुनर्मन्त्रान्तरमाह, अश्मा भव पाषाणो भव। रोगैरनुपद्रुतः वज्रसारशरीरो भवेत्यर्थः, परशुर्भव कुठारवद्वैरिच्छेदकरो भव हिरण्मयमस्तृतं भव अस्तृतमास्तृतं सर्वतः परिस्तृतं कनक-वत्सर्वप्रजाप्रियो भव, तेजो वै पुत्र नामासि वै प्रसिद्धं सर्व-

* अभिम्टशेदिति टी०। † वेदो वा इति A.

I

ह्णाति येन प्रजापतिः प्रजाः पर्यगृह्णात्तदरिष्ट्यै तेन त्वा परिगृह्णाम्यसावित्यथास्य दक्षिणे कर्णे जपत्यस्मे प्रयन्धि मघवन्नृजीषिन्नितीन्द्र श्रेष्ठानि द्रविणानि धेहीति सव्ये मा छेत्था मा व्यथिष्ठाः* शतं शरद आयुषो जीवस्व पुत्र ते नाम्ना मूर्धानमभिजिघ्रामीति त्रिरस्य

गात्रसारभूतं यत्तेजः संसारवृक्षबीजं तन्नामा त्वं भवसि। हे पुत्र स जीव शरदः शतमसाविति नामास्य गृह्णाति व्याख्यातं। तृतीयनामग्रहणे तृतीयं मन्त्रमाह येन प्रसिद्धेन स्वयंप्रकाशेन तेजसा प्रजापतिः प्रजानां पालको धाता प्रजाः स्वसन्तानभूताः स्थिरजङ्गमाख्याः पर्यगृह्णात् सर्वतः स्वीकृतवान् अरिष्ट्यै प्रजानामविनाशनार्थं तेन प्रजापतिप्रजाग्रहणेन तेजसा त्वा त्वां पुत्रं परिगृह्णामि सर्वतः स्वीकरोमि। असाविति नामास्य गृह्णाति व्याख्यातं, अथास्य दक्षिणे कर्णे पिता जपति। अस्मे प्रयन्धि मघवन्नृजीषिन्निति, इन्द्र श्रेष्ठानि द्रविणानि धेहीति पुत्रस्य सव्ये कर्णे पिता जपति। इदानीं मूर्ध्न आघ्राणे मन्त्रमाह मा छेत्थाः मत्सन्ततेश्छेदं मा कार्षीः, मा व्यथिष्ठाः शरीरेन्द्रियमनोभिर्व्यथां मा गाः। शतं शरद आयुषो जीवस्व शरदः शतमायुषो जीव शतं संवत्सरान् जीवेत्यर्थः। पुत्र हे पुत्र ते नाम्ना तव पुत्रस्याभिधानेन देवदत्तादिलक्षणेन मूर्धानं मस्तकमवजिघ्रामि आघ्राणं करोमि असावेतन्नामाहं तव पिता,

* मा भेत्था मा व्यतिष्ठा इति A.

मूर्धानमभिजिघ्रेत् गवां त्वा हिङ्कारेणाभिहिङ्करोमी-
ति त्रिरस्य मूर्धानमभिहिङ्कुर्यात्॥ ११॥

अथातो दैवः परिमर एतद्वै ब्रह्म दीप्यते यदग्नि-
र्ज्वलत्यथैतन्म्रियते यन्न ज्वलति तस्यादित्यमेव तेजो

इत्यनेन मन्त्रेण त्रिः त्रिवारं मूर्धानमवजिघ्रेत् मूर्ध्न आघ्राणं कुर्यात्। इदानीं हिङ्कारमन्त्रमाह गवां कामधेन्वादीनां सवत्सानां घटोध्नीनां त्वा त्वां पुत्रं हिङ्कारेण वत्साकारणार्थं गोभिः क्रियमाणः स्वरो हिङ्कारः तेनाऽभिहिङ्करोमि सर्वतो हिङ्कारेणाकारयामि, इत्यनेन मन्त्रेण त्रिः त्रिवारं मूर्धानमभिहिङ्कुर्यात् सर्वतो मूर्ध्नि हिमिति शब्दं कुर्यात्॥ ११॥

एवं कौषीतकेस्त्रीण्युपासनान्युक्त्वा प्रकृतं प्राणस्य ब्रह्मत्वं संवर्गविद्यारूपेणान्तर्हितं विवक्षुः फलान्तराय नामान्तरमाह, अथ प्राणस्य ब्रह्मत्वकथनानन्तरं, अतः यस्मात् स्ववैरिणो मरणस्येच्छा अस्मात् कारणात्, दैवः देवानां वागादीनां सम्बन्धी दैवः, परिमरः प्राणं परितो म्रियन्ते अग्न्याद्या वागाद्याश्चेति प्राणो ब्रह्मरूपः परिमरः कथ्यत इति शेषः। एतत्प्रत्यक्षं वै प्रसिद्धं ब्रह्म प्राणोपाधिकं सत्यज्ञानादिरूपं दीप्यते प्रकाश्यते, यद्यदाऽग्निर्दाहपाकप्रकाशहेतुः कृशानुर्ज्वलति दीप्तिमान् भवति, अथ तदा एतदुक्तं ब्रह्म म्रियते प्राणं मुञ्चति यन्न ज्वलति यदाग्निर्दीप्तिमान्न भवति, तस्य दीप्तिशून्यस्याग्नेः आदित्यमेव भास्करमेव न त्वन्यं तेजो गच्छति दीप्तिः प्राप्नोति,

गच्छति वायुं प्राण एतद्वै ब्रह्म दीप्यते यदादित्यो दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य चन्द्रमसमेव तेजो गच्छति वायुं प्राण एतद्वै ब्रह्म दीप्यते यच्चन्द्रमा दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य विद्युतमेव तेजो गच्छति वायुं प्राण एतद्वै ब्रह्म दीप्यते यद्विद्युद्विद्योततेऽथैतन्म्रियते यन्न विद्योतते *तस्या दिश एव तेजो गच्छति वायुं प्राणस्ता वा एताः सर्वा देवता

वायुमाधिदैविकं प्राणं प्राणः प्रकर्षेण चेष्टाहेतुर्वातो गच्छति। एतद्वै ब्रह्म दीप्यते यत् पूर्ववद्व्याख्येयं। आदित्यो दृश्यते भास्करो नयनपथमागच्छति अथैतन्म्रियते यत् पूर्ववद्व्याख्येयं, न दृश्यते नयनाभ्यां न निरीच्यते, तस्यादृष्टस्यादित्यस्य चन्द्रमसमेव सोममेव न त्वन्यं तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यच्चन्द्रमाः दृश्यतेऽथैतन्म्रियते यन्न दृश्यते तस्य विद्युतमेव तेजो गच्छति वायुं प्राणः। एतद्वै ब्रह्म दीप्यते यच्चन्द्रमाः सोमः तस्य चन्द्रमसो विद्युतमेव सौदामिनीमेव न त्वन्यं। अन्यत् पूर्ववद्व्याख्येयं। विद्युत् सौदामिनी विद्योतते विद्योतनं कुरुते दृश्यते इत्यर्थः। अथैतन्म्रियते यन्न विद्योतते तस्य वायुमेव तेजो गच्छति वायुं प्राणः, न विद्योतते न दृश्यते, तस्य विद्युद्रूपस्य तेजःप्राणौ वायुमेवाधिगच्छतः। अन्यत् पूर्ववद्व्याख्येयं। ता उक्ता वै प्रसिद्धा एता अग्न्यादित्यचन्द्रमोविद्युद्रूपाः सर्वा

---

* तस्य वायुमेव तेज इति टी०।

वायुमेव प्रविश्य वायौ *मृत्वा न मृच्छन्ते तस्मादेव पुनरुदीरत इत्यधिदैवतमथाध्यात्मं ॥ १२ ॥

एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षुरेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न पश्य-

---

निखिला देवताः देवताशब्दाभिधेयाः वायुमेव वातं प्राणमेव न त्वन्यं प्रविश्य प्रवेशं कृत्वा, वायावाधिदैविके प्राणे मृता अस्तं गता न मृच्छन्ते न विनश्यन्ति वायुतादात्म्येन, तस्मादेव उ अपि तत एव वायोर्न त्वन्यस्मात् पुनरुदीरते भूय उदयमागच्छन्ति, इत्यनेन प्रकारेणाधिदैवतं देवता अधिकृत्योक्तं अधिदैवतं॥१२॥

अथाधिदैवतकथनानन्तरं अध्यात्ममात्मानमधिकृत्योक्तम-ध्यात्मं। एतद्वै ब्रह्म दीप्यते यद्वाचा वदत्यथैतन्म्रियते यन्न वदति तस्य चक्षुरेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्चक्षुषा पश्यत्यथैतन्म्रियते यन्न पश्यति तस्य श्रोत्र-मेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोत्यथैतन्म्रियते यन्न शृणोति तस्य मन एव तेजो गच्छ-ति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैतन्म्रि-यते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छति प्राणं प्राणस्ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे मृता न मृच्छ-

---

* मृत्वान्नमृच्छन्त इति A. मृतान्नमृच्छन्त इति D. मृता न मृच्छन्त इति टी०। किन्तु मृता इति स्थाने स्तृता इति क्वचित् पाठान्तरः। पश्चात् त्रयोदशतमे खण्डे मृत्वा न मृच्छन्त इति A. D. अतस्तदेवात्र मुद्राङ्कितं।

ति तस्य श्रोत्रमेव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यच्छ्रोत्रेण शृणोत्यथैतन्म्रियते यन्न शृणोति तस्य मन एव तेजो गच्छति प्राणं प्राण एतद्वै ब्रह्म दीप्यते यन्मनसा ध्यायत्यथैतन्म्रियते यन्न ध्यायति तस्य प्राणमेव तेजो गच्छति प्राणं प्राणस्ता वा एताः सर्वा देवताः प्राणमेव प्रविश्य प्राणे मृत्वा न

न्ते तस्मादेव पुनरुदीरते वाचा चक्षुषा श्रोत्रेण मनसा चेन्द्रियेण वदनमवलोकनं श्रवणं ध्यानञ्च यथाक्रमेण कुरुते चेद्दीपनं, न चेन्मरणं। अग्नेर्वागादित्यस्य चक्षुश्चन्द्रमसः श्रोत्रं विद्युतो मनो वायोः प्राण इत्यत्र विशेषः। अन्यत् पूर्ववद्व्याख्येयं। दैव-परिमरज्ञानस्य फलमाह, तत् तस्मिन् दैवे परिमरे ज्ञाते यदि पक्षान्तरे असम्भावितमिदं अथ कथञ्चिद्दैवाद् भवेत्, ह प्रसिद्धाः, वै स्मर्यमाणा एवं विद्वांसः उक्तेन प्रकारेण दैव-परिमरज्ञानवन्तः, उभौ द्वौ पर्वतौ गिरी अभिप्रवर्तयातां अभिप्रवर्तयेरन् सर्वतः प्रवृत्तिं द्वन्द्वयुद्धैरिवोत्पतनाधोभूमि-प्रवेशादिकं कारयेयुः। तौ च किं पर्वतावल्पाविकदेशस्थौ, नेत्याह, *तुस्तूर्षमाणौ दक्षिणश्च उत्तरश्च आस्तरणं कुर्वाणौ दक्षिण एकस्मादृशश्चोत्तरः,चकारौ दक्षिणोत्तरयोस्तुस्तूर्षमाण-पदसम्बन्धार्थौ। अयमर्थः। उत्तरपूर्वादिदेशस्थ एकः अपरश्च भारतखण्डादिस्थः उभावपि भास्करगतिनिरोधकौ पृथिवीं

* तुतूर्षमानाविति पाठान्तरः।

मृच्छन्ते तस्मादेव पुनरुदीरते तद्यदि ह वा एवं विद्वां-समुभौ पर्वतावभिप्रवर्तेयातां दक्षिणश्चोत्तरश्च तुस्तूर्षमाणौ न हैनं स्तृण्वीयातामथ य एनं द्विषन्ति यांश्च स्वयं द्वेष्टि त एवैनं परिम्रियन्ते ॥ १३ ॥

अथातो निःश्रेयसादानमेता ह वै देवता अहं-

पादपीडनेन पातालं नयन्तौ विश्वावकाशं स्वदेहेन व्यवस्यन्ताविति न हैनं स्तृण्वीयातां एनं एतान् विदुषः ह प्रसिद्धं नैव स्तृण्वीयातां नैव हन्यातां नैव हिंस्यातां अतिक्रमणं नैव कुर्वीयातां यदक्रमेभिस्तदेव कुर्यातामित्यर्थः। अथैवं सकलदैवपरिमरज्ञानानन्तरं ये दैवपरिमरज्ञानशून्या गतभाग्या एनं दैवपरिमरज्ञानवन्तं द्विषन्ति असहिष्णवोऽपकारान् कुर्वन्तो न बहु मन्यन्ते। यांश्च प्रसिद्धान् गतभाग्यान्, चकारः पूर्वेषामपि समुच्चयार्थः, स्वयं दैवपरिमरज्ञानवान् द्वेष्टि न सहते कुतश्चिदभाग्ययोगात्त एनं सर्वे परिम्रियन्ते, एनं दैवपरिमरज्ञानवन्तं ते एतस्मिन् द्वेषिण एतस्य द्वेष्याश्च सर्वे निखिलाः सपुत्रपशुबान्धवा इत्यर्थः। परिम्रियन्ते सर्वतो निधनं गच्छन्ति ॥ १३ ॥

अथ परिमरगुणोपासनानन्तरं अतो यस्मात् फलान्तरापेक्षाऽस्मात्कारणान्निःश्रेयसादानं, निःश्रेयसं सर्वस्मादुत्कर्षरूपो गुणो मोक्षविशेषः, तद्गुणविशिष्टस्य प्राणस्यादानं स्वीकारः क्रियत इति शेषः। तत्र प्राणो निःश्रेयसमिति नाविचार्य स्नेहादिना स्वीकृतं किन्तु महता सङ्घर्षेण विचारितं, एतदर्थ-

श्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्दाप्रा-णत्* शुष्कं दारुभूतं शिष्येऽथैनद्वाक् प्रविवेश तद्वाचा-

---

नाख्यायिकामाह, सर्वा निखिला ह किल वै प्रसिद्धा देवता देवताशब्दवाच्या वागाद्याः, अहंश्रेयसे अहंवादेनात्मनः श्रेय आधिक्यं, तदर्थं विवदमानाः मामन्तरेण का भवत्य इति स्वव्यतिरिक्ताः परास्तिरस्कुर्वत्य इत्यर्थः। स्वयं निश्चयं कर्तुमशक्ताः प्रजापतिं पितरमेत्योचुर्भगवन् को नः श्रेष्ठ इति, स हि प्राणे श्रैष्ठ्यं जानन्नपि स्वसुतानां दुःखं दातुमशक्तोऽमुमुपायं प्रत्यपद्यत, यस्मिन् व उत्क्रान्ते इदं शरीरं पापिष्ठं शवसमानं भविष्यति स वः श्रेष्ठ इत्युक्ते तथैव श्रैष्ठ्यनिर्धारणार्थं क्रमेणोत्क्रमणं कृतवत्य इत्याह, अस्मात्त्वचाच्छरीरान्मनुष्यादिदेहादुच्चक्रमुर्वागादयः क्रमेण उत्क्रमणं चक्रुः। तत् स्थूलशरीरं वागादीनां प्रत्येकमुत्क्रमणे वदनादिव्यापारमकुर्वत् स्थितं। यदा पुनर्मुख्यप्राण उत्क्रान्तस्तदा दारुभूतं चिताकाष्ठसमानमस्पृश्यं सर्वव्यापारशून्यं शिश्ये शयनं कृतवत्। एवं व्यतिरेकेण निश्चये सम्पन्नेऽप्यतिस्पर्धावशादन्वयमन्तरेण निश्चयमनधिगच्छन्तोऽन्वयमप्यनुष्ठितवन्त इत्याह, अथ शरीरस्य दारुभूतस्य शयनानन्तरं एतच्छरीरं वाक् वागिन्द्रियं प्रविवेश प्रवेशं कृतवती। तत् शरीरं वाचा वागिन्द्रियेण वदत् वदनव्यापारं कुर्वत् शिश्य एव शयनं कृतवदेव। न तूत्थितवत्। वाक्-

---

* तद्दाप्राणत इति D. तद्वाक्प्राणत इति A. अशुद्धं।

वदंश्चिश्ये एवाथैनञ्चक्षुः प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यंश्चिश्ये एवाथैनच्छ्रोत्रं प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वंश्चिश्ये एवाथैनन्मनः प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वन्मनसा ध्यायंश्चिश्ये एवाथैनत्प्राणः प्रविवेश तत्तत एव समुत्तस्थौ ता वा एताः सर्वा देवताः प्राणे निःश्रेयसं विदित्वा प्राणमेव

प्रवेशानन्तरं चक्षुरिन्द्रियं प्रविष्टं ततश्चावलोकनं वदनञ्चाभूत्। अनन्तरं श्रोत्रेन्द्रियं प्रविष्टं ततश्च श्रवणावलोकनवदनान्यभूवन्। अनन्तरं मनः प्रविष्टं ततश्च ध्यानश्रवणावलोकनवदनान्यासन् न तु शरीरमुत्थितवदित्येतत्पर्यायत्रयेणाह, अथैनच्चक्षुः प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यंश्चिश्य* एव, अथैनत् श्रोत्रं प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वंश्चिश्य एव, अथैनत् मनः प्रविवेश तद्वाचा वदञ्चक्षुषा पश्यञ्छ्रोत्रेण शृण्वन्मनसा ध्यायंश्चिश्य एव स्पष्टं, अथ वाक्चक्षुःश्रोत्रमनःप्रवेशानन्तरमेतच्छरीरं वदत् पश्यत् शृण्वत् ध्यायत् प्राणो मुखविलान्तर्वर्ती पञ्चवृत्तिर्वायुविशेषः प्रविवेश प्रवेशं कृतवान्, तच्छरीरं तत एव तस्मात्प्राणप्रवेशादेव न त्वन्यस्मात्समुत्तस्थौ सम्यगुत्थानं कृतवत्, ते च वागादयः परित्यक्ताभिमानाः देवाः देवशब्दाभिधेयाः प्राणे शरीरोत्थापनहेतौ प्रकृष्टचेष्टावति निःश्रेयसं सर्वेभ्यो वागादिभ्य उत्कर्षणं

* सर्वत्र मूले द्वयोष्टीकयोश्च (B. D.) शिश्ये, अपरासु तु शिश्ये।

प्रज्ञात्मानमभिसम्भूय सहैवैतैः सर्वैरस्माच्छरीरादु-
च्चक्रमुस्ते वायुप्रविष्टा* आकाशात्मानः स्वरीयुस्तथो
एवैवं विद्वान् प्राणे निःश्रेयसं विदित्वा प्राणमेव
प्रज्ञात्मानमभिसम्भूय सहैवैतैः सर्वैरस्माच्छरीरादु-

विदित्वा प्राणमेव प्रकृष्टचेष्टावन्तं न त्वन्यं प्रज्ञात्मानं प्रज्ञात्मनो भूम्न उपाधिभूतं प्रसादं, अथवा प्राणे सति प्रज्ञाया दर्शनादसति चादर्शनात्प्राणस्य प्रज्ञात्मत्वमविरुद्धमभिहितं, प्राणमेव प्रज्ञात्मानमिति अभिसम्भूय सर्वतः सम्भवनं प्राप्तिं कृत्वा, सहैवैतैः सर्वैरेतैः प्राणापानव्यानसमानोदानैर्निखिलैः सह, यथा प्राणवृत्तिभेदा अध्यात्मिकपरिच्छेदशून्यास्तद्वद्वागादयोऽपीत्यर्थः, अस्मात् प्रत्यक्षालोकात् तनुरूपात् शरीराच्चक्षुराद्यभिमानादित्यर्थः, उच्चक्रमुः उत्क्रमणञ्चक्रुः। ते परित्यक्तदभिमानाः वागादयः वायुप्रतिष्ठा वायावाधिदैविके प्राणे प्रतिष्ठा प्राणो निःश्रेयसमिति ज्ञानमाश्रयो येषां ते वायुप्रतिष्ठाः, आकाशात्मानः आकाशवत्सर्वगत आत्मा येषां ते आकाशात्मानः स्वरीयुः स्वः स्वर्गमग्न्यादिस्वरूपमीयुः ययुर्गतवन्त इत्यर्थः। तथो एव अपि तद्वदेव यथा देवाः न त्वन्यथा, एवं विद्वान् उक्तेन प्रकारेण प्राणे निःश्रेयसं जानन् सर्वेषां भूतानां निखिलानां स्थिरजङ्गमानां प्राणमेव प्रज्ञात्मानमभिसम्भूय सहैवैतैः सर्वैरस्माद्व्याख्यातात् शरीराच्छरीरा-

* वायुप्रतिष्ठा इति टी० ।

त्क्रामति स वायुप्रविष्ट* आकाशात्मा स्वरेति स †तद्गच्छति यत्रैते देवास्तत्प्राप्य यदमृता देवास्तदमृतो भवति य एवं वद ॥ १४ ॥

अथातः पितापुत्रीयं सम्प्रदानमिति चाचक्षते

भिमानादुत्क्रामति उत्तिष्ठति शरीराभिमानं परित्यजतीत्यर्थः। स वायुप्रतिष्ठ आकाशात्मा स्वरेति व्याख्यातं। उपासकस्यैकत्वादेकवचनं विशेषः। एवं प्राणो ब्रह्मेत्युपासनं स्याद्यत इति तत्फलमाह, स्वः स्वर्गं प्राणं ब्रह्मज्ञानोत्पादनद्वारानन्दात्मानं वेति। स्वरेतीत्येतद्व्याकरोति, स उपासकस्तद्भवति उक्तं प्राणस्वरूपं भवति। तच्छब्दार्थमाह, यत्र यस्मिन् प्राणस्वरूपे एते देवाः एते वागादयोऽग्न्याद्यात्मका देवशब्दाभिधेयाः। ननु वागादीनामग्न्याद्यात्मिलचणममृतत्वं तत्प्राप्तौ, उपासकस्य पुनः तत्प्राप्तौ किं स्यादित्यत आह, तत्प्राणस्वरूपं प्राप्य अवाप्य तदमृतः तत् सर्वपरिच्छेदशून्यममृतत्वं यस्य स तदमृतो भवति स्पष्टं, यदमृताः यत् प्रसिद्धं सर्वपरिच्छेदशून्यममृतत्वं येषां ते यदमृता देवा वागाद्याः ॥ १४ ॥

इदानीं प्राणविदः सम्प्रत्तिकर्माह, अथ प्राणोपासनानन्तरं, अतो यस्मान्मरणमवश्यंभावि अस्मात्कारणात्, पितापुत्रीयं पित्रा पुत्राय दीयमानं पितापुत्रीयं, सम्प्रदानं सम्यक् प्रदीयत इति सम्प्रदानं सम्प्रत्तिकर्मेत्यर्थः। इति चाचक्षते

* वायुप्रतिष्ठ इति टी०।　† तद्भवतीति टी०।

पिता पुत्रं प्रेष्यन्नाह्वयति नवैस्तृणैरगारं संस्तीर्याग्नि-
मुपसमाधायोदकुम्भं *सपात्रमुपनिधायाहतेन वास-
सा सम्प्रच्छन्नः †पिता श्येत एत्य पुत्र उपरिष्टादभिनिप-
द्यत इन्द्रियैरिन्द्रियाणि संस्पृश्यापि ‡वास्मा आसीना-
याभिमुखायैव सम्प्रदध्यादथास्मै सम्प्रयच्छति वाचं मे

अनेनैव प्रकारेण कथयन्ति। पिता पुत्रं प्रेष्यन् कुतश्चिन्नि-
मित्तात् मरिष्यामीति निश्चित्येत्यर्थः, पिता जनकः पुत्रमौ-
रसं तनयमाह्वयति आकारयति सम्प्रत्तिकर्मार्थं। आका-
रणे इतिकर्तव्यतामाह, नवैस्तृणैर्नवीनैः कुशादिभिस्तृणैर-
गारं संस्तीर्य गृहमाच्छाद्य अग्निमुपसमाधाय तस्मिन् गृहे
श्रौतं स्मार्तं वाग्निं संस्थाप्य अग्नेरुत्तरतः पूर्वतो वा उदकुम्भं
सपात्रमुपनिधाय नीरेण पूर्णं कलशं व्रीहिपूर्णपात्रसहितं
समीपे संस्थाप्य अहतेन वाससा सम्प्रच्छन्नः नवीनेन वस्त्रेण
संवृतः, स्वयं श्येतः श्वेतः सितमाल्याम्बरधर इत्यर्थः, एत्य आगत्य
आह्वयतीत्यन्वयः, पुत्रे आगते तनये उपरिष्टादुपरिभागे
अभिनिपद्यते सर्वतो नितरां प्राप्नोति। अभिनिपदनेतिकर्त-
व्यतामाह, इन्द्रियैश्चक्षुरादिभिः स्वकीयैरस्य पुत्रस्य इन्द्रि-
याणि चक्षुरादीनि संस्पृश्य सम्यक् स्पर्शनं विधायाभिनिपद्यत
इत्यन्वयः। यद्वा पिता श्येते पुत्रोऽभिनिपद्यत इति पाठाद-

* सपात्रमुपनिनायेति B. C.

† स्वयं श्येत इति टी०।

‡ अपि वास्याभिमुखत एव आसीतायास्मा इति टी०।

त्वयि दधानीति पिता वाचं ते मयि दध इति पुत्रः प्राणं मे त्वयि दधानीति पिता प्राणं ते मयि दध इति पुत्रश्चक्षुर्मे त्वयि दधानीति पिता चक्षुस्ते मयि दध इति पुत्रः श्रोत्रं मे त्वयि दधानीति पिता श्रोत्रं ते मयि दध इति पुत्रोऽन्नरसान्मे त्वयि दधानीति पितान्नरसांस्ते मयि दध इति पुत्रः कर्माणि मे त्वयि दधानीति पिता कर्माणि ते मयि दध इति पुत्रः*

न्वयः। पश्चान्तरमाह, अपि वा अथवाऽस्य पुत्रस्याभिमुखत एव सम्मुखत एव न त्वन्यथा, उपरिपदस्य लोकगर्हितत्वादित्यर्थः, आसीत उपविशेत्। अथानन्तरमस्मै पुत्राय सम्प्रयच्छति सम्यक् प्रयच्छेत् वक्ष्यमाणेन विधिना स्ववागादीन् दद्यादित्यर्थः, वाचं वागिन्द्रियं मे मम पितुर्मुमूर्षोः त्वयि पुत्रे ममानृण्यस्य विधातरि दधानि धारयाणि, इत्यनेन प्रकारेण पिता जनक आहेति शेषः। एवं पित्रोक्ते वाचं वागिन्द्रियं ते तव पितुर्मयि पुत्रे दधे धारये इत्यनेन प्रकारेण पुत्रस्तनय आहेति शेषः। प्राणं मे त्वयि दधानीति पिता, प्राणं ते मयि दध इति पुत्रः। चक्षुर्मे त्वयि दधानीति पिता, चक्षुस्ते मयि दध इति पुत्रः। श्रोत्रं मे त्वयि दधानीति पिता, श्रोत्रं ते मयि दध इति पुत्रः। अन्नरसान् मे त्वयि दधानीति पिता, अन्नरसांस्ते

* शरीरं मे त्वयि दधानीति पिता शरीरं ते मयि दध इति पुत्र इति A. पुस्तके समधिकः पाठः।

सुखदुःखे मे त्वयि दधानीति पिता सुखदुःखे ते मयि दध इति पुत्रः आनन्दं रतिं प्रजातिं* मे त्वयि दधानीति पितानन्दं रतिं प्रजातिं ते मयि दध इति पुत्र इत्यां मे त्वयि दधानीति पितेत्यां ते मयि दध इति पुत्रो मनो मे त्वयि दधानीति पिता मनस्ते मयि दध इति पुत्रः प्रज्ञां मे त्वयि दधानीति पिता प्रज्ञां

मयि दध इति पुत्रः। कर्माणि मे त्वयि दधानीति पिता, कर्माणि ते मयि दध इति पुत्रः। सुखदुःखे मे त्वयि दधानीति पिता, सुखदुःखे ते मयि दध इति पुत्रः। आनन्दं रतिं प्रजातिं* मे त्वयि दधानीति पिता, आनन्दं रतिं प्रजातिं ते मयि दध इति पुत्रः। इत्यां मे त्वयि दधानीति पिता, इत्यां ते मयि दध इति पुत्रः। धियो विज्ञातव्यं कामान्मे त्वयि दधानीति पिता, धियो विज्ञातव्यं कामांस्ते मयि दध इति पुत्रः। प्राणं घ्राणं मुख्यञ्च प्राणं। चक्षुःश्रोत्रे स्पष्टे। अन्नरसान्मधुरादीन्। पूर्वं करणग्रहणं, इत आरभ्य विषयग्रहणं, उभयत्र करणविषययोः समर्पणार्थं कर्माणि आदातव्यानि। सुखदुःखे शरीरोपभोग्ये। आनन्दं रतिं प्रजातिं मैथुनस्यावसाने आनन्दस्ततः प्रायतिः ततः प्रजातिः पुत्राद्याः। इत्या गतीः। धियोऽन्तःकरणवृत्तीः, विज्ञातव्यं तासां विषयः। कामानिच्छाविशेषान्। अन्यत्नवस्वपि पर्यायेषु वाक्पर्यायवद्व्याख्येयं। पाठान्तरं इत्यां ते मयि दध

---

* प्रजातीरिति B. C.

ते मयि दध इति पुत्रो यद्यु वा उपाभिगदः स्यात् समासेनैव ब्रूयात्प्राणान्मे त्वयि दधानीति पिता प्राणांस्ते मयि दध इति पुत्रोऽथ दक्षिणावृदुपनिष्क्रामति तं पितानुमन्त्रयते यशो ब्रह्मवर्चसं कीर्त्तिस्त्वा जुषतामित्यथेतरः सव्यमन्वंसमभ्यवेक्षते पाणिनान्तर्द्धाय वसनान्तेन वा प्रच्छाद्य स्वर्गान् लोकान्

इति पुत्र इत्यनन्तरं मनो मे त्वयि दधानीति पिता मनस्ते मयि दध इति पुत्रः प्रज्ञां मे त्वयि दधानीति पिता प्रज्ञां ते मयि दध इति पुत्र इति। यद्यु वा उपाभिगदः प्रत्येकं वक्तुमसमर्थः स्यात्समासेनैव वदेत्प्राणान्मे त्वयि दधानीति पिता प्राणांस्ते मयि दध इति पुत्र इति। अथानन्तरं दक्षिणावृत्। पितुः प्रदक्षिणप्रकारेण प्राङ् प्राच्यां दिशि उपनिष्क्रामति पितुःसमीपदेशाद्बहिर्गच्छति, तं पुत्रं पिता जनकः अनुमन्त्रयते पश्चात् सम्बोध्य ब्रूते। अनुमन्त्रणवाक्यमाह, यशः लौकिकी बन्धुजनादिभ्यः कीर्त्तिः, ब्रह्मवर्चसं ब्रह्मतेजः, अन्नाद्यं अन्नञ्च तदाद्यञ्च अन्नाद्यं, कीर्त्तिः शास्त्रीयं यशः, त्वा त्वां पुत्रं जुषतां सेवतामित्यनेन प्रकारेणानुमन्त्रयत इत्यन्वयः। अथ एतदनुमन्त्रणानन्तरं, इतरः पुत्रः सव्यं वामं अंसं बाहुमूलं स्वस्यान्ववेक्षते पश्चादवलोकयते। अवलोकनप्रकारमाह, पाणिना करेणान्तर्धाय व्यवधाय वसनान्तेन वा, वाशब्दः पूर्वेण सहेच्छाविकल्पार्थः, प्र-

कामानाप्नुहीति स यद्यगदः स्यात्पुत्रस्यैश्वर्ये पिता वसेत् परि वा व्रजेद्यद्यु वै प्रेयात्तथैवैनं समापयेयुर्यथा समापयितव्यो भवति यथा समापयितव्यो भवति॥ १५॥

इत्यारण्यके कौषीतकिब्राह्मणोपनिषदि द्वितीयोऽध्यायः समाप्तः ॥ * ॥

च्छाद्य आच्छाद्य पितरं प्रत्याह, स्वर्गान् लोकान्निरतिशयप्रीतिजनकान् देशविशेषान् कामान् कमनीयान् तत्रस्थितान् वा भोगानाप्नुहि प्राप्नुहि, इत्यनेन प्रकारेण ब्रूयादित्यनुषङ्गः। एवं पुत्रेण कृते स पिता यदि कथञ्चिदगदः स्यान्नीरोगो भवेत्पुत्रस्य तनयस्यैश्वर्ये विभवे पिता जनको वसेत् निवासं कुर्यात्प्रवासिवत् गृहकार्यं किमपि नानुसन्दध्यादित्यर्थः। परि वा व्रजेत् वाशब्दः पक्षान्तरार्थः, यदि वैराग्यं तदा परित्यजेत् सर्वसङ्गपरित्यागं कुर्यादित्यर्थः। यद्यु वै अपि कथञ्चित्प्रसिद्धं प्रेयात्परलोकं गच्छेद्यदेव प्रसिद्धमेव वागादिकं न त्वन्यदेतं पुत्रं प्रति समापयति सम्यक् प्रापयति, तथा तद्वदेव समापयितव्यो भवति सम्यक् प्रापणीयो भवति सर्वैः कामैरिति शेषः। तथा समापयितव्यो भवति व्याख्यातं। वाक्याभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ १५ ॥

इति श्रीशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां द्वितीयोऽध्यायः समाप्तः ॥ * ॥

प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च तं हेन्द्र उवाच प्रतर्दन

यस्या हेतोः पर्यङ्कोपासना प्राणोपासना च विविधगुणोक्ता तां ब्रह्मविद्यां विवक्षुः तस्यामास्तिक्यं जनयितुं प्रतर्दनं काश्यं देवेभ्योऽभ्यधिकबलत्वस्यादिमन्तं ब्रह्मविद्यार्थिनं शिष्यं देवराजञ्च सत्यपाशनिबद्धं मनुष्येषु ब्रह्मविद्यां वक्तुमनिच्छन्तमपि गुरुं सम्पाद्याख्यायिकामाह, प्रतर्दनः प्रकर्षेण तर्दयति भर्त्सयत्यभिभवति स्वशत्रूनिति सार्थकनामा प्रतर्दनः, ह किल दैवोदासिः दिवोदासस्य काशिराजस्य पुत्रो दैवोदासिः, इन्द्रस्य देवराजस्य परमैश्वर्यसम्पन्नस्य प्रियं धाम प्रियं स्थानं स्वर्गमिति यावत्, उपजगाम प्राप्तवान्। तत्प्राप्तौ कारणमाह, युद्धेन च पौरुषेण च समरयज्ञेनानेकभटपश्वाहुतिदीप्यमानशस्त्राग्निना पुरुषसम्बन्धिनोत्साहेन च स्वर्गमर्मपरिज्ञानेनेत्यर्थः। चकारावुभयोरपि कारणत्वसमुच्चयार्थौ। तं समरशौण्डमुत्साहिनं स्वर्गमागतं प्रतर्दनं ह किल इन्द्रः युद्धपौरुषाभ्यां परितोषं प्राप्तो देवराज उवाच उक्तवान्। इन्द्रोक्तिमाह, प्रतर्दन हे प्रतर्दन वरमभिलषितमर्थं ते तुभ्यं प्रतर्दनाय मत्परितोषकारिणे ददानि प्रयच्छानि ददामीत्यर्थः, इत्यनेन प्रकारेण उवाचेत्यन्वयः। स इन्द्रेणोक्तः ह किल उवाच प्रतर्दनः स्पष्टं। प्रतर्दनोक्तिमाह, त्वमेव मत्पुरतः स्थितो हिताहितज्ञो देवराजो न त्वन्यो मे मह्यं प्रतर्दनाय हितार्थिने मदर्थमित्यर्थः, वृणीष्व हितमिष्टं वार्यं प्रार्थयस्व। प्रार्थ्यमानं वरमाह, यं प्रसिद्ध-

*वरं वृणीष्वेति स होवाच प्रतर्दनस्त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तं हेन्द्र उवाच न वै †वरोऽवरस्मै वृणीते त्वमेव वृणीष्वेत्यवरो वै ‡किल

मभीष्टमर्थं त्वं सर्वज्ञो देवराजः मनुष्याय अज्ञानकानना-न्तर्वर्तिने ऽनेकशुभाशुभव्यामिश्रकर्मफलदावाग्निमन्तप्तगात्राय मनुष्यजातियुजे हिततममतिशयेन हितं नातः परं हितमित्यर्थः, मन्यसे निश्चिनोषि, इति अनेन प्रकारेण। तमिन्द्रं प्रत्येवं-वादिनं प्रतर्दनं ह किल इन्द्रो देवराजो ब्रह्मविद्यां दातु-मशक्त उवाच उक्तवान् लौकिकं नयं। इन्द्रोक्तिमाह, न वै वरः परस्मै वृणीते वै प्रसिद्धं, परस्मै अन्यार्थं, वरो वरं न वृणी-तेऽन्यो न प्रार्थयते यत एवमतः स्वार्थं वरं त्वमेव वृणीष्वेति स्पष्टं। एवमिन्द्रेणोक्ते अवरः वरं ददानीति प्रतिज्ञाय भव-ता निर्दिष्टोऽर्थो दत्तः स्यादिति शेषः, वै प्रसिद्धो मनुष्येणा-ज्ञानावृतदृष्टिना मया याचितः तर्हि तदा किल नि श्चितं मे मह्यं हिताहितज्ञानशून्यायेति होवाच प्रतर्दनः ह किल एव-मुक्तवान् प्रतर्दनो देवराजं, स्वार्थो वरोऽयमिति। अथो अथ प्रतर्दनवाक्यानन्तरं खलु निश्चितमिन्द्रः सत्यवादिनामग्रगण्यो देवराजः सत्यात् वरं ते ददानीति स्वप्रतिज्ञानात् यथार्थवच-नादेव नैयाय नापजगामैव प्रतर्दनार्थं वरदातापि स्वयं स्वस्मै वरं याचितवान्नतु लौकिकं नयमङ्गीचकारेत्यन्वयः। सत्या-

* वरं ते ददानीति टी०. F. G. पुस्तकयोश्च।

† वरः परस्मा इति टी०. F. G. ‡ तर्हि किलेति टी०. F. G.

मेति* होवाच प्रतर्दनोऽथो खल्विन्द्रः सत्यादेव नेयाय सत्यं †हीन्द्रस्तं हेन्द्र उवाच मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयात्त्रिशीर्षाणं

दनपगमने कारणमाह, सत्यं हीन्द्रः सत्यं यथार्थस्वरूपं यत्किञ्चिद्वागर्थस्वरूपं इन्द्रो देवराजो हि यस्मात्तस्मान्नेयायेत्यन्वयः। स सत्यपाशाभिबद्ध इन्द्रो ह किल उवाच उक्तवान्, प्रतर्दनार्थमात्मानं वरं याचितवानित्यर्थः। इन्द्रोक्तिमाह, मामेवास्मत्प्रत्ययव्यवहारयोग्यमानन्दात्मानमेव न त्वन्यं विजानीहि अवगच्छ साक्षात्कुर्वित्यर्थः। एतदेव मे ज्ञानमेव न त्वन्यत्, अहं भवते वरस्य दाता याचिता च, मनुष्याय हिततमं व्याख्यातं मन्ये निश्चिन्वे। एतच्छब्दार्थमाह, यत्प्रसिद्धं वेदान्तेषु ब्रह्मविदाप्नोति परमित्यादिना मामुक्तमानन्दात्मानं विजानीयात् साक्षात् कुर्यादित्यर्थः, यन्मां विजानीयादेतदेव हिततमं मन्य इत्यन्वयः। ननु तव ज्ञाने तवान्यस्य वा यदि कश्चनातिशयोऽभूत् तर्हि तद्धिततमं न त्वन्यथेतिशङ्कायामद्वैतज्ञानं गुरुमातृवधप्रमुखपापोन्मूलकं, अत आह, त्रिशीर्षाणं त्रिशीर्षं त्वाष्ट्रं त्वष्टुरपत्यं विश्वरूपमहनम् निपातितवान्, अरुन्मुखान् यतीन् रुच्छब्दः वेदाध्ययनं तेन उपनिषदर्थविचारो ब्रह्ममीमांसापरपर्यायो लक्ष्यते, तद्येषां मुखे नास्ति ते अरुन्मुखाः तान् यतीन् प्रयत्नवतस्तुर्थाश्रमिणः सालावृकेभ्यः सालावृकाणां अपत्यानि साला-

* म इति। इति टी०. F. G.　† हीन्द्रः स हेन्द्र इति टी०. F. G.

त्वाष्ट्रमहनमरुन्मुखान् यतीन् *सालावृकेभ्यः प्रायच्छं बह्वीः सन्धा अतिक्रम्य दिवि †प्रह्लादीयानतृणमहमन्तरिक्षे पौलोमान् पृथिव्यां ‡कालकाञ्जांस्तस्य मे

वृकेयाः सालावृका इति यावत् तेभ्योऽरण्यश्वभ्य इत्यर्थः, प्रायच्छं प्रकर्षेण वज्रेण शतधा विभज्य दत्तवानद्यापि च तेषां मस्तकविपाकाः करीरा दृश्यन्ते। बह्वीर्भूयसीः स्वरूपतः सङ्ख्यातश्च सन्धाः सन्धीनित्यर्थः, अतिक्रम्य स्पष्टं, दिवि स्वर्गे प्रह्लादीन् प्रह्लादिनः प्रह्लादेन नित्यसम्बन्धिनः अनेककोटिसङ्ख्याकान्महामायाननेकच्छिद्रघातिनोऽसुरान् प्रह्लादपरिचारकानित्यर्थः, अतृणं हिंसितवान् अहमात्मज्ञानीन्द्रस्तुभ्यं वरस्य दाता अन्तरिक्षे भुवर्लोके पौलोमान् पुलोमसम्बन्धिनोऽसुरविशेषान् बह्वीः सन्धा अतिक्रम्य अतृणमित्यनुवर्त्ततेऽत्र वक्ष्यमाणे च। पृथिव्यां भूर्लोके §कालकाञ्ज्यान् कालकञ्जसम्बन्धिनोऽसुरान् भूयसीं परस्परसम्बन्धस्यावश्यंभावित्वात् कालकञ्जा एव कालकाञ्ज्याः तान्। ननु किं प्रकृते तावतेत्यत आह। तस्य गुरुब्राह्मणवधस्य कर्तुः सन्न्यासिनाञ्च श्वभ्यो दातुर्लोकत्रयेऽपि यज्ञादिसम्पन्नमहामायासुरसङ्घस्योपसंहर्तुरात्मज्ञानिनोऽन्येन मनसापि कर्तुमशक्यं कर्म

---

* शाला० इति D. टीकायाञ्च कुत्रचित्।

† प्रह्लादीनिति F. C. प्रह्लादीनिति B. E.

‡ कालकाञ्ज्यानिति B. C. कालखञ्जानिति D. कालकञ्ज्यानिति F.

§ कालखञ्जान् कालखञ्जसम्बन्धिन इति D.

तत्र *न लोम चनामीयत स यो मां वेद न ह वै तस्य केन चन कर्मणा लोको मीयते न स्तेयेन न भ्रूणह-

कुर्वतो मे मम इन्द्रस्य तवोपदेशकस्य तत्र तस्मिन्नतिक्रूरे कर्मणि क्रियमाणे ब्रह्मबधादिलक्षणे न लोम च मा मीयते न लोमापि अत्यल्पोऽपि केश इत्यर्थः, मा मीयते न मीयते न हिंस्यते उक्तेन केनचित्कर्मणा। ननु एतत् भवत एवं न त्वस्मदादेरित्यत आह, स मदन्यो मज्ज्ञानी प्रसिद्धः यः यः कश्चिद्देवो मनुष्यो वा मां वेद आनन्दात्मानमिन्द्रं विजानीयात् अहमानन्दात्मास्मीति साक्षात् कुर्यात् नास्य केन च कर्मणा लोको मीयते अस्य मामानन्दात्मानं साक्षात् कुर्वतः, केन च वक्ष्यमाणेन भ्रूणहत्यादिना कर्मणा पातकेन शास्त्रनिषिद्धेन व्यापारेण लोकः कृतस्य करिष्यमाणस्य च सुकृतस्य फलं मुक्त्यु-दर्कं न मीयते न हिंस्यते। हिंसकानि कर्माण्येकदेशेन दर्शय-न्नाह, न मातृबधेन न पितृबधेन न स्तेयेन न भ्रूणहत्यया, माता-पितरौ प्रसिद्धौ तयोर्बधो प्राणत्यागानुकूलव्यापारो लोक-द्वयभ्रंशहेतुः प्रत्येकं प्रसिद्धः, स्तेयं सुवर्णपरिमितसुवर्णस्य ततोऽप्यधिकस्य वा स्वामिनः परोक्षमादानं तेन, भ्रूणो वेदस्य वेदयोर्वेदानां वाधिगतार्थेन अध्ययनेन सह वर्तमानो द्विजो-त्तम इत्यर्थः, तस्य मनसा वाचा कर्मणा वापराधशून्यस्य खड्गादिना बधो भ्रूणहत्या तया। कर्मसामान्यस्य विशेषो

---

* न लोम च मा मीयते स यो मां विजानीयान्नास्य इति टी०. F. G. (मामीयेति B.)

त्यया न मातृबधेन न पितृबधेन नास्य पापं चकृषो मुखान्नीलं वेतीति ॥ १ ॥

स होवाच प्राणोऽस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वायुः *प्राणः प्राणो वा आयुर्यावद्यस्मिंच्छरीरे

ऽयमिति दर्शयितुं पर्यायचतुष्टयेऽपि नकारचतुष्टयं। नास्य पापं चकृषो मुखान्नीलं वेतीति किं बहुनाऽस्य मदात्मज्ञानिनः पापं चन चकृषः पापमपि कर्तुमिच्छोः मुखात् वदनात् नीलं मुखकान्तिस्वरूपं नीलं नीलिमाश्रयस्वरूपं वा मुखात्कण्ठजिह्वादिवदनात् न वेति न व्येति नापगच्छति, इतिशब्दः प्रकृतब्रह्मज्ञानस्तुतिपरिसमाप्त्यर्थः ॥ १ ॥

एवं ब्रह्मज्ञानं स्तुत्वा आत्मनो ब्रह्मणः स्वरूपं विवचुः स इन्द्र ह किल उवाच उक्तवान्, प्राणः प्राणशब्दाभिधेयः प्राणोपाधिको वाऽस्मि भवामि प्रज्ञात्मा बुद्धिवृत्तिप्रतिफलित-प्रज्ञानैकस्वभावः तं प्राणं प्रज्ञात्मस्वरूपं मामानन्दात्मानमिन्द्रं आयुः सर्वप्राणिनां जीवनकारणं प्राणापानव्यतिरिक्तं प्राणापानयोराश्रयभूतं अमृतं मरणशून्यं षड्भावविकारशून्यमित्यर्थः। इति प्राणः प्रज्ञात्मेन्द्रः आयुरमृतमस्मीत्यनेन रूपेण उपास्स्व यावदात्मसाचात्कारं विजातीयप्रत्ययशून्यं सजातीयप्रत्ययप्रवाहं कुरु। नन्वेकस्यैव भवत इन्द्रस्य प्राणः प्रज्ञात्माऽऽयुरमृतमिति गुणाः किमित्याशङ्क्यतेत्याह,

* स प्राणः प्राणो वा आयुः प्राण उ वा अमृतं यावद्ध्यस्मिन्निति टी०. F. G.

प्राणो वसति तावदायुः प्राणेन *ह्येवास्मिंल्लोकेऽमृतत्वमाप्नोति प्रज्ञया सत्यं सङ्कल्पं स यो †मामायुरमृतमित्युपास्ते सर्वमायुरस्मिंल्लोक एत्याप्नोत्यमृतत्वम-

आयुरुक्तं यत् स प्राण उक्तः। ननु आयुषः प्राणत्वेऽपि न प्राणस्यायुष्ट्वं यथा सास्नाया गोत्वेऽपि न गोः सास्नात्वमित्यत आह, प्राणो वा आयुः प्राण एवायुः न त्वङ्गाङ्गिगुणगुण्यादिभेदः। न त्वेतदायुष एव किन्त्वमृतत्वस्यापीत्याह प्राण उ वा अमृतं अमृतमपि प्राण एव। प्राणस्यायुष्ट्वममृतत्वञ्चोपपादयति, यावत् यावन्तं कालं हि यस्मात् अस्मिन् प्रत्यक्षे शरीरे शीर्णावयवे कलेवरे प्राणो वसति तावदायुः तावन्तं कालं स्पष्टमन्यत्। इदानीममृतत्वमुपपादयति, प्राणेन ह्येव यस्मात्प्राणेनैव न तु शरीरेणापि अमुष्मिन् परोक्षे लोके स्वर्गादौ अमृतत्वं सुखं प्राप्नोति स्पष्टं। ननु प्राणस्य क्रियाशक्तेर्भवतः किं प्रज्ञयेत्यत आह, प्रज्ञया ज्ञानशक्तिरूपेण सत्यं सत्यवचनं निष्प्रपञ्चं ब्रह्म वा सङ्कल्पमिदं मे स्यादित्येवं रूपं मनसः प्रचारमधिगच्छतीति शेषः। एवं प्रज्ञादीनामुपयोगमुक्त्वायुष्ट्वामृतत्वोपासनयोः फलमाह, स प्रसिद्ध उपासको यः यः कश्चिन्मे मम इन्द्रस्य प्राणात्मनोऽपृथग्भूतमायुरमृतमिति व्याख्यातं उपास्ते स्पष्टं, य उपास्ते स इत्यन्वयः, सर्वमायुरस्मिन् लोक एति निखिलं शतसंवत्सरमायुराप्नोति। आयुरुपासनस्य

* ह्येवामुष्मिन्निति टी०. F. G.　† स आयुरिति टी०. F.

क्षितिं स्वर्गे लोके तद्वैक आहुरेकभूयं वै प्राणा गच्छन्तीति न हि कश्चन शक्नुयात् सकृद्वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा *ध्यानमेकभूयं वै प्राणा †भूत्वैकैकमेतानि सर्वाणि प्रज्ञापयन्तीति

फलमुक्तामृतत्वोपासनस्य फलमाह, आप्नोत्यमृतत्वमक्षितिं स्वर्गे लोकेऽक्षयममृतत्वं स्पष्टमन्यत्। प्रतर्दनः प्राणशब्दं श्रुत्वा प्राणानामिन्द्रियाणामेकत्वं स्वयमवगतं प्रसङ्गात् पृच्छति, तत् तत्र प्राणानामनेकत्वे सति ह किल एके केचिद्विद्वांस आहुः कथयन्ति, एकभूयं वै एकभावमेव प्राणा इन्द्रियाणि गच्छन्ति स्पष्टं, इत्यनेन प्रकारेणाहुरित्यन्वयः। प्राणानामेकभावे उपपत्तिं यां कथयन्ति तामाह, न हि कश्चन शक्नुयात् हि यस्मात् कोऽपि न शक्नुयात् सकृदेकवारं युगपदित्यर्थः, वाचा नाम प्रज्ञापयितुं चक्षुषा रूपं श्रोत्रेण शब्दं, वागिन्द्रियेण नाम वक्तुमिति शेषः, प्रज्ञापयितुं अवगमयितुमवगन्तुमिति यावत्, एतच्चक्षुःश्रोत्राभ्यां सम्बध्यते स्पष्टमन्यत्, मनसा ध्यातुं मनसा ध्यानं कर्तुमित्यनेन प्रकारेण एककाले व्यापाराभावेन एकभूयं वै प्राणाः व्याख्यातं, पुनरभिधानं निगमनार्थं। उक्तं हेतुं विवृणोति, एकैकं रूपरसादिकं सर्वाण्येव निखिलानि, एकैकमेवेत्यनेन सम्बध्यते, स्पष्टमन्यत्, एतानि प्रज्ञपयन्ति प्रकर्षेण निष्पादयन्ति गमयन्ति च। एकैकमेव

* ध्यातुमिति टी०, F. G.

† एकैकं सर्वाण्येतानि प्रज्ञपयन्ति। इति टी०. G.

वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति श्रोत्रं शृण्वत् सर्वे प्राणा अनुशृण्वन्ति मनो ध्यायत् सर्वे प्राणा अनुध्यायन्ति प्राणं

प्रज्ञापयन्तीत्युक्तं शङ्कयाहिकयाह, वाचं वदन्तीं वागिन्द्रियं स्वव्यापारं कुर्वत् सर्वे प्राणा निखिलानीन्द्रियाणि राजानमिव वदन्तं सर्वे समागता अनुवदन्ति पश्चाद्वदनोपलक्षितं स्वव्यापारं कुर्वन्ति अनुमोदन्ते वा न लेकहेलया व्यापारं कुर्वन्तीत्यर्थः। यथा वाचो व्यापारे इतरेषां स्वव्यापारादुपरमस्तथा चक्षुःश्रोत्रमनःप्राणानां स्वव्यापारेऽपीत्येतदाह पर्यायचतुष्टयेन, चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति श्रोत्रं शृण्वत् सर्वे प्राणा अनुशृण्वन्ति मनो ध्यायत् सर्वे प्राणा अनुध्यायन्ति प्राणं प्राणन्तं सर्वे प्राणा अनुप्राणन्ति स्पष्टं, अनेनानेकावधानान्येकस्मिन् काले सूक्ष्मसूच्यग्रेण शतपत्रसहस्रपत्रवेधनवदस्पष्टविभिन्नकालानि व्याख्येयानि। इति प्रतर्दनप्रश्नपरिसमाप्त्यर्थः। प्रतर्दनप्रश्नस्येन्द्रोऽङ्गीकारेणैव उत्तरमुक्तवानित्याह, एवमु इत्थमेवैकहेलया न सर्वे प्राणाः स्वस्वव्यापारवन्तः, ह प्रसिद्धं सर्वजनीनानुभवेन, एतदेकहेलया सर्वेन्द्रियाणां स्वस्वव्यापाराकरणं, इति ह एवं किल इन्द्र उवाच स्पष्टं। ननु सर्वेषां तवोपाधित्वे समाने कः पक्षपातस्तव प्राणोऽस्मीत्यभिमान इत्यत आह, अस्ति त्वेव, तुशब्दः शङ्कानिराकरणार्थः, प्राणो हि मम निःश्रेयसात्मन उपाधिर्निःश्रेयसरूपः, प्रसिद्धं हि

प्राणन्तं सर्वे प्राणा अनुप्राणन्ति एवमु हैतदिति हेन्द्र उवाचास्ति त्वेव प्राणानां निःश्रेयसमिति ॥ २ ॥

जीवति वागपेतो मूकान् हि पश्यामो जीवति चक्षुरपेतोऽन्धान् हि पश्यामो जीवति श्रोत्रापेतो बधिरान् हि पश्यामो *जीवति मनोऽपेतो बालान् हि पश्यामो †जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इत्येवं

तस्य निःश्रेयसत्वं प्राणसंवादादौ, न च तदासीद्भविष्यति वा किन्तु अस्त्येव वर्त्तत एव न तु कदाचिन्न वर्त्तते प्राणानां प्राणस्य पञ्चवृत्तीनां निःश्रेयसं शरीरधारणोत्थापनादिकं तदाप्यञ्च स्वर्गमोक्षादिकं। इति निःश्रेयसवर्त्तमानत्वप्रतिज्ञापरिसमाप्त्यर्थः॥ २॥

न चैतत् निःश्रेयसं वाक्चक्षुःश्रोत्राणामपि भवतीत्याह पर्यायत्रयेण सहेतुकं, जीवति वागपेतो मूकान् हि पश्यामो जीवति चक्षुरपेतोऽन्धान् हि पश्यामो जीवति श्रोत्रापेतो बधिरान् हि पश्यामः स्पष्टं, वाक्चक्षुःश्रोत्रैरपेतो रहितो भवतीति प्रतिज्ञा, अत्र हेतुः मूकान्धबधिराणां दर्शनं। अयमर्थः। इन्द्रियाणां कार्य्यैकगम्यत्वात् कार्य्याभावे तदभाव इति। जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्नः स्पष्टं,पर्व्वायद्वयेन हस्तपादरहितस्य जीवनमुच्यते, इति प्रकृतपर्य्यायपरिसमाप्त्यर्थः। एकहेलयोभयत्र हेतुमाह, एवं हि पश्यामः हि यस्मादेवं छिन्नहस्तपादानां जीवनं पश्यामोऽवलोकयामः न च दृष्टेऽनुपपन्नं नामेत्यर्थः,

---

* जीवति मन इत्यादि F. G. टीकायाञ्च नास्ति।

† अथ खलु जीवतीति F. G.

हि पश्याम इत्यथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासीतेति *सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स

इत्यनेन प्रकारेणाङ्गीकृत्य इति इन्द्र उवाचेत्यन्वयः। अथवाद्य इतिशब्दोऽङ्गीकारार्थः अन्यस्तु प्रकारार्थ इति। न चैतन्निःश्रेयसमस्त्येवेत्यस्मिन्नर्थे उपपत्तिर्मृग्येत्याह, अथ यस्मात् खलु निश्चितं सर्वप्रत्यक्षमिति यावत्, प्राण एव प्रज्ञात्मा क्रियाशक्त्युपाधिक एव ज्ञानशक्त्युपाधिको न त्वन्यः, इदं प्रत्यक्षं शरीरं देहं परिगृह्य अहं ममेति वा स्वीकृत्य उत्थापयति, शयनासनादिभ्य ऊर्द्धं नयति। इदानीं प्रसङ्गादुपासनान्तरं श्रुत्यन्तरप्रसिद्धं प्राणे स्मारयति, तस्मात् यत इदं शरीरमुत्थापयति प्राणस्तत एतदेव उत्थापनहेतुभूतमेव न त्वन्यत्, उक्थं उक्थशब्दाभिधेयमुपासीत व्याख्यातं। ननु यदि प्राण उक्थत्वेनोपास्यस्तर्हि पञ्चवृत्तिमात्रं विवक्षितं न परमात्मेत्यत आह, यो वै प्राणो य एवात्र प्राणशब्दाभिधेयः सा प्रसिद्धा प्रज्ञा सर्वबोधसाक्षिणी संवित् या वा यैव प्रज्ञा उक्ता स प्रसिद्ध प्राणः प्राणोपाधिकः परमात्मा। ननु कस्मादेतदेकमेव तवोपाधिभूतमित्यत आह, सह मिलित्वा हि यस्मात् एतौ प्रज्ञाप्राणौ अस्मिन् शरीरे स्पष्टं, वसतो निवासं कुरुतो जीवने, सह मिलित्वा उत्क्रामतः अस्माच्छरीरादुत्क्रमणं कुरुतो

* यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिञ्छरीरे वसतः सहोत्क्रामतस्तस्यैषैव दृष्टिरिति टी०. F. G.

M 2

प्राणस्तस्यैषैव दृष्टिरेतद्विज्ञानं यत्रैतत्पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहा-

मरणे। पाठान्तरं यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राण इति। तस्य प्राणोपाधिकस्य एषैव इयमेव वक्ष्यमाणा दृष्टिः दर्शनापरपर्याया अवगतिः, अस्यामवस्थायां प्राणशब्दाभिधेयोऽवगन्तव्य इत्यर्थः। एषैव दृष्टिरिति व्याकरोति एतद्विज्ञानं यदेतत् सुषुप्तं तदेवात्मनः प्राणत्वविज्ञप्तिकारणं। एतच्छब्दार्थमाह, यत्र यस्यामवस्थायामेतत्सर्वविशेषबोधशून्यं यथा तथा पुरुषो वस्तुतः परिपूर्णोऽपि पुरिशयः सुप्तः शयनमधिगतः स्वप्नं जाग्रद्वासनारूपं पदार्थजातं न कञ्चन पश्यति कमपि नावलोकयति अथ तदा स्वप्नानवलोकनकालेऽस्मिन्मुखनासिकासञ्चारिणि तिरस्कृतज्ञानशक्तौ प्राण एव क्रियाशक्तावेव न त्वन्यत्र एकधा भवति एकत्वं गच्छति स्पष्टं, प्राणोपाधिकः प्राणशब्दार्हः पुरुषो भवतीत्यर्थः। ननु तदा वागादीनि करणानि क्व यान्तीत्यत आह, तत् तदास्मिन् प्राण एकधाभवनकाले एनं प्राणोपाधिकमात्मानं वाक्चक्षुःश्रोत्रमनांसि सविषयाणि लयं गच्छन्तीति पर्यायचतुष्टयेनाह, वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स्पष्टं। *ननु प्राणे लीनानां तेषां समुद्रे इव सरितां कुतः पुनरुत्पत्तिरित्यत आह, स प्राणोपाधिकः पुरुषो

* ननु प्राणेऽप्यपीतेषु कुतः पुना उत्पत्तिरिति B.

प्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः *सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः† स एष प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासीतेति सैषा प्राणे

यदा यस्मिन् काले प्रतिबुध्यते जागरणं गच्छति जागरणावसरे एतस्मादुत्पत्तौ दृष्टान्तमाह, यथा दृष्टान्ते अग्नेर्जातवेदसो जाज्वल्यमानात् विस्फुलिङ्गाः क्षुद्रा अग्निकणा विप्रतिष्ठेरन् विविधासु दिक्षु निर्गच्छन्ति एवमेव अनेनैव प्रकारेण न त्वन्यथा एतस्मात्प्राणोपाधिकादात्मन आनन्दात्मनः प्राणा वागादयो यथायतनं यादृशं स्थानं जिह्वादि तदुद्दिश्य विप्रतिष्ठन्ते विविधं निर्गच्छन्ति, प्राणेभ्यो वागादिभ्यो देवा अग्न्यादयः, विप्रतिष्ठन्त इत्यनुवर्तते अत्र वक्ष्यमाणे च, देवेभ्योऽग्न्यादिभ्यो लोका नामादयो विषयाः। जीवतः प्राणोपाधिकत्वमुक्त्वा मरणेऽपि प्राणोपाधिकत्वमाह, तस्य प्राणोपाधिकस्य एषैव मरणावस्थारूपैव न त्वन्या सिद्धिः प्रसिद्धिः। प्राणत्वे एषैव सिद्धिरिति व्याकरोति, एतन्मरणं सर्वप्रत्यक्षं विज्ञानं विज्ञायतेऽनेनेति विज्ञानं प्रमाणमिति यावत्। एतच्छब्दोक्तं मरणमाह, यत्र यस्यामवस्थायां यदा वा एतत्पुरुषः अयं पुमान् प्रत्यक्षो मनुष्यत्वाद्यभिमानी आर्तो

* सर्वा दिशो F. G. टी० नास्ति ।

† स एष इत्यादि स प्राण इत्यन्तं F. G. टी० नास्ति ।

सर्वाणीयं वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणस्त-स्यैषैव सिद्धिरेतद्विज्ञानं यत्रैतत्पुरुष आर्तो मरिष्यन्ना-बाल्यमेत्य सम्मोहमेति* तमाहुरुदक्रमीच्चित्तं न शृणो-ति न पश्यति न वाचा वदति न ध्यायति अथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहा-प्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैः ध्यानैः सहाप्येति† ‡स यदा-

जराव्याध्यादिना पञ्चत्वदुःखं प्राप्तो मरिष्यन्मरणं करिष्यन् आसन्नमरण इत्यर्थः, आबल्यमबलस्य दुर्बलस्य भाव आबल्यं हस्तपादाद्यवशत्वमित्यर्थः, न्येत्य नितरामागत्य मोहं बन्ध्वाद्य-परिज्ञानलक्षणं न्येति नितरामागच्छति, तत् तदाहुः समीप-स्थाः कथयन्ति। समीपस्थोक्तिमाह, उदक्रमीत् उत्क्रमणमकरो-च्चित्तं मनः। चित्तोत्क्रमणे लिङ्गान्याहुः न शृणोति न पश्यति न वाचा वदति न ध्यायति स्पष्टं, इत्यनेन प्रकारेणाहुरि[illegible]न्वयः। अथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैः नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन् एवमेवैतस्मादात्मनः

* आबल्यं न्येत्य सम्मोहं न्येति तदाहुरिति टी०. F. G.

† स यदा प्रतिबुध्यते यथाग्नेर्विस्फुलिङ्गा इत्यादि देवेभ्यो लोका इत्यन्तं पूर्वपठितं टी०. F. G. पुस्तकेषु वर्तते, तदन्ते च ३ चिह्नं।

‡ स यदास्माच्छरीरादुत्क्रामति वागस्मात् सर्वाणि नामान्यभिवि-सृजत इति टी०. F. G.

स्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति ॥ ३ ॥

वागेवास्मिन् सर्वाणि नामान्यभिविसृज्यन्ते वाचा सर्वाणि नामान्याप्नोति प्राण* एवास्मिन् सर्वे गन्धा अभिविसृज्यन्ते प्राणेन सर्वान् गन्धानाप्नोति चक्षु-

प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः। अथवा तदा तस्मिन् मरणकाले, प्रतिबुध्यते उत्पद्यते शरीरान्तरग्रहणं करोति, तस्मिन्नपि शरीरे मोहादिमुक्तो न भवतीत्यर्थः । व्याख्यातमन्यत् ॥ ३ ॥

एवं मरणकाले मूर्च्छायामिन्द्रियाणां लयमभिधाय शरीरादुत्क्रमणे तस्मिन्नेव लये विशेषमाह, स मुमूर्षुर्यदा यस्मिन् काले अस्मात्प्रत्यचात् शरीरात् शीर्णावयवात् देहादुत्क्रामति ऊर्ध्वं गच्छति तदा सहैवैतैः सर्वैरुत्क्रामति । वाक् वागिन्द्रियं, अस्मात् स्वामिनः, सर्वाणि निखिलानि नामानि स्वविषयभूतानि अभिविसृजते सर्वतः परित्यजति, विषयव्यापारात् सर्वथोपरमं प्राप्य प्रभोर्भोगं न प्रयच्छतीत्यर्थः । ननु यदि वाङ्नामान्यभिविसृजते अस्मात्तर्ह्यन्येन तत्प्राप्तिरस्तु इत्यत आह, वाचा सर्वाणि नामान्याप्नोति स्पष्टं । अथवा नाम्नां परित्यागश्चेद्वाक् करोति तथा च स्वयं प्राणे विलीना स्वविषयरहिता स्यादित्यत आह, वाचेत्यादि । अयमर्थः, न वाङ्मात्रं प्रलीयते प्राणे किन्तु प्राणो वाचा सह सर्वाणि नामान्याप्नोति, वाङ् स्वविषयरहिता प्राणे प्रलीयत इति । यथा वाक् तथा

* प्राणोऽस्मात् सर्वान् गन्धान् अभिविसृजत इति (प्राण इति टी०)

रेवास्मिन् सर्वाणि रूपाण्यभिविसृज्यन्ते चक्षुषा सर्वाणि रूपाण्याप्नोति श्रोत्रमेवास्मिन् सर्वे शब्दा अभिविसृज्यन्ते श्रोत्रेण सर्वांछब्दानाप्नोति मन एवास्मिन् सर्वाणि ध्यानान्यभिविसृज्यन्ते मनसा सर्वाणि ध्यानान्याप्नोति *सह ह्येतावास्मिंछरीरे वसतः

घ्राणचक्षुःश्रोत्रमनांसीति पर्यायचतुष्टयेनाह, घ्राणोऽस्मात् सर्वान् गन्धानभिविसृजते, घ्राणेन सर्वान् गन्धानाप्नोति। चक्षुरस्मात्सर्वाणि रूपाण्यभिविसृजते, चक्षुषा सर्वाणि रूपाण्याप्नोति। श्रोत्रमस्मात्सर्वान् शब्दानभिविसृजते, श्रोत्रेण सर्वांछब्दानाप्नोति। मनोऽस्मात्सर्वाणि ध्यानान्यभिविसृजते, मनसा सर्वाणि ध्यानान्याप्नोति। वाक्पर्यायवत् घ्राणचक्षुःश्रोत्रमनःपर्यायाः सविषयाः व्याख्येयाः। सा प्रसिद्धा एषा स यदेत्यादिनोक्ता, प्राणे प्राणोपाधिके परमात्मनि सर्वाप्तिः विषयेन्द्रियादिल‌क्षणस्य सर्वस्य प्राप्तिः। न चायं प्राणः पञ्चवृत्तिमात्रं किन्तु क्रियाज्ञानशक्त्युपाधिक आत्मेत्येतदुक्तमर्थं स्मारयति, यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामतः व्याख्यातं। ननु प्राणे सर्वेषां भूतानामेकीभाव उक्तो न तु प्रज्ञायां, तत्कथं प्राणप्रज्ञयोः सर्वात्मनैक्यमित्याशङ्क्य प्रज्ञाया अपि प्राणवत्सार्वात्म्यं वक्तुमाह, अथ प्राणस्य सार्वा-

* सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिंछरीरे वसतः सहोत्क्रामतोऽथ खलु यथा प्रज्ञायां सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्यामः। ४। इति टी०. F. G.

सहोत्क्रामतोऽथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्यामः ॥ ४ ॥

वागेवास्या एकमङ्गमुदूल्हं* तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्राण एवास्या एकमङ्गमुदूल्हं तस्य गन्धः परस्तात्प्रतिविहिता भूतमात्रा चक्षुरेवास्या एकमङ्गमुदूल्हं तस्य रूपं परस्तात्प्रतिविहिता

त्यकथनानन्तरं, खलु निश्चितं यथा एवमनेन प्रकारेण प्रज्ञायां ज्ञानशक्तौ चैतन्ये साक्षिणि सर्वाणि भूतानि निखिलानि वागादीनि सविषयाणि स्थिरजङ्गमशब्दाभिधेयानि एकं भवन्ति प्राणवदेकधा भवन्ति, तत् तथा व्याख्यास्यामः विस्पष्टमासमन्तात् कथयिष्यामः ॥ ४ ॥

एकं भावं प्रतिज्ञाय प्रथमतः प्रज्ञाया विभागमाह, तं वक्तुं वागेव वागिन्द्रियमेव प्रसिद्धं न त्वन्यत्, अस्याः प्रज्ञायाः एकमङ्गं एकं भागं गोरिवैकं स्तनं अदूढं अदूदुहत् स्वाधीनं कृतवतीत्यर्थः। तस्यै तस्याः दुग्धैकभागप्रज्ञायाः वाचः नाम वक्तव्यं शब्दगतं परस्तात् विषयत्वेन परस्मिन् बहिर्देशे प्रतिविहिता निर्मिता भूतमात्रा भूतभागः, मीयत इति मात्रा, तस्याः विषयत्वेन प्रतिविहिता भूतमात्रा नामेत्यन्वयः। यथा वाक् प्रज्ञायाः एकमङ्गमदूदुहत्, यथा च तस्याः परस्तात्प्र-

* उदूल्हमिति प्रायशः, चदूल्हमिति च क्वचित् A. उदूढमिति उद्गूढमिति च D. अदूढमिति F. टी०.

भूतमात्रा श्रोत्रमेवास्या एकमङ्गमुदूळ्हं तस्य शब्दः परस्तात्प्रतिविहिता भूतमात्रा जिह्वैवास्या एकमङ्गमुदूळ्हं तस्या अन्नरसः परस्तात्प्रतिविहिता भूतमात्रा हस्तावेवास्या एकमङ्गमुदूळ्हं तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा शरीरमेवास्या एकमङ्गमुदूळ्हं तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रोपस्थ एवास्या एकमङ्गमुदूळ्हं तस्यानन्दो रतिः प्रजातिः परस्ता-

---

तिविहिता भूतमात्रा नाम एवं प्राणचक्षुःश्रोत्ररसनहस्तशरीरोपस्थपादबुद्धिस्थसंविद एकैकमङ्गमदूदुहन्, आसां यथाक्रमं परस्तात्प्रतिविहिताः भूतमात्राः गन्धरूपशब्दान्नरसकर्मसुखदुःखानन्दरतिप्रजातीत्याविज्ञातव्यकामा इति पर्यायनवकेनाह, प्राण एवास्या एकमङ्गमुदूढं तस्य गन्धः परस्तात्प्रतिविहिता भूतमात्रा, चक्षुरेवास्या एकमङ्ग॰ूढं तस्य रूपं परस्तात्प्रतिविहिता भूतमात्रा, श्रोत्रमेवास्या एकमङ्गमदूढं तस्य शब्दः परस्तात्प्रतिविहिता भूतमात्रा, जिह्वैवास्या एकमङ्गमदूढं तस्या अन्नरसः परस्तात्प्रतिविहिता भूतमात्रा, हस्तावेवास्या एकमङ्गमदूढं तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा, शरीरमेवास्या एकमङ्गमदूढं तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रा, उपस्थ एवास्या एकमङ्गमदूढं तस्यानन्दो रतिः प्रजातिः परस्तात्प्रतिविहिता भूतमात्रा, पादावेवास्या एकमङ्गमदूढं तयोरित्याः परस्तात्प्रतिविहिता

त्प्रतिविहिता भूतमात्रा पादावेवास्या एकमङ्गमुदूल्हं तयोरित्याः परस्तात्प्रतिविहिता भूतमात्रा *मन एवास्या एकमङ्गमुदूल्हं तस्य धीः कामाः परस्तात्प्रतिविहिता भूतमात्रा ॥ ५ ॥

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान् गन्धानाप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि

भूतमात्रा, प्रज्ञैवास्या एकमङ्गमदूढं तस्यै धियो विज्ञातव्यं कामा: परस्तात्प्रतिविहिता भूतमात्रा। वाक्पर्यायवच्चुरादिपर्याया: नवापि व्याख्येया: ॥ ५ ॥

एवं प्रज्ञाया विभागमुक्त्वेदानीमविभागमाह, प्रज्ञया वाग्दुग्धयोक्तया संविदा वाचं वागिन्द्रियं समारुह्य सम्यक् तादात्म्यलक्षणेन सम्बन्धेनारोहणं कृत्वा, अहं वागस्मीत्यभिमानं प्राप्येत्यर्थः, वाचा उक्तप्रज्ञाभिन्नेनोक्तेनेन्द्रियेण सर्वाणि निखिलानि नामानि वक्तव्यानि आप्नोति वाचाधिरूढा प्रज्ञा प्राप्नोति। अयमर्थः, न प्रज्ञामन्तरेणोक्तमिन्द्रियं नोक्तमिन्द्रियमन्तरेणोक्तविषयप्राप्तिः, ततो यद्यद्विना न भवति नोपलभ्यते वा तत्तदात्मकं, यथा तन्तून् विनाऽनुपलभ्यमानः पटस्तन्त्वात्मकः, यथा शुक्तिकामन्तरेण चानुपलभ्यमानं रजतं शुक्त्या-

---

* प्रज्ञैवास्या एकमङ्गमदूढं तस्यै धिया विज्ञातव्यं कामाः परस्तात्प्रतिविहिता भूतमात्रेति F. C. टी०.

रूपाण्याप्नोति प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वाञ्छब्दानाप्नोति प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वानन्नरसानाप्नोति प्रज्ञया हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति प्रज्ञयोपस्थं समारुह्योपस्थेनानन्दं रतिं प्रजातिमाप्नोति प्रज्ञया पादौ समारुह्य पादाभ्यां सर्वा इत्या आप्नोति *प्रज्ञया मनः

त्मकं, तथा चोक्तमिन्द्रियमन्तरेणाविद्यमानोऽनुपलभ्यमानो विषय उक्तेन्द्रियात्मकः, उक्तं चेन्द्रियं प्रज्ञामन्तरेणानुपलभ्यमानं प्रज्ञात्मकमिति। यथा वाङ्नामनी प्रज्ञया भेदरहिते एवं घ्राणगन्धौ चक्षूरूपे जिह्वान्नरसौ हस्तकर्माणि शरीरसुखदुःखानि उपस्थानन्दरतिप्रजातयः पादगतयः प्रज्ञाधीर्विज्ञातव्यकामाश्चेत्याह, प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान् गन्धानाप्नोति, प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति, प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वान् शब्दानाप्नोति, प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वानन्नरसानाप्नोति, प्रज्ञया हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्माण्याप्नोति, प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति, प्रज्ञयोपस्थं समारुह्योपस्थेनानन्दं रतिं प्रजातिमाप्नोति, प्रज्ञया पादौ समारुह्य

---

* प्रज्ञयैव धियं समारुह्य प्रज्ञयैव धियो विज्ञातव्यं कामानाप्नोति ॥ ६ ॥ इति F. G. टी०.

समारुह्य मनसा सर्वाणि ध्यानान्याप्नोति ॥ ६ ॥

न हि प्रज्ञापेता वाङ्नाम किञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतन्नाम प्राज्ञासिषमिति न हि प्रज्ञापेतः प्राणो गन्धं कञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं गन्धं प्राज्ञासिषमिति न

पादाभ्यां सर्वा इत्या आप्नोति, प्रज्ञयैव धियं समारुह्य प्रज्ञयैव धिया विज्ञातव्यं कामानाप्नोति। वाक्पर्यायवत्पर्यायनवकमपि व्याख्येयं ॥ ६ ॥

ननु किं प्रज्ञया यावता, वागादिभिरेव स्वः स्वोऽर्थोऽवगम्यते इत्याशङ्क्य वागादीनां प्रज्ञारहितानां सत्यपि स्वार्थसम्बन्धे तदवगमहेतुत्वं नेति सर्वजनीनानुभवेनाह। न हि प्रज्ञापेता वाङ्नाम किञ्चन प्रज्ञपयेत्। हि यस्मात् प्रज्ञारहितं वागिन्द्रियं किमपि वक्तव्यं स्वं परं वा नावगमयेत् प्रज्ञारहिता वाक् स्वव्यापारं न कुरुते, कुर्वत्यप्यविवक्षितार्थमसम्बद्धार्थं वा कुर्यादित्यर्थः। ननु प्रज्ञारहिता न प्रज्ञपयेदित्यस्मिन्नर्थे किं प्रमाणमित्याशङ्क्य सर्वजनीनमनुभवमभिनयेन प्रमाणयति, अन्यत्र विषयान्तरे मे ममेन्द्रियस्वामिनः मनः अन्तःकरणं धीवृत्तिजनकं प्रज्ञासाचि अभूत् अभवत् इत्याह एवं ब्रूते। मनसोऽन्यत्रावस्थाने किं स्यादित्यत आह, नाहमेतन्नाम प्राज्ञासिषमिति। अहमिन्द्रियस्वामी एतत् त्वया कथ्यमानं

हि प्रज्ञापेतं चक्षूरूपं किञ्चन प्रज्ञापयेदन्यत्र मे मनो ऽभूदित्याह नाहमेतद्रूपं प्राज्ञासिषमिति न हि प्रज्ञापेतं श्रोत्रं शब्दं कञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं शब्दं प्राज्ञासिषमिति न हि प्रज्ञापेता जिह्वान्नरसं कञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमन्नरसं प्राज्ञासिषमिति न हि प्रज्ञापेतौ हस्तौ कर्म किञ्चन प्रज्ञापयेयातामन्यत्र नौ* मनो ऽभूदित्याहतुर्नावामेतत्कर्म प्राज्ञासिष्व इति न हि प्र-

नाम वक्तव्यं वागिन्द्रियस्य विषयमित्यर्थः, न प्राज्ञासिषं न प्रकर्षेण ज्ञातवानहं, उक्तमनुक्तं वा, उक्तमपि विशदवर्णविवचिताथं तद्विपरीतं वेति, इति अनेन प्रकारेण आहेत्यनुषङ्गः। अयमर्थः, परज्ञानाज्ञानयोरप्रत्यक्षत्वेऽपि परस्य तद्वचनलिङ्गेनानुमातुं शक्यते। तथा च प्रज्ञारहितमु[illegible]न्द्रियं न स्वव्यापारक्षममिति। यथा वाक् तथा प्राणचक्षुःश्रोत्रजिह्वाहस्तशरीरोपस्थपादप्रज्ञा इति पर्यायनवकेनाह, न हि प्रज्ञापेतः प्राणो गन्धं कञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह, नाहमेतं गन्धं प्राज्ञासिषमिति। न हि प्रज्ञापेतं चक्षूरूपं किञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह, नाहमेतद्रूपं प्राज्ञासिषमिति। न हि प्रज्ञापेतं श्रोत्रं शब्दं कञ्चन प्रज्ञपयेदन्यत्र

* अन्यत्र मे मनोऽभूदित्याह नाहमेतत्कर्म प्राज्ञासिषमिति F. G. टी०.

ज्ञापेतं शरीरं *सुखं न दुःखं किञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह †नाहमेतत्सुखं न दुःखं प्राज्ञासिषमिति न हि प्रज्ञापेत उपस्थ आनन्दं न रतिं न प्रजातिं काञ्चन प्रज्ञापयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमानन्दं न रतिं न प्रजातिं प्राज्ञासिषमिति न हि प्रज्ञापेतौ पादावित्यां काञ्चन प्रज्ञापयेयातामन्यत्र ‡नौ मनोऽभूदित्याहतुर्नावामेतामित्यां प्राज्ञासिष

मे मनोऽभूदित्याह, नाहमेतं शब्दं प्राज्ञासिषमिति। न हि प्रज्ञापेता जिह्वान्नरसं कञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह, नाहमेतमन्नरसं प्राज्ञासिषमिति। न हि प्रज्ञापेतौ हस्तौ कर्म किञ्चन प्रज्ञपयेयातामन्यत्र मे मनोऽभूदित्याह, नाहमेतत्कर्म प्राज्ञासिषमिति। न हि प्रज्ञापेतं शरीरं सुखं न दुःखं किञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह, नाहमेतत् सुखं न दुःखं प्राज्ञासिषमिति। न हि प्रज्ञापेत उपस्थ आनन्दं न रतिं न प्रजातिं काञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह, नाहमेतमानन्दं न रतिं न प्रजातिं प्राज्ञासिषमिति। न हि प्रज्ञापेतौ पादावित्यां काञ्चन प्रज्ञपयेयातामन्यत्र मे मनोऽभूदित्याह, नाहमेतामित्यां प्राज्ञासिषमिति। वाक्पर्यायवत्पर्यायाष्टकं व्याख्येयं। विज्ञातव्यकामयोर्बुद्धिमन्तरेणानुपलम्भस्य सर्वज-

* न सुखमिति D.　　† नाहमेतन्न सुखमिति D.

‡ अन्यत्र मे मनोऽभूदित्यादि पूर्ववत् F. G. टी०.

इति न हि प्रज्ञापेता धीः काचन सिध्येन्न प्रज्ञातव्यं प्रज्ञायेत ॥ ७ ॥

न वाचं विजिज्ञासीत वक्तारं विद्यात् न गन्धं विजिज्ञासीत घ्रातारं विद्यान्न रूपं विजिज्ञासीत द्रष्टारं*

णोनत्वाद्द्वयमेवोररीकृत्याह, न हि प्रज्ञापेता धीः काचन सिध्येत् कापि विज्ञातव्यकामादिभेदभिन्नाकारान्तःकरणवृत्तिः, प्रज्ञापेताऽसाक्षिका न सिध्येत्, न प्रज्ञायते नावगम्यत इत्यर्थः। ननु मिथोऽपेक्षावतामिन्द्रियतद्विषयप्राणप्रज्ञानां तुल्यत्वात्कथं प्राणोपाधिका प्रज्ञैवोपास्येति नियम इत्याशङ्क्य प्रज्ञायामेवान्येषां कल्पितत्वमाह, न प्रज्ञातव्यं प्रज्ञायेत प्रज्ञातव्यं धियो विषयस्वरूपं न प्रज्ञायेत नावगम्यते योग्यानुपलब्ध्या बुद्धेरभाव इत्यर्थः ॥ ७ ॥

इन्द्रियैः सह प्रज्ञाया अभेदश्चेत् तर्हि त्वं मामायुरमृतमित्युपास्खेत्यत्र वाचनिकया रीत्या वागेवोपास्या स्यादित्यत आह, न वाचं विजिज्ञासीत वाचं वागिन्द्रियं उपास्यत्वेवं न विजिज्ञासीत न विचारयेन्नावगच्छेदित्यर्थः। तर्हि किमवगम्यमित्यत आह, वक्तारं वागिन्द्रियप्रेरकमानन्दात्मानं सर्वकरणवृत्तिसाक्षिणमित्यर्थः, विद्यात् प्राणोऽस्मि प्रज्ञात्मा वक्तायुरमृतमित्यवगच्छेत् । अथवा प्राणोऽस्मि प्रज्ञात्मा वक्तेत्येवावगच्छेत्, अत्रैवायुरमृतयोरन्तर्भावात्। अतएव प्राण-

* रूपविद्यमिति F. G. टा०.

विद्यान्न शब्दं विजिज्ञासीत श्रोतारं विद्यान्नान्नरसं विजिज्ञासीतान्नरसस्य विज्ञातारं विद्यान्न कर्म विजिज्ञासीत कर्तारं विद्यान्न सुखदुःखे विजिज्ञासीत सुख-

प्रज्ञे सर्वव्यापिन्यावङ्गीकृत्य सह ह्येताविन्याद्युक्तं, *पूर्वं न वाचं विजिज्ञासीतेति करणनिषेधः कृतः, अन्ते च न मनो विजिज्ञासीतेति तस्यैव निषेधं करिष्यति, तेनाद्यन्ताभ्यामिन्द्रियनिषेधः सर्वेन्द्रियोपलक्षणार्थं, मध्ये पर्यायाष्टकेन विषयं निषेधति पूर्वोत्तरयोरपि विषयनिषेधोपलक्षणार्थं। न चात्रानेकश इन्द्रियप्राये शरीरस्य पाठाच्छरीरमपीन्द्रियमिति मन्तव्यं, करणत्वस्य विषयोपलब्धौ विवक्षितत्वात् तस्य च भोगायतनेऽपि शरीरे यथाकथञ्चिदपि सम्पादयितुं सुशकत्वात्। अथैवमपि प्रायपाठस्याग्रहः। तर्हि शरीरशब्देन त्वगिन्द्रियमस्तु। न चैवं सुखदुःखयोर्विषयत्वं विरुध्यते, ताभ्यामुपलक्षितस्य तज्जनकस्य स्पर्शस्यैव कल्पयितुं शक्यत्वात्, एवञ्च कल्पनागौरवेऽपि प्रायपाठो न बाधितो भवति। पर्यायाष्टकविषयं निषिध्य तत्तद्विषयिण एवावगम्यत्वमाह, न गन्धं विजिज्ञासीत घ्रातारं विद्यात्, न रूपं विजिज्ञासीत रूपविद्यं विद्यात्, न शब्दं विजिज्ञासीत श्रोतारं विद्यात्, नान्नरसं विजिज्ञासीतान्नरसस्य विज्ञातारं विद्यात्, न कर्म विजिज्ञासीत कर्त्तारं विद्यात्, न

* अथ वागादिभ्यः प्राणो मुख्यः इति प्राणे ब्रह्मामृतत्वोपासनं समर्पितं, अधुना वक्तर्यात्मनि प्राणस्यापि प्राणे ब्रह्मामृतत्वबुद्धिरुपदिश्यते इति रहस्यमिति अधिकः पाठः D.

दुःखयोर्विज्ञातारं विद्यान्नानन्दं न रतिं न प्रजातिं* विजिज्ञासीतानन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यान्नेत्यां विजिज्ञासीतैतारं विद्यान्न मनो विजिज्ञासीत मन्तारं विद्यात्ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न

सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यात्, नानन्दं न रतिं न प्रजातिं विजिज्ञासीतानन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यात्, नेत्यां विजिज्ञासीतैतारं विद्यात्। रूपविद्यं रूपविदं, एतारं गन्तारं। स्पष्टमन्यत्। आदाविन्द्रियं निषिध्येन्द्रियस्वामिनो यथा ज्ञातव्यत्वमुक्तं तथान्तेऽप्याह, न मनो विजिज्ञासीत मन्तारं विद्यात्। वाक्पर्यायवद्व्याख्येयं। एवं सर्वेन्द्रियविषयसाक्षिणो ज्ञानमभिधाय प्रसङ्गात्सर्वानर्थमूलं संसारचक्रमिन्द्रियविषयाभ्यामितरेतरसापेक्षाभ्यां प्रवर्तते, अन्यतराभावे च न प्रवर्तत इत्यभिप्रायवानाह। ताः प्रकृताः संसारचक्रस्य मूलभूताः, वै प्रसिद्धाः एताः प्रत्यक्षा अनुमेयास्च, दशैव दशसङ्ख्याका एव न त्वधिकाः, शरीरे त्वचः सुखदुःखयोः स्पर्शस्य चान्तर्भावेन मनसस्च सर्वेन्द्रियेषु मन्तव्यस्य च सर्वेषु विषयेषु, भूतमात्राः वक्तव्याद्या विषयाः, अधिप्रज्ञं प्रज्ञाभिन्नानीन्द्रियाण्यधिकृत्य वर्तन्त इति अधिप्रज्ञं।

---

* प्रजापतिमिति क्वचित् पठ्यते।

प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किञ्चन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता

दश दशसङ्ख्याकाः प्रज्ञामात्राः वागादीनीन्द्रियाणि अधिभूतं भूतमात्रा वक्तव्यादीनि भूतानि तानि विषयत्वेनाधिकृत्य वर्तन्त इत्यधिभूतं। यत् यदि, हि प्रसिद्धाः, भूतमात्राः नामादिरूपाः, स्युः नेति वहिरेवावगन्तव्यं*, न भवेयुः न प्रज्ञामात्राः स्युः, उक्तानीन्द्रियाणि न भवेयुः, न हि निर्विषयमिन्द्रियं भवति, यत् यदि वा पक्षान्तरे प्रज्ञामात्राः उक्तानीन्द्रियाणि न स्युः न भवेयुः न भूतमात्राः स्युः उक्ता भूतमात्रा न भवेयुः। तत्र हेतुमाह, न ह्यन्यतरतो रूपं किञ्चन सिध्येत्। अन्यतरतः एकस्मात् प्रज्ञामात्राभूतमात्रयोर्मध्ये हि यस्मात् किमपि विषय इन्द्रियं वा न सिध्येत्। अयमर्थः। न हि विषयो विषयेणेन्द्रियं वेन्द्रियेणावगम्यते, किन्तर्हि इन्द्रियेण विषयो विषयेणेन्द्रियमिति। ननु यदि विषयेन्द्रियमितरेतरसापेक्षं तर्ह्यस्य परस्परं विभिन्नत्वात् प्रज्ञाया अप्येतन्निमित्तो विभेदः स्यात्, तथा च यथा प्रज्ञायां सर्वाणि भूतान्येकं भवन्तीति प्रतिज्ञा व्याहता स्यादित्यत आह, नो एतन्नाना एतत् प्रज्ञामात्राभूतमात्रारूपं नो नाना न भेदवत्। नानात्वाभावं प्रतिज्ञाय तदुपपादयितुं दृष्टा-

* एतावता नेति मूले नासीदिति प्रतीयते।

एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानन्दो*ऽजरोऽमृतो न साधुना कर्मणा भूयान् †भवति नो एवा-

न्तमाह, तत् तत्र यथा दृष्टान्ते रथस्य रथचक्रस्य अरेषु नाभिप्रतिष्ठितेषु तीक्ष्णाग्रेषु काष्ठेषु नेमिः अरेभ्यो बहिर्देशवर्ति वर्तुलं काष्ठं अर्पितः, अर्पिता अराधारा वर्तन्त इत्यर्थः। नाभौ अन्तःकाष्ठे अराधारच्छिद्रवति वर्तुले, अराः दीर्घाणि तीक्ष्णानि काष्ठानि, अर्पिताः प्रतिष्ठिताः, एवमेव तद्वदेव न त्वन्यथा, एताः उपलभ्यमानाः भूतमात्राः विषयाः नेमिस्थानीयाः प्रज्ञामात्रासु इन्द्रियेषु अरस्थानीयेषु अर्पिताः प्रतिष्ठिताः, प्रज्ञामात्राः इन्द्रियाण्यरभूतानि प्राणे मुखनासिकासञ्चारिणि नाभिस्थानीये अर्पिताः प्रतिष्ठिताः। स प्राणोपाधिकः, एषः प्रज्ञात्मकधीवृत्तौ प्रतिफलितः, प्राज्ञः प्रज्ञया नित्यया स्वयंप्रकाशया युक्तः, आत्मा अस्मत्प्रत्ययव्यवहारयोग्यः, आनन्दः सुखैकस्वभावः, अजरः जरारहितः, अमृतः मरणरहितः स्वयंप्रकाशविज्ञानानन्दात्मस्वरूपः सर्वविक्रियाशून्य इत्यर्थः। नन्वेवंरूपस्यापि साध्वसाधुकर्मभ्यामाधिक्यन्यूनत्वे स्यातां समुद्रस्येवेन्दूदयास्तमयाभ्यामित्यत आह, न साधुना कर्मणा भूयान् साधुना शा-

* प्रज्ञात्मानन्त इति D. † भवतीति F. G. टी० नास्ति।

साधुना कनीयानेष* ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष उ एवासाधु कर्म का-

स्वविहितेन कर्मणा पुण्यरूपेण न भूयान् नाधिको भवतीति शेषः। नो एव नैव असाधुना शास्त्रप्रतिषिद्धेन कर्मणा कनीयान् कनिष्ठो न्यून इत्यर्थः, भवतीति शेषः। अयमर्थः। विक्रियावतो ह्यतिशयो दृष्टः समुद्रादेः, न तु विपरीतस्य गगने तददर्शनादिति। साध्वसाधुकर्मणी एनं न स्पृशत इत्यस्मिन्नर्थे हेतुमाह, एष ह्येव हि यस्मादेष एव प्राण प्रज्ञोपाधिकः एव नलन्यः, एनं शरीराद्यात्मत्वाभिमानिनं साधु कर्म शास्त्रविहितं कर्म धर्मरूपं कारयति अनिच्छन्तमपि अनुष्ठापयति, भूतमिव कस्यचिच्छरीर आविष्टं स्वयं निर्व्यापारं सत् शरीराभिमानिनं विविधान् व्यापारान् कारयति, तं एनं प्रकृतं वक्ष्यमाणं यं प्रसिद्धं स्वर्गार्थिनं अन्वानुनेषति आत्मानमनु पश्चादासमन्तात् नुनेषति निनीषते ऊर्द्धं नेतुमिच्छतीत्यर्थः। एष उ एव अपि उक्त एव नलन्यः, एनं शरीराद्यभिमानिनं असाधु कर्म शास्त्रनिषिद्धं कर्म पातकरूपं कारयति अनिच्छन्तमप्यनुष्ठापयति तं प्रियसुखमनर्थार्थिनं यं प्रसिद्धं पातकिनं एभ्यः प्रत्यक्षेभ्यः लोकेभ्यः मनुष्यादिनिवासेभ्यः नुनत्सते निनीषते

* एष ह्येवैनं साधु कर्म कारयति तं यमन्वानुनेषत्येष उ एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो नुनुत्सत एष लोकपाल एष लोकाधिपतिरेष सर्वेशः स म आत्मेति विद्यादिति F. G. टी०।

रयति तं यमधो निनीषत एष लोकपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्यात् स म आत्मेति विद्यात् ॥ ८ ॥

इत्यारण्यके कौषीतकिब्राह्मणोपनिषदि तृतीयोऽध्यायः समाप्तः ॥ * ॥

अधो नेतुमिच्छतीत्यर्थः । साध्वसाधुकर्मकारयितृत्वं स्वर्गनरकनयनार्थमित्युक्तं तदप्यस्य प्रभुत्वादुपपन्नमित्याह, एषः स्वर्गनरकयोर्नेता लोकपालः लोकानां साधूनां सुखेनासाधूनां दुःखेन च पालको रक्षको लोकपालः । तथा च लोकपालत्वं मन्वादिवत्स्यादित्यत आह, एषः उक्तः लोकाधिपतिः लोकानां साधूनामसाधूनां चाधिष्ठाय पालयिता महाराजवल्लोकाधिपतिः। तथापि महाराजवत् कांश्चिदेव लोकान् प्रत्यधिपतित्वं स्यादित्यत आह, एष उक्तः सर्वे सर्वस्य निखिलस्य भूतभौतिकस्येशो नियन्ता सर्वेशः । स उक्तः सर्वेशत्वादिगुणः मे ममेन्द्रस्य वक्तुः आत्मा अस्मत्प्रत्ययव्यवहारयोग्यो मामेव विजानीहीति मयोक्तः इति विद्यात् एवं जानीयात् स म आत्मेति विद्यात् व्याख्यातं । वाक्याभ्यासोऽध्यायपरिसमाप्त्यर्थः ॥ ८ ॥

इति श्रीशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां तृतीयोऽध्यायः ॥ * ॥

*अथ ह वै गार्ग्यो बालाकिरनूचानः संस्पष्ट† आस सोऽवसदुशीनरेषु सवसन्मत्स्येषु कुरुपञ्चालेषु काशि-

पूर्वाध्याये प्राणोपाधिक आत्मोक्तस्तत्र च भवति कस्यचिद्बुद्धिभ्रमः प्राण एव चैतन्यविशिष्ट आनन्दादिगुणकः आत्मेति, तद्भ्रमनिवारणार्थं प्राणात् सुषुप्तावस्थादपगतचैतन्यात्परं चेतनमानन्दात्मानं विवक्षुः पूर्वोत्तरपक्षाभ्यां ब्रह्मविद्याया अमानित्वादिगुणमन्तरेणानर्हतेति दुर्लभत्वं दर्शयितुमाख्यायिकामाह, गार्ग्यः गर्गगोत्रीयः एतन्नामा वा ह किल वै प्रसिद्धो धृष्टत्वेन अत्यन्तरे बालाकिः बलाकस्यापत्यं अनूचानः अनु आचार्यं वदन्तमनु स्वयमप्युच्चारयतीत्यनूचानः अधीतवेद इत्यर्थः । संस्पष्टः सम्यक्स्पष्टः सर्वत्र प्रथितकीर्तिरित्यर्थः, आस बभूव । सः प्रकृतो गार्ग्यः अवसत् निवासमकरोत्, उशीनरेषु उशीनरसञ्ज्ञकेषु देशेषु सवसन् सञ्चरन् स्वकीर्तिकामः सर्वत्र पर्यटन्नित्यर्थः । मत्स्येषु मत्स्यसञ्ज्ञकेषु देशेषु, अवसदिति अत्र वक्ष्यमाणयुग्मद्वये चानुवर्तते, कुरुपञ्चालेषु कुरुसञ्ज्ञकेषु पञ्चालसञ्ज्ञकेषु च कुरुपञ्चालेषु, काशीविदेहेषु काश्युपलक्षितेषु विदेहसञ्ज्ञकेषु च काशीविदेहेषु, इति एवं प्रकारेष्वन्येष्वपि त्रैवर्णिकनिवासदेशेष्ववसदित्यर्थः । स नानादेशवासी प्रथितकीर्तिर्गर्वाढ्यो गार्ग्यः ह किल

* गार्ग्यो ह वै बालाकिरिति F. G. टी० । † संस्पृष्ट इति A.

विदेहेष्विति स हाजातशत्रुं *काश्यमाव्रज्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं †दद्म

अजातशत्रुं न विद्यते जात उत्पन्नो यदपेक्षया शत्रुः सोऽयं सार्थनामधारी सर्वत्र समबुद्धिः अजातशत्रुः, तं काश्यं काशीदेशाधिपतिं एत्य कदाचित् समीपं प्राप्य उवाच उक्तवान्। गार्ग्यःकिमाह, ब्रह्म अनुपचरितब्रह्मशब्दाभिधेयं ते तुभ्यमजातशत्रवे ब्रवाणि, यदि भवतोऽनुज्ञा तदा वदानि, इति अनेन प्रकारेण उवाचेत्यन्वयः। तं एवं वदन्तं गार्ग्यं ह किल उवाच उक्तवान् अजातशत्रुः अजातशत्रुनामा राजा। अजातशत्रुःकिमाह, सहस्रं गवां सहस्रं दद्मः वयं राजानोऽन्येऽपि कार्ये प्रभूतं प्रयच्छामः किमुतास्मिन्नर्थे त्वादृशानामित्यर्थः, ते तुभ्यं ब्राह्मणाय ब्रह्मविदे दानपात्राय। नेयं ब्रह्मविद्यायाः दक्षिणा किन्तु एतस्यां इदानीमुक्तायां वाचि ब्रह्म ते ब्रवाणीत्येवंरूपवाक्श्रावनिमित्तं। जनकः जनकनामा मिथिलेश्वरोऽत्र ब्रह्मविद्यायाः सधनाया दाता जनकः स एव ब्रह्मविद्यायाः प्रतिग्रहीता, इत्यनेन प्रकारेण मामज्ञात्वा, वै प्रसिद्धाः उ अपि जनाः त्रैवर्णिकाः व्यर्थं धावन्ति गच्छन्ति। अयमर्थः। ब्रह्मविद्यायाः सोपायायाः दाता वक्ता च पितेत्येवं वदन्तो जना मिथिलेश्वरमेव गच्छन्ति, अपि मां

* काश्यमेत्योवाचेति F. G. टी०।

† दद्मि त इतीति D. दद्म (दद्मः इति टी०) त एतस्यामिति F. G. टी०।

इत्येतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति ॥ १ ॥

*आदित्ये बृहच्चन्द्रमस्यन्नं विद्युति सत्यं स्तनयित्नौ शब्दो वायाविन्द्रो वैकुण्ठ आकाशे पूर्णमग्नौ विषा-

तादृशं ततोऽप्यभ्यधिकं वा न जानन्ति, इत्यनेन प्रकारेणोवाचेत्यन्वयः ॥ १ ॥

सः उक्तः ह किल उवाच उक्तवान् बालाकिः बलाकस्यापत्यं, य एव प्रसिद्ध एव न त्वन्यः, एषः मादृशस्य प्रत्यक्षः, आदित्ये आदित्यमण्डले पुरुषः पुरुषाकारश्चेतनः तमेव उक्तस्थानस्थमेव न त्वन्यं, अहं गार्ग्यो ब्रह्मवित् उपासे विजातीयप्रत्ययशून्येन सजातीयप्रत्ययप्रवाहेण ब्रह्मेति साक्षात्कुर्वे, इति अनेन प्रकारेणोवाचेत्यन्वयः। तं एवं ब्रुवाणं गार्ग्यं, ह किल, उवाच उक्तवान् अजातशत्रुः एतन्नामा, हस्तसञ्ज्ञया निवारयन्, मा मा आबाधायां द्विर्वचनं माङः, एतस्मिन् उक्तपुरुषे उक्तपुरुषोपदेशनिमित्तमित्यर्थः, आवयोर्ज्ञाने समाने सति समवादयिष्ठाः त्वं गुरुरहं शिष्य इति गुरुशिष्योक्तिरूपं संवादं मा कारय, एतस्मिन् कार्यमाणे वयं बाधिताः स्याम। ननु यद्यपि त्वं जानीषे एतं पुरुषं तथापि तद्गुणानुपासनाफलञ्च न जानीष इत्यत आह। बृहन् अभ्यधिकः पाण्डरवासाः शुक्लगुणोदकवस्त्रः, चन्द्रमसः सूर्यसु-

* आदित्य इत्यादि सत्यस्येत्यन्तं F. G. टी० नास्ति।

P

सहिरित्यप्सु तेज इत्यधिदैवतमथाध्यात्ममादर्शे प्रति-
रूपश्छायायां द्वितीयः प्रतिश्रुत्कायामसुरिति शब्दे

सुषुम्नानाडीरूपत्वादेतौ शाखान्तरे सोमगुणौ सूर्येऽप्यविरुद्धौ, *अतिष्ठाः सर्वाणि भूतान्यतीत्य तिष्ठतीत्यतिष्ठाः, सर्वेषां भूतानां निखिलानां स्थिरजङ्गमानां मूर्द्धा मस्तकं, इति अनेन प्रकारेण, वै प्रसिद्धः सर्वेषां ब्रह्मविदां निरभिमानिनां अहं अजातशत्रुः एतं त्वयोक्तं पुरुषं उपासे उपासनया साक्षात्कुर्वे, इति उक्तपुरुषगुणसमाप्त्यर्थः। सः प्रकृतः यः प्रसिद्धः उपासकः, ह किल, एतं उक्तगुणकं पुरुषं एवमुपास्ते उक्तगुणोपासनया साक्षात्कुरुते, सः अतिष्ठाः सर्वेषां भूतानां मूर्द्धा व्याख्यातं भवति स्पष्टं, यद्गुणं ब्रह्मोपास्ते स्वयमपि तद्गुणो भवति ॥ २ ॥

स होवाच बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः सोमो राजान्नस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्तेऽन्नस्यात्मा भवति ॥ ३ ॥ स होवाच बालाकिर्य एवैष विद्युति पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठास्तेजस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते तेजस्यात्मा भवति ॥ ४ ॥ स होवाच बालाकिर्य एवैष स्तनयित्नौ पुरुषस्तमेवाहमुपास इति। तं

* तिष्ठाः अतिष्ठा इति B. C. E.

मृत्युः स्वप्ने यमः शरीरे प्रजापतिर्दक्षिणेऽक्षिणि वाचः सव्येऽक्षिणि सत्यस्य ॥ २ ॥

होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः शब्दस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ॥ ५ ॥ स होवाच बालाकिर्य एवैष आकाशे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः पूर्णमप्रवर्ति ब्रह्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नो एव स्वयं नास्य प्रजा पुराकालात्प्रवर्तते ॥ ६ ॥ स होवाच बालाकिर्य एवैष वायौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते जिष्णुर्हि *वाऽपराजयिष्णुरन्यतस्त्यजायी भवति ॥ ७ ॥ स होवाच बालाकिर्य एवैषोऽग्नौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा विषासहिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विषासहिर्हैवान्येषु भवति ॥ ८ ॥ स होवाच बालाकिर्य एवैषोऽप्सु पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा नाम्नस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नाम्नस्यात्मा भवतीत्यधिदैवतमथाध्यात्मं ॥ ९ ॥ स होवाच

---

* वाऽपराजिष्णुरिति F. G.

स होवाच *बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा †मैतस्मिन्

बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायां पुत्र आजायते नाप्रतिरूपः॥ १०॥ स होवाच बालाकिर्य एवैष प्रतिश्रुत्कायां पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विन्दते द्वितीयान् ‡द्वितीयवान् भवति॥ ११॥ स होवाच बालाकिर्य एवैष शब्दः पुरुषमन्वेति तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा असुरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात् सम्मोहमेति॥ १२॥ स होवाच बालाकिर्य एवैष छायापुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा मृत्युरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्प्रमीयते॥ १३॥ स होवाच बालाकिर्य एवैष शारीरः पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन्

---

* बालाकिरित्यनेकत्र पाठान्तरं। † मैतस्मिन् समवादयिष्ठा बृहन् पाण्डरवासा अतिष्ठा इति F. G. टी॰ (ग्रामा(तष्ठा इति F.)।

‡ द्वितीयादिति टी॰।

संवादयिष्ठा बृहत्पाण्डुरवासा अतिष्ठाः सर्वेषां भूतानां मूर्द्धेति वा अहमेतमुपास इति स यो हैतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्द्धा भवति ॥ ३ ॥

समवादयिष्ठाः प्रजापतिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः ॥ १४ ॥ स होवाच बालाकिर्य एवैष प्राज्ञ आत्मा येनैतत्सुप्तः* स्वप्नया चरति तमेवाहमुपास इति । तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः यमो राजेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते सर्वं हैवास्मा इदं श्रैष्ठ्याय यम्यते ॥ १५ ॥ स होवाच बालाकीर्य एवैष दक्षिणेऽक्षन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा नाम्न आत्मा अग्नेरात्मा ज्योतिष आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥१६॥ स होवाच बालाकिर्य एवैष सव्येऽक्षन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषामात्मा भवतीति ॥ १७ ॥

चन्द्रमसि चन्द्रमण्डले, सोमो राजा प्रियदर्शनो दीप्तिमान्। अन्नस्यात्मा चतुर्विधस्यादनीयस्यात्मा कारणं स्वरूपं वा फलहेतुः तत्स्वरूपस्तद्दान् भवतीति वा व्याख्येयं ॥ ३ ॥

---

* सुप्तमिति F.

स होवाच बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमे-
वाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्
संवादयिष्ठा अन्नस्यात्मेति वा अहमेतमुपास इति
स यो हैतमेवमुपास्तेऽन्नस्यात्मा भवति ॥ ४ ॥

स होवाच बालाकिर्य एवैष विद्युति पुरुषस्तमेवाह-
मुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवा-
दयिष्ठाः सत्यस्यात्मेति वा अहमेतमुपास इति स यो
हैतमेवमुपास्ते सत्यस्यात्मा भवति ॥ ५ ॥

स होवाच बालाकिर्य एवैष स्तनयित्नौ पुरुषस्त-
मेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन्
संवादयिष्ठाः शब्दस्यात्मेति वा अहमेतमुपास इति
स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति ॥ ६ ॥

विद्युति सौदामिनीमण्डले, तेजस्यात्मा तेजसः कारणं स्वरूपं वा ॥ ४ ॥ स्तनयित्नौ मेघमण्डले, शब्दस्यात्मा ध्वनिवर्णादि-भेदभिन्नस्य शब्दस्य कारणं स्वरूपं वा ॥ ५ ॥ आकाशे गगने ऽव्याकृते वा, पूर्णं परिपूर्णं, अप्रवर्ति क्रियाशून्यं, ब्रह्म बृहत् सर्वस्मादभ्यधिकं, पूर्यते प्रजया पशुभिः, पूर्णगुणोपासनफलं पुत्रगवादिपरिपूर्तिः। अप्रवर्तिगुणोपासनफलमाह, नो एव स्वयं नास्य प्रजा पुरा कालात् प्रवर्तते, शतसंवत्सरात्कालात्पूर्वं

स होवाच बालाकिर्य एवैष वायौ पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते जिष्णुर्ह वा अपराजयिष्णुरन्यतस्त्यजायी भवति ॥ ७ ॥

स होवाच बालाकिर्य एवैष आकाशे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठाः पूर्णमप्रवर्त्ति ब्रह्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ ८ ॥

स्वयमुपासकः नो एव नैव प्रवर्तते प्रमीयते, अस्योपासकस्य प्रजा पुत्रादिका पुरा कालात्प्रवर्तत इत्यनुवर्तते ॥ ६ ॥ वायौ पवने, इन्द्रः परमैश्वर्यसम्पन्नः, वैकुण्ठः विगता कुण्ठा परेण निवारणा यस्मात्स विकुण्ठः, विकुण्ठ एव वैकुण्ठः, अपराजिता सेना न परैः पराजिता सेना अपराजिता सेना। इन्द्रगुणफलमाह, जिष्णुर्हि वा जयनशीलः हि प्रसिद्धौ वाशब्दः एवकारार्थः। वैकुण्ठगुणफलमाह, अपराजयिष्णुः अपराजिष्णुः परैर्जेतुमशक्यशीलः। अपराजितसेनागुणफलमाह, अन्यतस्त्यजायी अन्यतो भवोऽन्यतस्त्यो वैरी तज्जयलक्षणं

स होवाच बालाकिर्य एवैषोऽग्नौ पुरु मेवाह-मुपास इति तं होवाचाजातशत्रुर्मा मै न् संवादयिष्ठा विषासहिरिति वा अहमेतमुपास ति स यो हैतमेवमुपास्ते विषासहिर्ह वा अन्येषु भव ॥ ९ ॥

स होवाच बालाकिर्य एवैषोऽप्सु पुरुषस्तमेवाह-मुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठास्तेजस आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते तेजस आत्मा भवतीत्यधिदैवत-मथाध्यात्मं ॥ १० ॥

शीलमस्येत्यन्यतस्त्यजायी ॥ ७ ॥ अग्नौ जातवेदसि, वि हिः विविधसहनशीलो दुःसहो वान्यैः, हैवान्वेष भवति, प्रसिद्ध एव न त्वन्यः, उपासनमनु एष उपासको भवति ॥ ८ ॥ अप्सु जलेषु, नाम्नस्यात्मा नाम्नस्य नाम्न आत्मा कारणं स्वरूपं वा भवति । न च शाखान्तरप्रतिरूपगुणेन विरोधः, अस्ति हि सादृश्यं नाम्नो वस्तुना, तथा हि घट इति वस्तु घट इति नामेति वात्यन्तसादृश्यस्योपलम्भात् । इत्यधिदैवतं, अनेन प्रकारेण दैवत-मधिकृत्योक्तमधिदैवतं । अथ अधिदैवतोपासनकथनानन्तरं अध्यात्मं आत्मानं शरीरमधिकृत्योच्यमानमुपासनमध्यात्मं ॥ ९ ॥ आदर्शे दर्पणे भास्वरद्रव्ये इत्यर्थः । प्रतिरूपः सदृशो रोचि-

स होवाच बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रतिरूपो हैवास्य प्रजायामाजायते नाप्रतिरूपः ॥ ११ ॥

स होवाच बालाकिर्य एवैष छायायां पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विन्दते द्वितीयात् द्वितीयवान् हि भवति ॥ १२ ॥

ष्णुरित्यर्थः। प्रतिरूपो हैवास्योपासकस्य सदृशः प्रसिद्ध एव, प्रजायां प्रजासन्ताननिमित्तं, पुत्रः स्रष्टुः, आजायते उत्पद्यते, नाप्रतिरूपः न विलक्षणः ॥ १० ॥ प्रतिश्रुत्कायां श्रुत् श्रवणं, श्रवणं प्रत्यधितिष्ठति प्रतिश्रुत्का दिक्, तस्यां द्वितीयः द्विसङ्ख्यापूरणः अनपगोऽपगमनशून्यः। द्वितीयगुणस्य फलमाह, विन्दते लभते द्वितीयात् भार्याशरीरात् द्वितीयमिति शेषः। अनपगगुणस्य फलमाह, द्वितीयवान् भवति अनपगपुत्रपौत्रादिर्भवतीत्यर्थः ॥ ११ ॥ शब्दः पुरुषमन्वेति गच्छन्तं पुरुषं योऽयं ध्वन्यात्मकः शब्दः पश्चाद्गच्छति। असुः जीवनहेतुः, सम्मोहं मरणं, एति गच्छति। नो एवेत्यादिकमाकाशपर्याये

स होवाच बालाकिर्य एवैष प्रतिश्रुत्कायां पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठा असुरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते न पुरा कालात् सम्मोहमेति ॥ ॥ १३ ॥

स होवाच बालाकिर्य एवैष शब्दे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठा मृत्युरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते न पुरा कालात्प्रैतीति ॥ १४ ॥

स होवाच बालाकिर्य एवैतत्पुरुषः सुप्तः स्वप्नया* चरति तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा

व्याख्यातं ॥ १२ ॥ छायापुरुषः छायारूपः पुरुषः, मृत्युर्मरणहेतुः । नो एवेत्यादिकमाकाशपर्याये व्याख्यातं, 'प्रमीयते निधनं गच्छति ॥ १३ ॥ शारीरः शरीरे भवः, प्रजापतिः प्रजायाः पालकः, प्रजायते प्रजया पशुभिः प्रजापशुवृद्धिर्भवति ॥ १४ ॥ प्राज्ञः नित्यया प्रज्ञया युक्तः प्राणोपाधिकः, आत्मा आत्मशब्दप्रत्ययालम्बनी, येन प्राज्ञेनात्मना एतत्सुप्तः एतत्स्वप्नदर्शनरूपं शयनं प्राप्तः स्वप्नया चरति स्वप्नेन ग-

---

* स्वप्न्ययेति A.

मैतस्मिन् संवादयिष्ठा यमो राजेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते सर्वं हास्मा इदं श्रैष्ठ्याय यम्यते ॥ १५ ॥

स होवाच बालाकिर्य एवैष शरीरे पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठाः प्रजापतिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिर्यशसा ब्रह्मवर्चसेन स्वर्गेण लोकेन सर्वमायुरेति ॥ १६ ॥

स होवाच बालाकिर्य एवैष दक्षिणेऽक्षिणि पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठा वाच आत्माग्नेरात्मा ज्योतिष

च्छति स्वप्नान् पश्यतीत्यर्थः । यमो राजा नियमनहेतुर्दीप्तिमान् । सर्वं निखिलं, ह प्रसिद्धं, अस्मै अस्योपासकस्य इदं प्रत्यक्षादिप्रमाणैरवगम्यमानं, श्रैष्ठ्याय अधिकत्वाय यम्यते ॥ १५ ॥ दक्षिणेऽक्षन् दक्षिणेऽक्षिणि दक्षिणे चक्षुषि, नाम्न आत्मा वर्णात्मकस्य कारणं स्वरूपं वा, अग्नेरात्मा कृशानोः स्वरूपं, ज्योतिष आत्मा प्रकाशमात्रस्य स्वरूपं, एतेषां पूर्वोक्तानां नामाग्निज्योतिषां सर्वेषां निखिलानामात्मा स्वरूपं भवति ॥ १६ ॥ सव्येऽक्षन् वामे चक्षुषि सत्यस्यात्मा विद्युत आत्मा तेजस आत्मा सत्यस्य विद्युतो ज्योतिर्मात्रस्य स्वरूपं, एतेषां सत्यविद्युत्तेजसां सर्वेषामात्मा

आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥ १७ ॥

स होवाच बालाकिर्य एवैष सव्येऽक्षिणि पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् संवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥ १८ ॥

भवति सर्वेषां स्वरूपं भवति। शेषपर्यायपञ्चदशकेऽपि प्रथमपर्यायवद्व्याख्येयं। इति पुरुषोपदेशपरिसमाप्त्यर्थः ॥ १७ ॥

*ततः सव्ये चक्षुषि पुरुषस्य निराकरणानन्तरं, उ एव तदनन्तरमेव ह किल बालाकिः बलाकस्यापत्यं तूष्णीमास मौनी बभूव, तं तूष्णीम्भूतं बालाकिं होवाचाजातशत्रुः व्याख्यातं। राजोक्तिमाह, एतावत् इयत्परिमाणं नु, वितर्के, उतान्यदपीत्यर्थः। बालाका३ हे बालाके प्लुतिर्भर्त्सनार्था यद्यप्ययोग्यं ब्राह्मणस्य भर्त्सनं तथापि गर्वपरिहारार्थं क्रियमाणं न विरुद्धं, गर्वो ह्यस्य महान्तं पुरुषार्थं नाशयन् परमकण्टकः कण्टकोद्धरणञ्च राज्ञा करणीयमिति न्याया-

---

* आदित्ये बृहन् पाण्डरवासश्चन्द्रमसि सोमो राजा विद्युति तेजसी स्तनयित्नौ शब्दस्याकाशे पूर्णं वायाविन्द्रोऽग्नौ विषासहिरप्सु नामस्यादर्शे प्रतिरूपः प्रतिश्रुत्कायां द्वितीयः शब्देऽसुश्छायायां मृत्युः शारीरः प्रजापतिः प्राज्ञो यमो राजा दक्षिणेऽक्षन्नाम्नः सव्येऽक्षन् सत्यस्य। इति F. G. किन्तु टीकायां नास्ति।

तत उ ह बालाकिस्तूष्णीमास तं होवाचाजातशत्रुरेतावन्नु बालाका३ इत्येतावदिति होवाच बालाकिस्तं होवाचाजातशत्रुर्मृषा वै खलु मा संवादयिष्ठा* ब्रह्म ते ब्रवाणीति यो† वै बालाक एतेषां पुरुषाणां

दविरुद्धं, इति अनेन प्रकारेण राजोवाचेत्यन्वयः। एवं राज्ञोक्तोऽपगतगर्वः, एतावद्धि यदेवोक्तं नातोऽधिकमहं किञ्चन ब्रह्म वेद्मीति शेषः। इति होवाच बालाकिः एवं किलोक्तवान् बलाकस्यापत्यं। तं अपगतगर्वं बालाकिं, होवाचाजातशत्रुः व्याख्यातं। मा मामजातशत्रुं मृषा वै वितथमेव, किल निश्चितं समवादयिष्ठा ब्रह्म ते ब्रवाणीति व्याख्यातं। एवमुक्त्वा पुनर्बालाकेरधोवदनस्य लज्जाजडस्यापगतगर्वस्यानुग्रहार्थं, सोऽजातशत्रुः ह किल उवाच उक्तवान् बालाकिं प्रति। राजोक्तिमाह, यः त्वया प्रस्ताविता ब्रह्मत्वेन वै प्रसिद्धः सत्यज्ञानादिलक्षणः, बालाके हे बालाके एतेषां आदित्यादिस्थानां पुरुषाणां त्वयोक्तानां पुरुषाणां कर्ता उत्पादकः, यस्य वा यस्य प्रसिद्धस्य वेदान्तेषु वाशब्दः पूर्वोक्तव्युदासार्थः किमल्पाभिधानेनेत्यर्थः, एतत् भूतभौतिकरूपं विश्वं कर्म क्रियत इति येनोत्पाद्यत इत्यर्थः, सः त्वदुक्तपुरुषैः सह विश्वस्य कर्ता वै प्रसिद्धः सत्यज्ञानादिलक्षणः वेदितव्यः साक्षात्करणीयः श्रवणाद्युपायैः, इति अनेन

* समवादयिष्ठा इति F. G. टी०। † स होवाच य इति F. G. टी०।

कर्ता यस्य वै तत्कर्म स वै वेदितव्य इति तत उ ह बालाकिः समित्पाणिः प्रतिचक्रम उपायानीति तं होवाचाजातशत्रुः प्रतिलोमरूपमेव *तन्मन्ये यत् क्षत्त्रियो ब्राह्मणमुपनयेतैहि† व्येव त्वा ज्ञपयिष्यामीति तं ह

प्रकारेणोवाचेत्यन्वयः। तत उ तत एव राजोक्तेरनन्तरं ह किल बालाकिः बलाकस्यापत्यं ब्रह्म जिज्ञासुः समित्पाणिः समित्करः प्रतिचक्रमे प्रतिचक्राम राजानं प्रति ब्रह्मोपदेशार्थं गृहीतोपायन आजगामेत्यर्थः। वाचा चैवं व्याहरत् उपायानि यदि भवतोऽनुज्ञा तदा भवन्तं गुरुत्वेन समीपे आगच्छानि, इति अनेन प्रकारेण, प्रतिचक्रामेत्यन्वयः। तं अपगतगर्वं ब्राह्मणं दीनतमामवस्थां प्राप्तं ह किल उवाचाजातशत्रुः उक्तवान् राजा, प्रतिलोमरूपमेव विपरीतरूपमेव न त्वनुरूपं स्यात् भवेत् यत् यस्मात् क्षत्त्रियः न्यून [illegible]ः क्षतत्राणकारी ब्राह्मणं उत्तमवर्णं द्विजोत्तमं उपनयेत् ब्रह्मविद्यायै दीक्षयेत्। मा च ते भयं यदसौ राजा न वक्ष्यतीत्येवमाह, एहि अस्माज्जनसमवायादेकान्तमागच्छ, व्येव त्वा ज्ञपयिष्यामि त्वा त्वां गुरुं विज्ञपयिष्याम्येव, यज्जानामि तत्तुभ्यं वदन् वक्ष्ययिष्यामीत्यर्थः। इति अनेन प्रकारेणोक्त्वानन्तरं तं बालाकिं ब्रह्मविद्यार्थिनं ह किल पाणावभिपद्य करे सस्नेहं गृहीत्वा प्रवव्राज सभादेशाद्देशान्तरं जगाम राजा। तौ

* स्याद्यदिति F. G. टी०। † उपनयेदेहीति F. G. टी०।

पाणावभिपद्य प्रवव्राज तौ ह सुप्तं *पुरुषमाजग्मतु-स्तं हाजातशत्रुरामन्त्रयाञ्चक्रे †बृहत्पाण्डरवासः सोम राजन्निति स उ ह शिश्य एव‡ तत उ हैनं यष्ट्या-विचिक्षेप स तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्वैतदभूत्कुत एतदा-

राजबालाकी ह किल सुप्तं पुरुषं अनेककर्मश्रमाकुलं शयानं राजपुरुषं कञ्चिदीयतुः प्राप्तवन्तौ। तं सुप्तं पुरुषं ह किल अजातशत्रुः एतन्नामा राजा आमन्त्रयाञ्चक्रे, वक्ष्यमाणैर्नामभिः सम्बोधयामास। सम्बोधननामान्याह, बृहन् हे सर्वस्मादभ्यधिक प्राण, पाण्डरवासः पाण्डराः आपो वाससी यस्य प्राणस्य तत्सम्बोधनं हे पाण्डरवासः, सोम सोमात्मक प्राण राजन् हे दीप्तिमन् प्राण, इति सम्बोधनपरिसमाप्त्यर्थः। सः बृहन्नित्यादिना सम्बोधितः प्राणः, उ ह अपि प्रसिद्धोऽवस्थान्तर आत्मत्वेन तूष्णीमेव सोऽनेनैव शिश्ये§ शयनं चक्रे। तत उ तदनन्तरमेव ह किल एनं शयानं पुरुषं यष्ट्या वेण्वादितरुकाष्ठेन आविचिक्षेप आसमन्तात् ताडितवान्। सः शयानः पुरुषः प्राणाद्व्यतिरिक्तो यष्टिघातसञ्जातवेदनः, तत एव तदानीमेव न तु कालान्तरे समुत्तस्थौ सम्यगुत्थानं कृतवान्।

* पुरुषं कञ्चिदीयतुरिति F. G. टी०। † बृहन् इति F. G. टी०। ‡ स उ ह तूष्णीमेव शिश्ये (शिश्य इति B. D.) इति F. G. टी०। § शिश्य इति B. D. (शिश्य इति च अ०१।ख०१४। पठ्यते।)

गादिति तत उ ह बालाकिर्न विजज्ञे* तं होवाचाजातशत्रुर्यत्रैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदागादिति †हिता नाम पुरुषस्य नाड्यो हृदयात्पुरीततमभिप्रतन्वन्ति तद्यथा सहस्रधा केशो ‡विपाटितस्तावदण्व्यः पिङ्गलस्याणिम्ना§ तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्य च तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति ॥ १९ ॥

तं होवाचाजातशत्रुः, तं प्राणात्मवादिनं बालाकिं, व्याख्यातमन्यत्। राजोक्तिमाह, क्व कुत्र एषः प्राणाद्व्यतिरिक्तः शयानः, एतत् सर्वचैतन्यशून्यं यथा तथा, बालाके हे बालाके पुरुषः चेतनः प्राणादीनां स्वामी अशयिष्ट शयनमकुरुत, क्व कस्मिन् प्रदेशे एतत् उक्तं शयनं अभूत् जातं। एक प्रश्नः पुरुषविषये, अपरोऽवस्थाविषये। पुरुषशयनयोर्देशं पृष्ट्वा पुरुषस्यागमनदेशं पृच्छति, कुतः कस्माद्देशात् एतत् जागरणं प्रति एतदागमनं वा, आगात् आगतवान्, स्तुतिर्विचारणार्था विचार्य कथयेत्यर्थः। इति अनेन प्रकारेण प्रश्नमकरोदिति शेषः। तत उ अपि तद्राज्ञा पृष्टं, ह किल बालाकिः बलाकस्यापत्यं न विजज्ञे न विज्ञातवान् ॥ १८ ॥

---

* तदु ह बालाकिर्न विजज्ञौ ॥ १८ ॥ इति F. G.।

† हिता नाम हृदयस्य नाड्यो हृदयादिति F. G. टी०।

‡ विपतित इति F. G. टी०। § अणिम्न्यास्तिष्ठन्तीति A.

अथास्मिन्प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा

तं अज्ञातस्वप्नं बालाकिं होवाचाजातशत्रुः यत्रैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदागात् व्याख्यातं। किमः स्थले यदोऽवस्थानं विशेषः। स्वयं तं देशमाह राजा, हिता नाम प्राणिनां हितकरणाद्धिता इत्यभिधानाः, हृदयस्य हृदयपुण्डरीकसम्बन्धिन्यो हृदयपुण्डरीकान्निर्गता इत्यर्थः, नाड्यः शिराः हृदयात् हृदयपुण्डरीकान्निर्गत्य पुरीततं आन्त्रं हृदयवेष्टनं अभिप्रतन्वन्ति सर्वतः प्रकर्षेण विस्तारयन्ति वेष्टयन्तीत्यर्थः। तद्यथा यावत्परिमाणमित्यर्थः, सहस्रधा केशो विपतितः* बालः सहस्रप्रकारेण विविधं †पतितः, केशस्य सहस्रांश इत्यर्थः। तावत् तत्परिमाणाः अण्व्यः सूक्ष्माः, पिङ्गलस्य चित्रवर्णस्य अणिम्ना अणुतमेन रसेनातिसूक्ष्मेणेत्यर्थः, तिष्ठन्ति पूर्णा वर्तन्ते। सामान्यतो वर्णमुक्त्वा विशेषतो वर्णानाह, शुक्लस्य श्वेतस्य, अणिम्नेति सर्वेषु वर्णेष्वनुवर्तते, कृष्णस्य कालस्य पीतस्य सुवर्णवर्णस्य लोहितस्य रक्तस्येत्येवंप्रकारस्य वर्णान्तरस्याप्यणिम्ना रसेन पूर्णास्तिष्ठन्ति। तासु हृदयवेष्टनपुरीतत्प्रतिष्ठितासु हृदयगमनमार्गभूतासु सामीप्येन तदा भवति तस्मिन् शयनकाले वर्तते। स्वप्नो नाडीषु वर्तमानस्य भवतीत्यर्थः। स्वप्नस्थान-

* विपाटित इति D. † पाटित इति D.

प्रतिबुध्यते *यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्र-

र्मभिधाय सुषुप्तस्थानं सजागरणमाह, यदा यस्मिन् काले सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति, तदेनं वाक् सर्वैर्नामभिः सहाप्येति, चक्षुः सर्वैः रूपैः सहाप्येति, श्रोत्रं सर्वैः शब्दैः सहाप्येति, मनः सर्वैर्ध्यानैः सहाप्येति, स यदा प्रतिबुध्यते यथाग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवाः देवेभ्यो लोकाः व्याख्यातं। अयमर्थः। नाडीद्वारा पुरीतद्देहनेऽनेकनाडीकारणे हृदयपुण्डरीके स्थिताकाशान्तर्वर्तिक्रियाशक्त्युपाधावानन्दात्मनि सुषुप्तिं प्राप्य तत एव जागरणमागच्छति यः सोऽपगताधाराधेयभेदो ब्रह्मशब्दाभिधेयः न तु भवदभिमतः प्राणादिरधिदैवतमध्यात्मं चेति। कथमसौ ब्रह्मशब्दाभिधेय उपलब्धुं शक्यते इति बालाकेर्हृदयगतामाशङ्कामपाकरिष्यन् दृष्टान्तपुरःसरमाह, तत् तत्र उपलब्धौ दृष्टान्तः यथा दृष्टान्ते क्षुरः तीक्ष्णाग्रः प्रसिद्धः चौरकर्मणि क्षुरधाने क्षुरो धीयते यस्मिन् पात्रे तत् क्षुरधानं तस्मिन् अवहितः प्रक्षिप्तः स्यात् भवेत्। अयं हृदयपुण्डरीके शरीरैकदेशे तदुपलब्धौ दृष्टान्तः। इदानीं सर्वशरीरे उपलब्ध्यर्थदृष्टान्तमाह, विश्वम्भरो वा विश्वम्भरोऽग्निः वाशब्दो दृष्टान्तान्तरे, विश्वम्भरकुलाये अग्निनीडे अरण्यादौ, एवमेव अने-

---

* यथाग्नेर्विस्फुलिङ्गा इति F. G. टी॰।

तिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः *स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तद्यथा क्षुरः क्षुरधाने ऽवोपहितो† विश्वम्भरो वा

नैव प्रकारेण एषः ब्रह्म ते ब्रवाणीति यो भवता प्रकृतः प्राज्ञः नित्यः स्वयंप्रकाशः प्रज्ञायुक्तः आत्मा अस्मत्प्रत्ययव्यवहारयोग्यः, इदं ‡शरीरं इमं शरीरं भवं, एतच्छरीरं सेन्द्रियमित्यर्थः, आत्मानं आत्मशब्दप्रत्ययालम्बनं अनुप्रविष्टः सृष्टिमनु प्रवेशनं कृतवान्। प्रवेशावधिमाह, आलोमभ्य आनखेभ्यः लोमनखपर्यन्तं, नखाग्रशरीरबहिर्गतकेशान्मुक्त्वा समग्रे शरीर इत्यर्थः। स्वप्नसुषुप्तिजागरणेषु प्राणाद्व्यतिरिक्तमात्मानमभिधाय तस्य च सर्वस्मिन् शरीरे हृदये च सामान्यविशेषाभ्यां व्याप्तिं, इदानीं तस्यैव शरीरं विवक्षुर्दृष्टान्तपुरःसरमाह, तं आलोमभ्य आनखेभ्यः शरीरे सामान्यविशेषाभ्यां प्रविष्टं एतं बुद्धिसाक्षिणं आत्मानं अस्मत्प्रत्ययव्यवहारयोग्यमानन्दात्मानं एते अपगताधिदैवभेदा अध्यात्मप्रत्यक्षा इव आत्मानः वागाद्याः अन्ववस्यन्ति आत्मनो निश्चयमनु पश्चान्निश्चिन्वन्ति। तत्र दृष्टान्तमाह, यथा दृष्टान्ते श्रेष्ठिनं श्रेष्ठः श्रेष्ठत्वं प्रधानत्वं सः गुणो यस्यास्ति सः श्रेष्ठी, तं प्राधान्यवन्तं कुटुम्बिनमित्यर्थः, स्वाः स्वसम्बन्धिनो ज्ञात्युपलक्षिता उपजीवकाः अन्ववस्यन्तीत्यनुवर्तते। निश्चये

* स एष इत्यादि आनखेभ्य इत्यन्तं F. G. टी० नास्ति।

† अवहितः स्यादिति F. G.　　‡ शारारमिति B. C.

विश्वम्भरकुलाय एवमेवैष *प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तमेतमात्मानमेत आत्मानोऽन्ववस्यन्ते यथा श्रेष्ठिनं स्वास्तद्यथा श्रेष्ठी

प्राधान्यमुक्त्वा भोगेऽपि प्राधान्यं वक्तुं दृष्टान्तमाह, तत् तत्र भोगप्राधान्ये दृष्टान्तः, यथा दृष्टान्ते श्रेष्ठी कुटुम्बी स्वैः ज्ञात्यादिभिः सह भुङ्क्ते अन्नमत्ति, यथा वा यद्वत्, वाशब्दः प्रकारान्तरेण दृष्टान्तार्थः, श्रेष्ठिनं प्रधानकुटुम्बिनं द्रव्यद्वारा अन्नमिव स्वाः ज्ञात्याद्याः भुञ्जते अदन्ति, एवमेव अनेनैव प्रकारेण न त्वन्येन, एषः प्राज्ञ आत्मा व्याख्यातं, ज्ञानक्रियाशक्त्युपाधिरित्यर्थः, एतैः प्रतिप्राणिव्यवस्थितैः आत्मभिः अस्मच्छब्दप्रत्ययालम्बनैः वागादिभिः सह भुङ्क्ते अत्ति। अथवा दृष्टान्तदार्ष्टान्तिकयोस्तृतीया करणार्था। न हि निर्मनुष्यस्य कुटुम्बिनो द्रव्यवतोऽपि भोगः सम्भवति परैर्द्रव्यापहारादेः सम्भवात्। एवमसङ्गोदासीनस्य चितस्वभावस्यात्मनोऽपि विना करणादिकं न भोगः, यथा श्रेष्ठी स्वैः व्याख्यातं, उत्पन्ने कार्ये प्रधानकुटुम्बी येन प्रकारेण स्वैर्ज्ञातिप्रभृतिभिः सह पर्यालोच्याव्यवस्यति, एवमेतैरात्मभिरयमात्मेति बहिरेवावगन्तव्यं। तमेतमात्मानमित्यस्य प्रपञ्चार्थमाह, एवं वै अनेनैव यथा श्रेष्ठिनं स्वा इति वक्ष्यमाणेनैव प्रकारेण तं इन्द्रियाणामधिष्ठातारं आत्मानमेत आत्मानो-

---

* प्राज्ञ आत्मेति F. G. टी० ।

स्वैर्भुङ्क्ते यथा व *स्वाः श्रेष्ठिनं भुञ्जन्त्येवमेवैष †प्रज्ञा-त्मैतैरात्मभिर्भुङ्क्ते ‡एवमेवैत आत्मान एतमात्मानं भुञ्जन्ति स यावद्ध वा इन्द्र एतमात्मानं न विजज्ञे ता-

ऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः, व्याख्यातं। अत्राद्यन्तपर्याययोः सामान्यविशेषाभ्यां पुनरुक्तिपरिहारः। अथवा यथा वा श्रेष्ठिनं स्वा इत्यस्य दार्ष्टान्तिक एवं वा इत्यादि, न ह्यात्मना निश्र-यमन्तरेणान्यो भोगः कर्तुं शक्यः, अस्मिन् पक्षे यथा श्रेष्ठी स्वैः यथा श्रेष्ठिनं स्वा इति वचनद्वयं निगमनार्थत्वेन व्याख्येयं। अथवा निश्रयोऽध्यात्मको भवति, आपत्कालीनोऽनापत्कालीनश्च। तत्रापत्कालीनः प्रधानबुद्ध्यनुसारी यथा राजबुद्ध्यनुसारी निश्रयो मृगयायां मन्त्रिणां, तादृशं हृदि निधाय तमेतमात्मानमिति प्रथममुक्तं। §अनापत्कालीनस्तु बन्धुभिः सह कुटुम्बिनः कुटुम्बिना सह बन्धूनाञ्च विचार्य भवति, तादृशमङ्गीकृत्योक्तं यथा श्रेष्ठी स्वैरेवं वा इत्यादि, अस्मिन् पक्षे यथा वा श्रेष्ठिनं स्वा भुञ्जत इत्यस्य एवमात्मानं प्राणा भुञ्जत इतीदं बहिरेवावगन्तव्यं। अस्यात्मनो ज्ञाने कस्य किं फलं जातमिति बालाकिशङ्कां व्यावर्तयितुमजातशत्रुराह, सः प्रसिद्धः प्रतर्दनस्य गुरुः यावत् यावन्तं कालं ह किल अतमस्मांभिः

* श्रेष्ठिनं स्वा भुञ्जते इति F. G. टी०। †प्राज्ञ आत्मेति F. G. टी०।

‡ यथा श्रेष्ठी स्वैरेवं वै तमात्मानमेत आत्मानोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः स यावदिति F. G. टी०।

§ अत्रापि आपत्कालीन इति सर्वपुस्तकेषु वर्तते।

वदेनमसुरा अभिबभूवुः स यदा विजज्ञेऽथ हत्वासु-रान्विजित्य *सर्वेषाञ्च देवानां सर्वेषाञ्च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं †पर्यैत्तथो एवैवं विद्वान् सर्वान्

पूर्वेभ्य इत्यर्थः, वै प्रसिद्धः प्रजापतिशिष्यः एकाधिकशतवर्ष-ब्रह्मचारी ब्रह्मविद्यार्थी, इन्द्रः परमैश्वर्यसम्पन्नस्त्रिलोकीपतिः, एतं मयोक्तं सर्वेन्द्रियोपजीव्यं आत्मानं आनन्दात्मानं न विजज्ञे विशेषेणायमसाविति न ज्ञातवान्। तावत् ता-वन्तं कालं एतं आत्मज्ञानशून्यमिन्द्रं असुराः शास्त्रनिषि-द्धार्थप्रवृत्ता वागादयो विरोचनादयो वा अभिबभूवुः अ-भिभवं पराभवं चक्रुः। सोऽसुरैरभिभूतः यदा यस्मिन् काले, य आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो-ऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः स विजिज्ञासि-तव्यः स सर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मा-नमन्विष्य विजानातीति प्रजापतिवाक्यं सभायां केनापि प्रकारेण श्रुत्वानन्तरं विजज्ञौ, य एषोऽक्षिणि पुरुषो दृश्यत इत्या-देः प्रजापतेरुपदेशाद्विशेषेणायमसाविति ज्ञातवान् साक्षात्कृ-तवान् इत्यर्थः। अथ तदा हत्वा निपात्य असुरान् शास्त्र-निषिद्धप्रवृत्तान् वागादीन् विरोचनादीन् वा विजित्य विजयं प्राप्य त्रिलोकीं स्वाधीनां विधायेत्यर्थः। सर्वेषां निखि-

---

* सर्वेषां देवानां श्रैष्ठ्यमिति F. G. टी० ।

† पर्यायायेति F. G. टी० ।

पाप्मनोऽपहत्य सर्वेषाञ्च भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद ॥ २० ॥

लानां देवानां अग्न्यादीनां श्रैष्ठ्यं श्रेष्ठत्वं प्राधान्यं, स्वाराज्यं स्वराज्यस्य भावोऽप्रतिहतत्वं स्वाराज्यं, आधिपत्यं गर्भदासानिव सर्वानधिष्ठाय पालयितृत्वमाधिपत्यं परीयाय सर्वतो गतवान्। तथो एवापि तद्वदेव न त्वन्यथा, एवं विद्वान् अवस्थात्रयातीतः प्राणादिभिराश्रयणीयोऽसङ्गादासीनस्वभावः आकाशवत्सर्वगतोऽपि शरीरे च हृदये च सामान्यविशेषाभ्यामुपलभ्यमानचैतन्योऽपगतसर्वधर्म आनन्दात्माहमस्मीत्येवं ज्ञातवान्, सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं भूतानां स्थिरजङ्गमानां, व्याख्यातमन्यत्, पर्येति प्राप्नोति। यः शमादिसाधनचतुष्टयसम्पन्नः, एवं वेद इन्द्रवदुक्तमात्मानं जानीते एवं वेद व्याख्यातं। वाक्याभ्यास उपनिषत्परिसमाप्त्यर्थः ॥ १९ ॥

कौषीतकिब्राह्मणमात्मविद्या
गूढापि सम्यक् प्रकटीकृतेयं ।
परोपकाराय मया श्रुतीनां
पदावलोकैकपरेण नित्यं ॥
त्रय्या अथर्वाङ्गिरसश्च तद्व-
द्येवा प्रसिद्धा इह लोकमध्ये ।

इत्यारण्यके कौषीतकिब्राह्मणोपनिषदि चतुर्थो
ऽध्यायः समाप्तः ॥ * ॥

अतो मयाकारि पदावलोक-
स्तेषां कृतेऽस्मिन् शिव एतु तुष्टिं ॥
गङ्गादयः शीतलनीरपूरा
नैवाश्रितास्तैस्सरितोऽल्पभाग्यैः ।
न्यूनत्वमासां किमिवात्र भूयात्
ममापि तद्वत्कृतयः प्रवृत्ताः ॥
आत्मावबोधाय मदुक्तिवारां
प्रवृत्तिरेषोपनिषत्समूहे ।
विबुध्य सन्तः सततं स्वचित्तं
प्रक्षालयन्त्वत्र विमुक्तिकामाः ॥
सर्वं न सर्वस्य हितं प्रियं वा
व्यवस्थितं येन लभामहेऽदः ।
प्रिया हितास्तेन विमुक्तिभाजां
पदावलोका विहितास्ततोऽमी ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यानन्दात्मपूज्यपादशिष्यस्य श्रीशङ्करानन्दभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां चतुर्थोऽध्यायः समाप्तः ॥ ० ॥

अस्या उपनिषदः पाठप्रणालीद्वयं वर्त्तते। तयोरेकामवलम्ब्यैतन्मूलं मुद्रितं द्वितीयामवलम्ब्यैव टीका मुद्रिता। आद्याध्यायद्वयस्य प्रणालीवैपरीत्यं केवलं टीकायां द्रष्टव्यं, उत्तराध्यायद्वयस्य तु विपरीतपाठसूचको मूलखण्डः कार्य्यारम्भात्परं मम हस्ते समायातः। अतः स एव विद्वत्समाजावलोकनाय पृथक् प्रकाश्यते। F. G. चिह्नोपलक्षितं पुस्तकद्वयं काशीतः समायातं तदेवैतस्यादर्शस्वरूपं जातं।

प्रतर्द्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन च पौरुषेण च तं हेन्द्र उवाच प्रतर्द्दन वरं ते ददानीति स होवाच प्रतर्द्दनस्त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति तं हेन्द्र उवाच न* वै वरः परस्मै वृणीते त्वमेव वृणीष्वेत्यवरो वै तर्हि किल म इति होवाच प्रतर्द्दनोऽथो खल्विन्द्रः सत्यादेव नेयाय सत्यं हीन्द्रः स हेन्द्र उवाच मामेव विजानीह्येतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीयात् त्रिशीर्षाणं त्वाष्ट्रमहनमरुन्मुखान्† यतीन् सालावृकेभ्यः प्रायच्छं बह्वीः सन्धा अतिक्रम्य दिवि प्रह्लादीनतृणमहमन्तरिक्षे पौलोमान् पृथिव्यां ‡कालकञ्ज्यान् तस्य मे तत्र न लोम च मा मीयते स यो मां विजानीयान्नास्य केन च न कर्मणा

---

* न मे वरं परस्मै वृणीत इति G.

† अहनं त्वरुन्मुखानिति F. मन्त्रमुखानिति G.

‡ कालकाश्यानिति G.

लोको मीयते न मातृबधेन न पितृबधेन न स्तेयेन न भ्रूण-हत्यया नास्य *पापं चकृषो मुखान्नीलं वेतीति ॥ १ ॥

स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्वायुः स प्राणः प्राणो वा आयुः प्राण उ वा अमृतं यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुः प्राणेन ह्येवामुष्मिँल्लोकेऽमृतत्वमाप्नोति प्रज्ञया सत्यं सङ्कल्पं †स यो मामायुरमृतमित्युपास्ते सर्वमायुरस्मिँल्लोक एत्याप्नोत्यमृतत्वमक्षितिं स्वर्गे लोके तद्धैक आहुरेकभूयं वै प्राणा गच्छन्तीति न हि कश्चन शक्नुयात् सकृद्वाचा नाम ‡प्रज्ञपयितुं चक्षुषा रूपं श्रोत्रेण शब्दं मनसा §ध्यातुमित्येकभूयं वै प्राणा भूत्वैकैकं सर्वाण्येतानि प्रज्ञपयन्ति वाचं वदन्तीं सर्वे प्राणा अनुवदन्ति चक्षुः पश्यत् सर्वे प्राणा अनुपश्यन्ति श्रोत्रं शृण्वत् सर्वे प्राणा अनुशृण्वन्ति मनो ध्यायत् सर्वे प्राणा अनुध्यायन्ति प्राणं प्राणन्तं सर्वे प्राणा अनुप्राणन्ति एवमु हैतदिति हेन्द्र उवाचास्ति त्वेव प्राणानां निःश्रेयसमिति ॥ २ ॥

जीवति वागपेतो मूकान् हि पश्यामो जीवति चक्षुरपेतोऽन्धान् हि पश्यामो जीवति श्रोत्रापेतो बधिरान् हि पश्यामो अथ खलु जीवति बाहुच्छिन्नो जीवत्यूरुच्छिन्न इत्येवं हि पश्याम इति प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति

---

* पापं चनेति G.

† स यो म आयुरिति F.

‡ प्रज्ञापयितुमिति G.

§ ध्यानमित्येकभूयं वै प्राणा एकैकं सर्वाण्येतानि प्रज्ञपयन्तीति G.

तस्मादेतदेवोक्थमुपासीतेति यो वा प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिञ्छरीरे वसतः सहो-त्क्रामतस्तस्यैषैव दृष्टिरेतद्विज्ञानं यत्रैतत्पुरुषः सुप्तः स्वप्नं न कञ्चन पश्यत्यथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वै-र्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रति-बुध्यते यथाग्नेर्ज्वलतः विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादा-त्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः तस्यैषैव सिद्धिरेतद्विज्ञानं यत्रैतत्पुरुष आर्तो मरि-ष्यन्नाबल्यं न्येत्य सम्मोहं न्येति तदाहुरुदक्रमीच्चित्तं न शृणोति न पश्यति न वाचा वदतीति। अथास्मिन् प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वै रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैः ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मा-दात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकाः॥ ३॥

स यदास्माच्छरीरादुत्क्रामति वागस्मात् सर्वाणि नामान्य-भिविसृजते वाचा सर्वाणि नामान्याप्नोति प्राणोऽस्मात् सर्वान् गन्धानभिविसृजते प्राणेन सर्वान् गन्धानाप्नोति चक्षुरस्मात् सर्वाणि रूपाण्यभिविसृजते चक्षुषा सर्वाणि रूपाण्याप्नोति श्रोत्रमस्मात् सर्वान् शब्दान् अभिविसृजते श्रोत्रेण सर्वां-च्छब्दानाप्नोति मनोऽस्मात् सर्वाणि ध्यानान्यभिविसृजते

मनसा सर्वाणि ध्यानान्याप्नोति सैषा प्राणे सर्वाप्तिर्यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः सह ह्येतावस्मिञ्छरीरे वसतः सहोत्क्रामतोऽथ खलु यथा प्रज्ञायां सर्वाणि भूतान्येकं भवन्ति तद्व्याख्यास्यामः ॥ ४ ॥

वागेवास्या एकमङ्गमदूढं तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्राण एवास्या एकमङ्गमदूढं तस्य गन्धः परस्तात्प्रतिविहिता भूतमात्रा चक्षुरेवास्या एकमङ्गमदूढं तस्य रूपं परस्तात्प्रतिविहिता भूतमात्रा श्रोत्रमेवास्या एकमङ्गमदूढं तस्य शब्दः परस्तात्प्रतिविहिता भूतमात्रा जिह्वैवास्या एकमङ्गमदूढं तस्या अन्नरसः परस्तात्प्रतिविहिता भूतमात्रा हस्तावेवास्या एकमङ्गमदूढं तयोः कर्म परस्तात्प्रतिविहिता भूतमात्रा शरीरमेवास्या एकमङ्गमदूढं तस्य सुखदुःखे परस्तात्प्रतिविहिता भूतमात्रोपस्थ एवास्या एकमङ्गमदूढं तस्या आनन्दो रतिः प्रजातिः परस्तात्प्रतिविहिता भूतमात्रा पादावेवास्या एकमङ्गमदूढं तयोरित्याः परस्तात्प्रतिविहिता भूतमात्रा प्रज्ञैवास्या एकमङ्गमदूढं तस्यै धियो विज्ञातव्यं कामाः परस्तात्प्रतिविहिता भूतमात्रा ॥ ५ ॥

प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान् गन्धानाप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति प्रज्ञया श्रोत्रं समारुह्य श्रोत्रेण सर्वाञ्छब्दानाप्नोति प्रज्ञया जिह्वां समारुह्य जिह्वया सर्वानन्नरसानाप्नोति प्रज्ञया हस्तौ समारुह्य हस्ताभ्यां सर्वाणि कर्मा-

ण्याप्नोति प्रज्ञया शरीरं समारुह्य शरीरेण सुखदुःखे आप्नोति प्रज्ञयोपस्थं समारुह्योपस्थेनानन्दं रतिं प्रजातिमाप्नोति प्रज्ञया पादौ समारुह्य पादाभ्यां स वा इत्या आप्नोति प्रज्ञयैव धियः समारुह्य प्रज्ञयैव धियो विज्ञातव्यं कामानाप्नोति ॥ ६ ॥

न हि प्रज्ञापेता वाङ्नाम किञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतन्नाम प्राज्ञासिषमिति न हि प्रज्ञापेतः प्राणो गन्धं कञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं गन्धं प्राज्ञासिषमिति न हि प्रज्ञापेतं चक्षूरूपं किञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतद्रूपं प्राज्ञासिषमिति न हि प्रज्ञापेतं श्रोत्रं शब्दं कञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतं शब्दं प्राज्ञसिषमिति न हि प्रज्ञापेता जिह्वान्नरसं कञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमन्नरसं प्राज्ञासिषमिति न हि प्रज्ञापेतौ हस्तौ कर्म किञ्चन प्रज्ञपयेयातामन्यत्र मे मनोऽभूदित्याह नाहमेतत्कर्म प्राज्ञासिषमिति न हि प्रज्ञापेतं शरीरं सुखं न दुःखं किञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतत् सुखं न दुःखं प्राज्ञासिषमिति न हि प्रज्ञापेत उपस्थ आनन्दं न रतिं न प्रजातिं काञ्चन प्रज्ञपयेदन्यत्र मे मनोऽभूदित्याह नाहमेतमानन्दं न रतिं न प्रजातिं प्राज्ञासिषमिति न हि प्रज्ञापेतौ पादावित्यां काञ्चन प्रज्ञपयेयातामन्यत्र मे मनोऽभूदित्याह नाहमेतामित्यां प्राज्ञासिषमिति न हि प्रज्ञापेता धीः काचन सिध्येन्न प्रज्ञातव्यं प्रज्ञायेत ॥ ७ ॥

न वाचं विजिज्ञासीत वक्तारं विद्यात् न गन्धं विजिज्ञासीत घ्रातारं विद्यान्न रूपं विजिज्ञासीत रूपविद्यं विद्यान्न शब्दं विजिज्ञासीत श्रोतारं विद्यान्नान्नरसं विजिज्ञासीतान्नरसस्य विज्ञातारं विद्यान्न कर्म विजिज्ञासीत कर्तारं विद्यान्न सुखदुःखे विजिज्ञासीत सुखदुःखयोर्विज्ञातारं विद्यान्नानन्दं न रतिं न प्रजातिं विजिज्ञासीतानन्दस्य रतेः प्रजातेर्विज्ञातारं विद्यान्नेत्यां विजिज्ञासीतैतारं विद्यान्न मनो विजिज्ञासीत मन्तारं विद्यात्ता वा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामात्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्न भूतमात्राः स्युर्न ह्यन्यतरतो रूपं किञ्चन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानन्दोऽजरोऽमृतो न साधुना कर्मणा भूयान् नो एवासाधुना कनीयानेष ह्येवैनं साधु कर्म कारयति तं यमन्वानुनेषत्येष उ एवैनमसाधु कर्म कारयति तं यमेभ्यो लोकेभ्यो नुनुत्सत *एष लोकपाल एष लोकाधिपतिरेष सर्वेशः स म आत्मेति विद्यात् ॥ ८ ॥

†इत्यारण्यके पञ्चमोऽध्यायः ॥ * ॥

---

* एष लोकेशो लोकपालो लोकाधिपतिरेष सर्वेश इति F.

† इति कौषीतकीब्राह्मणोपनिषदि तृतीयोऽध्याय इति G.

गार्ग्यो ह वै बालाकिरनूचानः संस्पष्ट आस सोऽवसदुशीनरेषु सवसन्मत्स्येषु कुरुपञ्चालेषु काशिविदेहेष्विति स हाजातशत्रुं काश्यमेत्योवाच ब्रह्म ते ब्रवाणीति तं होवाचाजातशत्रुः सहस्रं दद्म त एतस्यां वाचि जनको जनक इति वा उ जना धावन्तीति ॥ १ ॥

स होवाच बालाकिर्य एवैष आदित्ये पुरुषस्तमेवाहमुपास इति तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा बृहन् पाण्डरवासा अतिष्ठाः* सर्वेषां भूतानां मूर्द्धेति वा अहमेतमुपास इति स यो हैतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्द्धा भवति॥ २ ॥

स होवाच बालाकिर्य एवैष चन्द्रमसि पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः सोमो राजान्नस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्तेऽन्नस्यात्मा भवति॥ ३ ॥

स होवाच बालाकिर्य एवैष विद्युति पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठास्तेजस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते तेजस्यात्मा भवति॥ ४ ॥

स होवाच बालाकिर्य एवैष स्तनयित्नौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयि-

---

* पाण्डरवासातिष्ठा इति F.

ष्टाः शब्दस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते शब्दस्यात्मा भवति॥ ५॥

स होवाच बालाकिर्य एवैष आकाशे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः पूर्णमप्रवर्ति ब्रह्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते पूर्यते प्रजया पशुभिर्नो एव स्वयं नास्य प्रजा पुरा कालात्प्रवर्तते॥ ६॥

स होवाच बालाकिर्य एवैष वायौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते जिष्णुर्हि वाऽपराजिष्णुरन्यतस्त्यजायी भवति॥ ७॥

स होवाच बालाकिर्य एवैषोऽग्नौ पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा विषासहिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विषासहिर्हैवान्येषु भवति॥ ८॥

स होवाच बालाकिर्य एवैषोऽप्सु पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा नाम्नस्यात्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नाम्नस्यात्मा भवतीत्यधिदैवतमथाध्यात्मं॥ ९॥

स होवाच बालाकिर्य एवैष आदर्शे पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रति-

रूपो हैवास्य प्रजायां पुत्र आजायते नाप्रतिरूपः ॥ १० ॥

स होवाच बालाकिर्य एवैष प्रतिश्रुत्कायां पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते विन्दते द्वितीयान् द्वितीयवान् भवति ॥ ११ ॥

स होवाच बालाकिर्य एवैष शब्दः पुरुषमन्वेति तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा असुरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात् सम्मोहमेति ॥ १२ ॥

स होवाच बालाकिर्य एवैष छायापुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा मृत्युरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते नो एव स्वयं नास्य प्रजा पुरा कालात्प्रमीयते ॥ १३ ॥

स होवाच बालाकिर्य एवैष शारीरः पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः प्रजापतिरिति वा अहमेतमुपास इति स यो हैतमेवमुपास्ते प्रजायते प्रजया पशुभिः ॥ १४ ॥

स होवाच बालाकिर्य एवैष प्राज्ञ आत्मा येनैतत्सुप्तं* स्वप्नया चरति तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा यमो राजेति वा अहमेतमुपास

---

* सुप्तमिति G. पुस्तके पतितं। एतत्सुप्त इति टी०।

इति स यो हैतमेवमुपास्ते सर्वं हैवास्मा इदं श्रैष्ठ्याय यम्यते ॥ १५ ॥

स होवाच बालाकिर्य एवैष दक्षिणेऽक्षन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठा नाम्न आत्मा अग्नेरात्मा ज्योतिष आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषां सर्वेषामात्मा भवति ॥ ॥ १६ ॥

स होवाच बालाकिर्य एवैष सव्येऽक्षन् पुरुषस्तमेवाहमुपास इति। तं होवाचाजातशत्रुर्मा मैतस्मिन् समवादयिष्ठाः सत्यस्यात्मा विद्युत आत्मा तेजस आत्मेति वा अहमेतमुपास इति स यो हैतमेवमुपास्त एतेषामात्मा भवति ॥ १७ ॥

आदित्ये बृहन् *पाण्डरवासाश्चन्द्रमसि सोमो राजा विद्युति तेजसो स्तनयित्नौ शब्दस्याकाशे पूर्णं वायाविन्द्रोऽग्नौ विषासहिरप्सु नाम्नस्यादर्शे प्रतिरूपः प्रतिश्रुत्कायां द्वितीयः शब्दोऽसुश्छायायां मृत्युः शारीरः प्रजापतिः प्राज्ञो यमो राजा दक्षिणेऽक्षन्नाम्नः सव्येऽक्षन् सत्यस्य। तत उ ह बालाकिस्तूष्णीमास तं होवाचाजातशत्रुरेतावन्नु बालाकाइ इत्येतावद्धीति होवाच बालाकिस्तं होवाचाजातशत्रुर्मृषा वै किल मा समवादयिष्ठा ब्रह्म ते ब्रवाणीति स होवाच यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म

* पाण्डरवास इति F.

स वै वेदितव्य इति तत उ ह बालाकिः समित्पाणिः प्रतिचक्रम उपायानीति तं होवाचाजातशत्रुः प्रतिलोमरूपमेव स्यात् यत् क्षत्रियो ब्राह्मणमुपनयेदेहि व्येव त्वा ज्ञपयिष्यामीति तं ह पाणावभिपद्य प्रवव्राज तौ ह सुप्तं पुरुषं कश्चिदीयतुस्तं हाजातशत्रुरामन्त्रयाञ्चक्रे बृहन् पाण्डरवासः सोम राजन्निति स उ ह तुष्णीमेव शिश्ये तत उ हैनं यष्ट्या विचिक्षेप स तत एव समुत्तस्थौ तं होवाचाजातशत्रुः क्वैष एतद्बालाके पुरुषोऽशयिष्ट क्वैतदभूत्कुत एतदागादिति तदु ह बालाकिर्न विजज्ञौ ॥ १८ ॥

तं होवाचाजातशत्रुर्यत्रैष एतद्बालाके पुरुषोऽशयिष्ट यत्रैतदभूद्यत एतदागाद्धिता नाम हृदयस्य नाड्यो हृदयात्पुरीततमभिप्रतन्वन्ति यथा सहस्रधा केशो विपाटितस्तावदण्व्यः पिङ्गलस्याणिम्ना तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्येति तासु तदा भवति यदा सुप्तः स्वप्नं न कञ्चन पश्यति। अथास्मिन्प्राण एवैकधा भवति तदेनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैः रूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहाप्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रतिबुध्यते यथाग्नेर्विस्फुलिङ्गा विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोकास्तद्यथा क्षुरः क्षुरधानेऽवहितः स्याद्विश्वम्भरो वा विश्वम्भरकुलाय एवमेवैष प्राज्ञ आत्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तमेतमात्मानमेत आत्मानोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वास्तद्यथा

श्रेष्ठी स्वैर्भुङ्क्ते यथा वा श्रेष्ठिनं स्वा भुञ्जत एवमेवैष प्राज्ञ आत्मैतैरात्मभिर्भुङ्क्ते यथा श्रेष्ठी स्वैरेवं वै तमात्मानमेत आत्मानोऽन्ववस्यन्ति यथा श्रेष्ठिनं स्वाः स यावद्ध वा इन्द्र एतमात्मानं न *विजज्ञौ तावदेनमसुरा अभिबभूवुः स यदा विजज्ञावथ हत्वासुरान्विजित्य सर्वेषां देवानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं परीयाय तथो एवैवं †विद्वान्त्सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति य एवं वेद य एवं वेद ॥ १९ ॥

‡इति कौषीतक्यारण्यके षष्ठोऽध्यायः ॥ ॥

* विजिज्ञाविति तु पुस्तकयोः पाठः।

† विद्वान् सर्वान् पाप्मनोऽपहत्य सर्वेषाञ्च भूतानामिति G.

‡ इति कौषिकी (कौषीतकी?) ब्राह्मणोपनिषत् समाप्ता। इति G.

शुद्धिपत्रम्।

पृ०	प०	अशुद्धं।	शुद्धं।
१९	२१	धनुवाते	धुनुवाते
२१	१	द्वारगोपा	द्वारगोपौ
२७	१, ४	पौंस्तानि	पौंस्नानि
३१	४	उपासकस्य	विनेयस्य
४४	१	अभ्यर्चन्त	अभ्यर्चन्ते
६१	११	दक्षिणावृत्।	दक्षिणावृत्
७२	२	तथवैनं	तथैवैनं
७५	२१	सालावृकेभ्यः	सालावृकेयेभ्यः
८७	१८	वाक	वाक्
८७	२१	हरिता	रहिता
८८	५	आस्मिन्	अस्मिन्
९६	१३	त्वं	तं
१०३	१७	काशी०	काश्मि०
१४०		१३०	१४०

TRANSLATION.

THE

KAUSHI'TAKI-BRA'HMAṆA-UPANISHAD.

S'ANKARA'NANDA'S INTRODUCTION.

‡ Scil. each performs its proper function after an interval, however imperceptible; by "speaking, hearing, &c. after it" is meant that the proper function of each is subordinated to the leading one in each case.

§ This is intended to answer the objection that if each organ has its temporary superiority over the rest, why do we give such a superiority to práṇa? The práṇas here mentioned are the five functions of práṇa.

|| The so-called power of action is also the so-called power of knowledge.

¶ An etymological play on words. *Uktha* quasi *uttha*.

* Knowledge (*prajná*) here means the Supreme Soul; this and the individual *práṇa* (*panchavṛittiḥ práṇaḥ*) are identical.

† The power of knowledge is hidden and the man only exists in the vital air, as the power of action.

‡ The organs are absorbed with their objects in the soul.

sounds, the mind enters into it with all thoughts. When the man awakes, as from blazing fire sparks go forth in all directions, so from this soul* all the práṇas go forth to their several stations; from the práṇas go forth the devas,† from the devas the worlds. This Práṇa is alone identical with knowledge, having assumed this body it raises it up, therefore let him worship this as the true Uktha. Thus do we find all in Práṇa. What Práṇa is, that is knowledge, (Prajná) what knowledge is, that is Práṇa. This‡ is the final proof thereof, this its true understanding. When yonder man, sick, about to die and very feeble, falls into fainting, his friends (standing around) say, 'His mind has departed, he hears not, he sees not, he speaks not with his speech, he thinks not;' then he becomes absorbed in this práṇa; then the speech enters it with all names, the eye enters it with all forms, the hearing enters it with all sounds, the mind enters it with all thoughts. When he departs from this body, he departs with all these.§ (3.)

"All names,|| which are verily speech, are left in him, by speech he obtains all names; all odours, which are verily práṇa, are left in him, by práṇa he obtains all odours; all forms, which are verily the eye, are left in him, by the eye he obtains all forms; all sounds, which are verily the ear, are left in him, by the ear he obtains all sounds; all thoughts, which are verily the mind, are left in him, by the mind he obtains all thoughts. Together they two ¶ dwell in this body, together they two

* Scil. the universal soul, which is itself joy,—concealed under the disguise of práṇa.—The práṇas are speech, &c.

† Agni, &c. presiding over speech, &c.—The worlds are here names, &c.

‡ Having shown that the living man is really práṇa, he proceeds to shew that in death too the dying man is to be called práṇa.

§ Scil. to another body.

|| The other recension reads this differently, 'verily speech dismisses all names from him, by speech he obtains all names;' and so on in the other clauses. The Comm. explains it, "not only is speech absorbed in práṇa but práṇa with speech obtains all names—speech is not absorbed without its object."

¶ Práṇa and prajná—the general soul as conditioned by the powers of action and knowledge.

depart from it. Now will we explain how in this same knowledge (Prajná) all beings are also absorbed. (4.)

"Speech verily milked* one portion thereof; its object, the name, was placed outside as a rudimentary element; the vital air verily milked a portion thereof; its object, the smell, was placed outside as a rudimentary element; the eye verily milked a portion thereof; its object, the form, was placed outside as a rudimentary element; the ear verily milked a portion thereof; its object, the sound, was placed outside as a rudimentary element; the tongue verily milked a portion thereof; its object, the taste of food, was placed outside as a rudimentary element; the two hands verily milked a portion thereof; their object, action, was placed outside as a rudimentary element; the body verily milked a portion thereof; its objects, pleasure and pain, were placed outside as a rudimentary element; the organ of generation verily milked a portion thereof; its objects, enjoyment, dalliance and offspring were placed outside as a rudimentary element; the feet verily milked a portion thereof; their objects, walkings, were placed outside as a rudimentary element; the mind verily milked a portion thereof; its objects, thought and desires, were placed outside as a rudim• ntary element. (5.)

"Having mounted† by Prajná on speech‡, he finds by speech all names; having mounted by Prajná on the vital air,§ he finds by the vital air all odours; having mounted by Prajná

* I have followed the Comm. in taking अदूढं as = अदूदुहत्, but I prefer the reading of the other recension उदूळ्हं, the past participle of वह or ऊह,—"speech, &c. were portions, severally lifted up from prajná."

† "The organ of sense cannot exist without prajná, nor the objects of sense be obtained without the organ, therefore,—on the principle, when one thing cannot exist without another that thing is said to be identical with the other,—just as the cloth being never perceived without the threads, is identical with them, or the (false perception of) silver being never found without the mother of pearl is identical with it, so the objects of sense being never found without the organs are identical with them, and the organs being never found without prajná are identical with prajná." 'S.

‡ The Comm. renders it here and in the other clauses "by Prajná mounted on speech, (Prajná) by speech finds all names." I prefer making "the man" the subject of *ápnoti.*

§ Prána is here used, as it often is elsewhere, for the organ of smell.

on the eye, he finds by the eye all forms; having mounted by Prajná on the ear, he finds by the ear all sounds; having mounted by Prajná on the tongue, he finds by the tongue all flavours of food; having mounted by Prajná on the hands, he finds by the hands all actions; having mounted by Prajná on the body, he finds by the body pleasure and pain; having mounted by Prajná on the organ of generation, he finds by the organ of generation enjoyment, dalliance and offspring; having mounted by Prajná on the feet, he finds by the feet all walkings; having mounted by Prajná on the mind, he finds by the mind all thoughts. (6.)

"Verily, bereft of prajná, the speech can make known no name soever,—'My mind,' it says,* 'was elsewhere, I perceived not that name.' Verily, bereft of prajná, the vital air can make known no odour soever,—'My mind,' it says, 'was elsewhere, I perceived not that odour.' Verily, bereft of prajná, the eye can make known no form soever,—'My mind,' it says, 'was elsewhere, I perceived not that form.' Verily, bereft of prajná, the ear can make known no sound soever,—'My mind,' it says, 'was elsewhere, I perceived not that sound.' Verily, bereft of prajná, the tongue can make known no flavour of food soever,—'My mind,' it says, 'was elsewhere, I perceived not that flavour.' Verily, bereft of prajná, the hands can make known no action soever,—'Our mind,' they say, 'was elsewhere, we perceived not that action.' Verily, bereft of prajná, the body† can make known no pleasure, no pain soever,—'My mind,' it says, 'was elsewhere, I perceived not that pleasure nor that pain.' Verily, bereft of prajná, the organ of generation can make known no enjoyment nor dalliance nor offspring soever,—'My mind,' it says, 'was elsewhere, I perceived not that enjoyment nor dalliance nor offspring." Verily, bereft of prajná, the feet can make known no walking soever,—'Our mind,' they say, 'was elsewhere, we perceived not that walking.' Verily, bereft of

* The other recension makes the man, not the organs, say this. Hence in the case of the hands, &c, it reads "*My* mind was elsewhere," &c.

† The body is here inserted among the organs, since it in a manner does receive external impressions; or more probably it here implies the skin, the organ of touch. 'S.

prajná, no thought can be completed, nor any thing known which should be known. (7.)

"Let not* a man wish to know† the speech, let him know the speaker;‡ let not a man wish to know the smell, let him know the smeller; let not a man wish to know the form, let him know the seer; let not a man wish to know the sound, let him know the hearer; let not a man wish to know the flavour of food, let him know the knower; let not a man wish to know the action, let him know the agent; let not a man wish to know the pleasure and pain, let him know the knower of the pleasure and pain; let not a man wish to know enjoyment, dalliance nor offspring, let him know the knower of the enjoyment, dalliance and offspring; let not a man wish to know the walking, let him know the walker; let not a man wish to know the mind, let him know the thinker. Verily these§ ten rudimentary|| elements depend on prajná; and the ten¶ rudiments of prajná depend on the elements. Were there no rudimentary elements, there would be no rudiments of prajná; were there no rudiments of prajná, there would be no rudimentary elements; from either alone no form would be accomplished. There is no division of this union; just as the circumference of a wheel is placed upon the spokes and the spokes upon the nave, so the rudimentary elements are placed upon the rudiments of prajná, and the rudiments of prajná are placed upon

* If Prajná and the organs are identical, then since there is a previous command 'Worship me as life, immortal, &c.' (see above Sect. 2,) does this intimate that speech only is to be worshipped and known? This doubt is now answered. 'S.

† The *jijnásá* is the keyword of Hindu philosophy,—the wish to know in order to obtain emancipation,—knowledge in this sense being indeed 'power.'

‡ The speaker, sc. the soul, the witness of the activity of all the organs, itself identical with joy. 'S.—The Comm. adds that speech and mind here stand for all the organs; while the eight intermediate clauses represent all the objects, including those of speech and mind.

§ The different sets in §§ 5, 6, 7 represent the ten organs (indriyáni) and mind, and their several objects, as the body stands for the skin, and pleasure and pain for touch; as only ten are mentioned here, mind is now omitted, but it is understood as included in the organs, and its object may be similarly understood as included in their objects.

|| The various objects, as the thing spoken, &c.

¶ Speech, &c.

práṇa.* This Práṇa† is verily prajná, it is joy, it is eternally young, and immortal; it is not increased by good deeds, it is not decreased by bad deeds. Verily him it causes to do good deeds,‡ whom it desires to uplift from these worlds; while him it causes to do bad deeds whom it desires to sink down. This is the guardian of the world, this the king of the world, this the lord of the world, this is my soul. Thus let a man know, thus let a man know." (8.)

FOURTH CHAPTER.§

Now|| Gárgya, the son of Baláka, was renowned as a reader of the Veda. He wandered about and sojourned¶ among the Us'ínaras, the Matsyas, the Kurus, the Panchálas, the Kás'is and the Videhas. He came to Ajátásatru, the king of the Kás'is, and said, "Let me tell thee Brahma." Ajátas'atru said to him, "I give thee one thousand cows for these words of thine. Many are the persons who run hither (foolishly) crying,* 'Janaka, Janaka.'" (1.)†

* The vital air, proceeding through the nose and mouth.

† The true Práṇa, which developes itself in the thought that is identical with prajná,—endowed with eternal self-manifesting prajná,—the soul, which is alone worthy of the name of "ego." 'S.

‡ Even if the man himself be not willing,—just as a demon, possessing a person's body, itself remaining without action makes the owner perform various actions. 'S.

§ This chapter is also found with some variations in the second Book of the Bṛihad Áraṇyaka.

|| A doubt may arise in the hearer's mind,—"Práṇa alone is the soul distinguished by consciousness and possessing the qualities of joy, &c." To remove this error, the Sruti proceeds to describe another conscious Being, identical with joy, beyond Práṇa, which loses its consciousness in deep sleep. At the same time a legend is told to show how hard it is for the self-conceited to attain the knowledge of Brahma. 'S.

¶ The curious form सवसन् may be irregular for संवसन् (cf. वेति for व्येति, iii. 1); the construction can hardly admit of स वसन्. The MSS. of the Comm. vary very much in writing it, though the texts in both recensions agree.

* They cry, 'Our father Janaka is a giver and speaker of the knowledge of Brahma with the means thereto,' and they run to me, knowing not whether I am really such or no. 'S.

† I omit the second Sect. (cf. § 18 of the other recension) as it is merely a recapitulation and only intelligible in the original.

The son of Baláka said, "I adore him who [illegible] spirit in the sun." Ajátas'atru said, "Speak not pro[illegible], speak not proudly of this; I adore him as the vast one, clothed in white raiment,* all-excelling, the head of all beings; whoso thus adores him, excels all and becomes the head of all beings."† (2.)

The son of Baláka said, "I adore him who is the spirit in the moon." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul [illegible]od; whoso thus adores him, becomes the soul of food." (3.)

The son of Baláka said, "I adore him who is t[illegible] pirit in the lightning." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul of truth;‡ whoso thus adores him, becomes the soul of truth." (4.)

The son of Baláka said, "I adore him who is the spirit in the thundercloud." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul of sound; vhoso thus adores him, becomes the soul of sound." (5.)

The son of Baláka said, "I adore him who is the spirit in the wind."§ Ajáta's'atru said, "Speak not proudly, speak not proudly of this; I adore him as Indra, whom none can stay, whose hosts are unconquerable; whoso thus adores hi[illegible], be comes a conqueror, unconquerable by others, and him[illegible] conquering others." (6.)

The son of Baláka said, "I adore him who is the spirit in the ether." Ajátas'atru said, "Speak not proud[illegible], speak not proudly of this; I adore him as the full and actionless Brahma; whoso thus adores him, is filled with progeny, cattle, fame, holiness, and swarga, and accomplishes his full life in this world."‖ (7.)

* The Comm. refers to the Brihad A. as giving these qualities to the Purusha in the moon; as the moon is the Sushumná ray of the sun, there is no inconsistency in their being also qualities of the sun.

† Under whatever qualities he adores Brahma, he himself becomes possessed of those qualities. 'S.

‡ The other recension has "the soul of splendour."

§ The two recensions often differ in the order of the dialogue as well as in other points; thus the second recension transposes § 7 and § 6, and reads §§ 10—15 in the order 10, 12, 13, 11, 15, 14.

‖ One hundred years. 'S.

The son of Baláka said, "I adore him who is the spirit in the fire." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the irresistible; whoso thus adores him, becomes irresistible among others."* (8.)

The son of Baláka said, "I adore him who is the spirit in the waters." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul of light;† whoso thus adores him, becomes the soul of light." Thus far the adoration depending on the deities,—now that which depends on the soul. (9.)

The son of Baláka said "I adore him who is the spirit in the mirror." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the reflection; whoso thus adores him, is born truly reflected in his children, not falsely reflected." (10.)

The son of Baláka said, "I adore him who is the spirit in the shadow." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the double and inseparable; whoso thus adores him, obtains (offspring) from the double,‡ and himself becomes doubled.§ (11).

The son of Baláka said, "I adore him who is the spirit in the echo." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the life; whoso thus adores him, faints not before his time." (12.)

The son of Baláka said, "I adore him who is the spirit in sound."‖ Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as death; whoso thus adores him, dies not before his time." (13.)

* The other recension reads *anv-esha* for *anyeshu*, "he follows the adoration."

† The other recension has "the soul of the name." The Schol. notices the reading of another S'ákhá (i. e. Brihad Árany.) *pratirúpa.*

‡ i. e. the wife.

§ In his children, grand-children, &c.—The other recension puts this close in § 12, and here has "I adore him as death; whoso thus adores him, his children die not before their time."

‖ In the other recension, "I adore him who as sound follows the spirit. Ajátas'atru said, Speak not proudly, speak not proudly of this; I adore him as life; whoso thus adores him, neither himself nor his children faint before their time."

The son of Baláka said, "I adore him who as that sleeping spirit, goes forth by sleep."* Ajátas'atru said "Speak not proudly, speak not proudly of this; I adore him as king Yama; whoso thus adores him, to him all this (world) is subdued for his weal." (14.)

The son of Baláka said "I adore him who is the spirit in the body." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as Prajápati; whoso thus adores him, is multiplied in children, cattle, glory, holiness, heaven; and accomplishes his full life." (15.)

The son of Baláka said, "I adore him who is the spirit in the right eye." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul of speech, the soul of fire, the soul of splendour; whoso thus adores him, becomes the soul of all these." (16.)

The son of Baláka said, "I adore him who is the spirit in the left eye." Ajátas'atru said, "Speak not proudly, speak not proudly of this; I adore him as the soul of truth, the soul of the lightning, the soul of light; whoso thus adores him, becomes the soul of all these." (17.)

Then verily the son of Baláka became silent. Ajátas'atru said to him, "Thus far only (reaches thy knowledge), O son of Baláka?" "Thus far only," he replied. Ajátas'atru said, "Speak not proudly without cause, (saying) 'Let me tell thee Brahma.' O son of Baláka, He who is the maker of these spirits, whose work is all this, *He* verily is the Being to be known." Then truly the son of Baláka came up to him with fuel in his hand, saying, "Let me attend thee (as my guru)." Ajátas'atru said to him, "This I consider contrary to nature that a Kshatriya should instruct a Bráhman.† Come, I will tell thee all I know." Then having taken him by the

* The Comm. interprets this as *swapnayá (swapnena) charati;* otherwise it would have seemed more natural to take it as *swapnay* (*swapne*) *ácharati.* The other recension has, "I adore that wise soul, by whom this sleeping man goes forth by sleep."

† This is contrary to the remarkable passage in the Chhándogya Upanishad, v. 3. 7.

hand, he set forth. They came to a man* asleep. Ajátas'atru called him, (saying) "Oh thou vast one, clothed in white raiment, king Soma."† The man still lay asleep. Then he pushed him with his staff, and he at once rose up. Ajátas'atru said to the son of Baláka, "Where, O son of Baláka, lay this spirit asleep, where was all this done, whence came he thus back?" Then the son of Baláka knew not what to reply. Ajátas'atru said to him, "This is where, O son of Baláka, this spirit lay asleep, where all this was done and whence he thus came back. The vessels of the heart named *Hitá*,‡ proceeding from the heart, surround the great membrane (round the heart); thin as a hair divided into a thousand parts; and filled with the minute essence of various colours, of white, of black, of yellow, and of red. When the sleeping man sees no dreams soever, he abides in these.§ (18.)

"Then is he absorbed in that Práṇa. Then the speech enters into it with all names, the sight enters with all forms, the hearing enters with all sounds, the mind enters with all thoughts. When he awakes, as from blazing fire sparks go forth in all directions, so from this Soul all the práṇas go forth to their several stations, from the práṇas go forth the devas, from the devas the worlds. This is the true Práṇa, identical with Prajná; entering this body and soul, it penetrates to the nails and hairs of the skin. Just as a razor placed in a razor case, or fire in the home of fire,|| thus this Soul,¶ itself Prajná, enters this body and soul* to the hairs and nails. The inferior souls follow this Soul as the household the householder. As the householder feeds with his household, and as the household feed on the householder, so

* Purusha has here an undermeaning as the soul or spirit as distinguished from práṇa.

† These are all epithets of Práṇa.

‡ *Hitá* as doing good (*hita*) to living creatures. Cf. Bṛihad Ár. iv. 3. 20.

§ The other recension has no division of sections here. The Comm. reads it, "Then the sleeping man abides in these vessels. But when he sees no dreams soever, then he is absorbed in that Práṇa."

|| i. e. As fire in a forest. Cf. Bṛihad Ár. i. 4.

¶ The eternal self-manifesting knowledge-endued Soul, alone worthy of the appellation of 'ego.' S.

* Sc. the body and the organs. S.

this Soul, itself Prajná, feeds with those souls* and thus those souls feed on this Soul. As long as Indra† knew not this Soul, so long the Asuras overcame him. When he knew it, then having conquered and slain the Asuras, he attained the pre-eminence of all gods and all beings, he attained sovereignty and empire. Thus too is it with him who hath this knowledge, having destroyed all sins,—and he attaineth the pre-eminence of all beings and sovereignty and empire, who knoweth thus, who knoweth thus." (19.)

* The Soul, conditioned as the power of action and knowledge, enjoys together with these inferior souls (speech, &c.) which pretend to the appellation of 'ego.' Or it may mean, it enjoys by their means. 'S.

† See this legend at full length in the concluding chapters of the Chhándogya Upanishad.

APPENDIX.

I have added, as an Appendix, Vidyáranya's Analysis of the third and fourth chapters of the Kaushítaki Bráhmana Upanishad, (from the Sarvopanishadarthánubhútiprakás'a,) as it throws some light on the connection of the different parts. The text is edited from two MSS., one, A, in the Sanskrit College Library, and the other, B., in the Asiatic Society's Library (No. 716).

E. B. C.

LIBRARY OF THE RAJAH OF COOCHBEHAR

सर्वोपनिषदर्थानुभूतिप्रकाशीयाष्टम-नवमाध्यायौ।

ऐतरेये तैत्तिरीये छान्दोग्येऽथर्वणे च यत्।
तत्त्वं चतुर्वेदविद्याप्रकाशे तत्समीरितं ॥ १ ॥
अनुभूतिप्रकाशेऽथ कौषीतक्यादिनामसु।
चतुर्वेदगशाखासु यत्तत्त्वं तदुदीर्यते ॥ २ ॥
ऋग्वेदस्थितशाखा या कौषीतक्यभिधाङ्किता।
तस्यां प्रतर्दनायेन्द्रः प्राहात्मानुभवं स्फुटं ॥ ३ ॥
मनुष्येभ्यो हिततमं वरं वव्रे प्रतर्दनः।
हितं हिततरं चेन्द्रो मेने हिततमं धिया ॥ ४ ॥
हितं स्वर्गसुखं मर्त्यसुखादप्यधिकत्वतः।
तद्वैराग्यं हिततरं यागाद्यायासवर्जनात् ॥ ५ ॥
स्वात्मबोधो हिततमो नित्यानन्दानुभूतितः।
इति मत्वेन्द्र आहेतं शिष्यं जानीहि मामिति ॥ ६ ॥
सहस्राक्षोऽहमित्युक्तेर्मद्देह इति चेरणात्।
अस्मच्छब्दो वपुस्तस्य स्वामिनं वा ब्रवीत्ययं ॥ ७ ॥
सहस्राक्षवपुस्तेन दृष्टं स्वामी तु तद्दृशा।
न द्रष्टुं शक्यते लिङ्गात् पुरैवानुमितः खलु ॥ ८ ॥
सहस्राक्षवपुः स्वामियुक्तं स्याद्गवदर्द्दतः।
मच्छरीरवदित्येवं बालेनाप्यवबुध्यते ॥ ९ ॥

अतो बुद्धिमता बोद्धुं योग्योऽस्मच्छब्दलक्षितः ।
विवक्षितः कश्चिदर्थ इति शिष्येण निश्चितं ॥ १० ॥
अलौकिकात्मा ज्ञेयोऽस्तु तद्विज्ञानेन किं फलं ।
इति चेद्दुःखसम्बन्धराहित्यं तत्त्वधीफलं ॥ ११ ॥
तस्माद्धिततमं ज्ञानं दुःखाभावोऽत्र वर्ण्यते ।
सहस्राक्षे स्थूलदेहे दुःखं रोगादिजं भवेत् ॥ १२ ॥
स्वामिन्यस्मिन् सूक्ष्मदेहे पुण्यपापकृतं भयं ।
त्वाष्ट्रादीनां वधेऽप्यासीद्भयं नैव चिदात्मनः ॥ १३ ॥
त्वष्टुः पुत्रो विश्वरूप आसीद्देवपुरोहितः ।
स्वामिद्रोहं चकारासौ तं त्वाष्ट्रं हतवानहं ॥ १४ ॥
कर्तर्यभूद्ब्रह्महत्या न त्वसङ्गे चिदात्मनि ।
वेदान्तज्ञानहीनानां यतीनां हनने तथा ॥ १५ ॥
लोकत्रये बहुविधानसुरान् हतवानहं ।
चिदात्मनोऽस्य मे तत्र नैव लोमापि हिंस्यते ॥ १६ ॥
माहात्म्यं मम नैतत् स्यात् किन्तु ज्ञानस्य तद्भवेत् ।
अन्योऽपि मां चिदात्मानं वेत्ति चेत् तत्फलं लभेत् ॥ १७ ॥
वाचा वा मनसा मातृवधादीन् कुरुते यदि ।
तथापि ज्ञानिनो मोक्षो न क्षतैर्विनिवार्यते ॥ १८ ॥
पापं कृतवतोऽप्यस्य मुखे हर्षक्षयो न हि ।
न मुक्तिर्नश्यतीत्येवं शास्त्रैरस्य विनिश्चयः ॥ १९ ॥
ननु मूढस्यापि नास्ति चिन्मात्रे पापलेपनं ।
ततः कोऽतिशयस्तत्त्वविदः स्यादिति चेच्छृणु ॥ २० ॥

अहङ्कर्तृगतं पापमज्ञात्वाऽऽरोप्यते चिति।
तेन ग्लानिर्मुखे भाति जन्मापि नरके भवेत्॥ २१॥
ज्ञानेन कर्म्मणस्तस्य बीजभावो विनश्यति।
जन्मप्ररोहो नैवास्तीत्येवं निश्चित्य हृष्यति॥ २२॥
दग्धबीजं यथा लोके न प्ररोहक्षमं तथा।
ज्ञानाग्निदग्धं यत्कर्म न तज्जन्मप्रदं भवेत्॥ २३॥
तर्हि तत्त्वविदः श्रेष्ठा मूढवन्नियमेन तत्।
कुतः पापं त्यजन्तीति चेद्रहस्यमिदं शृणु॥ २४॥
यद्यप्यामुष्मिकी हानिर्नास्त्यथाप्यैहिकी तु सा।
महती विद्यते तेन पापं यत्नेन वर्जयेत्॥ २५॥
शिष्टास्त्यजन्ति पापिष्ठं प्रत्यक्षो नरकः स हि।
तन्निन्दकस्तस्य पापं गृहीत्वा नरकं व्रजेत्॥ २६॥
श्रोता कर्मी तु संसर्गात् स्वयमप्याचरेत्तथा।
इत्थं दोषत्रयं दृष्ट्वा शिष्टाः पापं त्यजन्ति हि॥ २७॥
किञ्च पुण्यरतः पूर्वं ज्ञानमाप्नोति नान्यथा।
पश्चाच्च तद्वासनया पुण्यमेव करोत्यसौ॥ २८॥
किं बहूक्त्या तत्त्वविदो न भयं पारलौकिकं।
उपदेशसहस्र्यां च तथाचार्यैरुदीरितं॥ २९॥
परलोकभयं यस्य नास्ति मृत्युभयं तथा।
तस्यात्मज्ञस्य शोच्याः स्युः सब्रह्मेन्द्रा अपीश्वराः॥ ३०॥
मां जानीहीत्येवमिन्द्रः स्वात्मज्ञाने प्रवर्त्य तं।
प्राणोऽस्मीत्यादिवाक्येन तस्मै तत्त्वमवोचत॥ ३१॥

प्राणप्रज्ञे क्रियाज्ञानशक्ती द्वे लिङ्गदेहगे ।
तदधिष्ठानरूपत्वात्ताभ्यामात्मोपलक्षितः ॥ ३२ ॥
प्रज्ञात्मा प्राणरूपोऽस्मीत्येवं तस्मादवोचत ।
आनन्दोऽजर इत्यादिनिर्णयस्तस्य वक्ष्यते ॥ ३३ ॥
अत्रोपायो नास्ति कश्चिदुपाधिमुपलक्षकं ।
विनात्मवाचकः शब्दो यस्मान्न क्वापि वीक्ष्यते ॥ ३४ ॥
लोके गुणक्रियाजातिरूढयः शब्दहेतवः ।
नात्मन्यन्यतमोऽमीषां तेनात्मा नाभिधीयते ॥ ३५ ॥
उपाधिष्वपि सर्वेषु सामीप्यात्प्रत्यगात्मनः ।
प्राणप्रज्ञाद्वयं योग्यमत्यन्तं तेन लक्ष्यते ॥ ३६ ॥
प्राणशब्दोऽभिधावृत्त्या वायुं चेष्टकमाह हि ।
प्रज्ञाशब्दो ज्ञानहेतुं बुद्धिं वक्ति स्वशक्तितः ॥ ३७ ॥
तद्वृत्त्यधिष्ठानतया तद्धेतुत्वोपचारतः ।
ताभ्यामात्मा लक्ष्यमाणो ज्ञेयः शाखाग्रचन्द्रवत् ॥ ३८ ॥
देहेन्द्रियादयो भावा ज्ञानादिव्यापृतिक्षमाः ।
यस्य सन्निधिमात्रेण सोऽहमित्यवधारय ॥ ३९ ॥
अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि ।
देहेन्द्रियमनःप्राणाः सोऽहमित्यवधारय ॥ ४० ॥
उपाधिलक्षितं तत्त्वं यदि बोद्धुं न शक्नुयाः ।
तर्ह्युपाधिद्वयोपेतमुपास्स्व गुणसंयुतं ॥ ४१ ॥
आयुष्ट्वममृतत्वञ्च गुणौ प्राणस्य सम्मतौ ।
इहायुः प्राणतः स्वर्गे चामृतत्वमिति स्फुटं ॥ ४२ ॥

सत्यसङ्कल्पता प्रज्ञागुणो ध्यानानुसारतः ।
फलमाप्नोति कामी चेन्निष्कामस्तत्त्वमीक्षते ॥ ४३ ॥
उपास्यैकाग्र्यमासाद्य तत्त्वं वीक्षितुमादितः ।
प्रज्ञाप्राणावुपाधी तौ विविच्येतां यथातथं ॥ ४४ ॥
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणो धीन्द्रियपञ्चकं ।
वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियपञ्चकं ॥ ४५ ॥
इन्द्रियाणां प्रवृत्तिः स्यात्प्रज्ञालोचनपूर्विका ।
प्राणवायुप्रेरिता चेत्येवं लोके व्यवस्थितिः ॥ ४६ ॥
तत्र मूढाः केचिदाहुर्युगपच्चक्षुरादयः ।
सर्वेऽपि स्वस्वविषये प्रवर्तन्त इतीदृशं ॥ ४७ ॥
तदसन्निपुणोऽप्यत्र न शक्तः सूक्ष्ममीक्षितुं ।
कालाल्पत्वेन सञ्छाद्य क्रमं धूर्तो विडम्बयेत् ॥ ४८ ॥
प्रज्ञाप्राणसहायेन विना नैवेन्द्रियं क्वचित् ।
प्रवर्तते सहायस्तु क्रमभावीति निश्चितः ॥ ४९ ॥
अन्यथा निखिलं वेदं धूर्तो ह्येकक्षणे पठेत् ।
या प्रज्ञाप्राणयोर्वृत्तिः सा स्यादावृत्तिवत्क्रमात् ॥ ५० ॥
प्रज्ञाप्राणानुग्रहेण वाग्यदाह तदेतरे ।
चक्षुराद्या ह्युपरतास्तामनुभवते खलु ॥ ५१ ॥
स्वव्यापारे प्रवृत्ताश्चेत्प्रज्ञाप्राणानुकर्षणात् ।
वाचो विघ्नो भवेद्विघ्नवारणं ह्यनुवादिता ॥ ५२ ॥
एवमन्यत्रापि योज्यमतः सर्वेऽपि संहताः ।
एकैकविषयोद्युक्ता व्यवहारः क्रमाद्भवेत् ॥ ५३ ॥

क्रमभावी विचित्रोऽयं व्यवहारश्चिदात्मना ।
येनैकेनोच्यते सोऽयमन्यः सर्वेभ्य इष्यतां ॥ ५४ ॥
प्राणवागादयः सर्वे किं समा उत विद्यते ।
श्रेष्ठस्तेष्विति चेत्प्राणः श्रेष्ठो जीवनहेतुतः ॥ ५५ ॥
तस्मादुपेक्ष्य वागादीन् प्राणोपाधिः समाश्रितः ।
आत्मबोधाय किञ्चायं प्राण उत्थापयेद्वपुः ॥ ५६ ॥
ननु सुप्तावयं प्राणो देहं नोत्थापयत्यमुं ।
किन्तु जागरणे तस्मात्प्रज्ञैवात्र प्रयोजिका ॥ ५७ ॥
चतुर्भिरुह्यते यस्मात् सर्वशक्त्या शरीरकं ।
तूलायते तदेवाहन्धियाऽऽघ्रातमितीच्यते ॥ ५८ ॥
सत्यमेव ततः प्रज्ञोपाधिं प्राणवदाश्रितः ।
प्रज्ञात्मा प्राण एवैको मिलितोपाधिरिष्यते ॥ ५९ ॥
द्वयोर्मृतौ जीवने च सहभावात् तदेकता ।
उत्थापकत्वादुक्थं तदित्यैकाग्र्याय चिन्तयेत् ॥ ६०
तत्रैकाग्र्ये क्षमा बुद्धिर्बोद्धुं तत्साक्षिणं भवेत् ।
जगद्धेतुतयाप्येष प्राणः स्वात्मोपलक्षकः ॥ ६१ ॥
एकादशेन्द्रियाण्येषां विषयाश्च जगत् खलु ।
सुप्तौ सर्वं जगल्लीनं प्राणोपाधिक आत्मनि ॥ ६२ ॥
इन्द्रियाण्येव लीयन्ते विषया नेति चेन्न तत् ।
प्रातीतिकस्य जगतो भानाभावो लयो मतः ॥ ६३ ॥
प्रातीतिकत्वं वेदान्तसिद्धान्ते जगतः स्फुटं ।
अतः सुप्तौ जगल्लीनं प्रबोधे जायते पुनः ॥ ६४ ॥

प्राणप्रतीतिरप्यस्य सुप्तौ नास्तीति चेत्तदा।
प्राणोक्तिरन्यदृष्ट्यैव प्राणेनात्मोपलक्ष्यते ॥ ६५ ॥
प्रबोधे स्वात्मनोऽक्षाणि जायन्ते विस्फुलिङ्गवत्।
तेभ्योऽभिमानिदेवाः स्युर्देवेभ्यो विषया इमे ॥ ६६ ॥
दृष्टिसृष्टिमिमां ब्रह्मानुभवी बहु मन्यते।
स्वप्रबोधात्स्वसंसारो लीयते स्वप्नवद्यतः ॥ ६७ ॥
न्यायेनानेन मरणे मूर्च्छायां चोह्यतां लयः।
लीनस्य पुनरुत्पत्तौ व्यवहारक्रमं शृणु ॥ ६८ ॥
प्राणोपाधिकजीवात्मा यदा व्यवजिहीर्षति।
तदा वाक् सृजते शब्दं जीवो वाचा ब्रवीति तं ॥ ६९ ॥
एवं सर्वत्र विज्ञेयं प्राणे सर्वाप्तिरीरिता।
प्रज्ञा प्राणादभिन्नाऽतः तस्याः सर्वाप्तिरुच्यते ॥ ७० ॥
वाक् प्रज्ञाया एकमंशमभिमानाख्यमाश्रिता।
प्रज्ञाभिमानवशतः शब्दोच्चारणशक्तियुक् ॥ ७१ ॥
शरीरगा त्वगप्येवं शक्ताऽभूत् स्पर्शजे सुखे।
रतौ प्रजातावानन्दे चोपस्थः शक्तिमानभूत् ॥ ७२ ॥
क्रीडा चोत्थापनं वीर्यमोचश्चोक्तमिदं त्रयं।
ध्येये ज्ञेये च काम्यादौ चित्तं शक्तमभूत् खलु ॥ ७३ ॥
सर्वेन्द्रियेषु प्रज्ञाया अभिमानोऽवधार्यतां।
अन्वयव्यतिरेकाभ्यामुदाहार्योऽखिलेष्वसौ ॥ ७४ ॥
प्रज्ञया वाचमारुह्य जीवो नामानि वक्ति च।
अन्यचित्तोऽभवं तेन नावोचमिति चोच्यते ॥ ७५ ॥

वक्ष्यामीत्यभिमानोऽयं वागारोह इतीर्यते ।
ध्यास्यामीत्यभिमानात्तु चित्तारोहस्तथा भवेत् ॥ ७६ ॥
अभिमानोऽपि धीवृत्तिः सापि पूर्वं भवेदथ ।
धिया ध्यानादिरित्येका धीः क्रमात्कुरुते द्वयं ॥ ७७ ॥
यथा प्राणे समस्तमेवं लयोत्पत्त्योर्व्यवस्थितं ।
प्रज्ञायां च तथा सर्वं स्थितिकाले व्यवस्थितं ॥ ७८ ॥
प्रज्ञाप्राणौ ततो मुख्योपाधी स्वात्मावबोधने ।
तद्द्वारेणावबोद्धव्यो जीवात्माऽऽदौ विवेकिना ॥ ७९ ॥
वाचा नामाभिवदनं यत्तत्स्यात् कर्तृपूर्वकं ।
क्रियात्वात्कृषिवत् कर्ता चाहमित्यभिधीयते ॥ ८० ॥
शब्दादिविषयेऽहन्धीः केनापि नहि शंक्यते ।
देहेन्द्रियेष्वपि तथा मदीयत्वावभासनात् ॥ ८१ ॥
आनखाग्रमहङ्कारो वपुर्व्याप्यावतिष्ठते ।
चिद्बिम्बप्रतिबिम्बाभ्यां व्याप्तोऽसौ कर्तृतां व्रजेत् ॥ ॥
क्रियावांश्चेतनः कर्ताऽहङ्कारस्तादृशस्ततः ।
कर्त्ता भूत्वाऽखिलैरच्चैर्व्यापारान् कुरुतेऽखिलान् ॥ ८३ ॥
जीवात्मानं विविच्येत्थं चेतनं प्राणधारिणं ।
विविच्यात् परमात्मानमानन्दं शुद्धचेतनं ॥ ८४ ॥
प्रतिबिम्बाहङ्कृतिभ्यां बिम्बं निष्कृष्य साक्षिणं ।
ब्रह्मेति विद्यात्सर्वस्य तस्मिन्नारोपितत्वतः ॥ ८५ ॥
चक्रस्यारेष्वाश्रिता स्यान्नेमिर्नाभावरास्तथा ।
अक्षेषु विषयास्तानि चात्मनि प्राणलक्षिते ॥ ८६ ॥

चेष्टाकल्पनहेतुत्वात्प्राणो धीकल्पनस्य च ।
हेतुत्वेन भवेत्प्रज्ञा ततस्त्वानन्द एव हि ॥ ८७ ॥
परप्रेमास्पदतया सर्वेषां यो विभात्यसौ ।
नित्यानन्दः परात्मा स्याज्जरामरणवर्जनात् ॥ ८८ ॥
न पुण्येन भवेद्देवो न पापेन पशुर्भवेत् ।
चिच्छायावानहङ्कार एव स्यात्पुण्यपापभाक् ॥ ८९ ॥
तदीये पुण्यपापे द्वे देहस्थे च जरामृती ।
स्वात्मन्यारोपयेन्मूढस्ततो देवादिजन्मभाक् ॥ ९० ॥
आरोपे बाधिते बोधात्कर्म स्याद्दग्धबीजवत् ।
ततो जन्माङ्कुरो नास्ति निर्लेपे परमात्मनि ॥ ९१ ॥
कार्योपाधेरभावेऽपि कारणोपाधिमत्त्वतः ।
कर्मी स्यादिति चेदीशः कर्माध्यक्षो न कर्मकृत् ॥ ९२ ॥
कारयित्वा पुण्यमेष कर्तारं स्वर्गमापयेत् ।
पापं तु कारयित्वा तं नरकं प्रापयेदसौ ॥ ९३ ॥
पर्जन्यवत् प्रेरकत्वान्नास्य वैषम्यमापतेत् ।
शाल्यादीन् बहुधा वृष्टिर्वापयेद्विषमापि नो ॥ ९४ ॥
उत्तमाधमभावोऽत्र तत्तद्बीजेन कारितः ।
तारतम्यं च जीवेषु स्वस्ववासनया कृतं ॥ ९५ ॥
मातृवत्पालयेल्लोकं शिक्षयेत्पितृवत्प्रभुः ।
स्वामी स्याद्राजवत् सोऽयं ममात्मेत्यवगम्यतां ॥ ९६ ॥
मायोपाधौ स्थिते तस्य मिथ्यात्वं बुध्यते ततः ।
संसारी जीववन्नेशः स्वानन्दैकरसो ह्ययं ॥ ९७ ॥

अखण्डैकरसानन्दो मुक्तोऽयं स्वात्मदृष्टितः ।
संसारदृष्ट्या सर्वेश इति विद्धि प्रतर्दन ॥ ९८ ॥
इन्द्रानुग्रहतः सोऽभूत् कृतकृत्यः प्रतर्दनः ।
एतद्व्याख्यानतस्तुष्याद्विद्यातीर्थमहेश्वरः ॥ ९९ ॥
इति श्रीविद्यारण्यमुनिविरचिते ऽनुभूतिप्रकाशे कौषीतक्युपनिषद्विवरणे प्रतर्दनविद्याख्योऽष्टमोऽध्यायः ॥ ८ ॥

राजा बालाकये प्राह विप्राय ब्रह्मवेदनं ।
कौषीतक्याख्यशाखायामत्र स्पष्टीकरोमि तत् ॥ १ ॥
दृप्तो बालाकिरपरब्रह्मवित् स कदाचन ।
अजातशत्रुं काशीशं बुबोधयिषुरागतः ॥ २ ॥
राजन् बुभुत्सवे तुभ्यं परं ब्रह्म ब्रवाण्यहं ।
इत्युक्त्वादित्यपुरुषं ब्रह्मोपास्स्वेत्यवोचत ॥ ३ ॥
राजा निवार्य तं प्राह फलं ध्येयगुणानपि ।
एवं षोडश ब्रह्माण्यत्रासाववोचत ॥ ४ ॥
चन्द्रे विद्युति मेघे खे वायावग्नौ जलेऽपि च ।
आदर्शे श्रवणे गन्तृशब्दे छायाकृतावपि ॥ ५ ॥
देहे स्वप्ने दक्षिणेऽक्षिण्यपि वामे ऽब्रवीत्क्रमात् ।
सर्वत्र राजा प्रत्युक्तो विप्रस्तूष्णीमवस्थितः ॥ ६ ॥
परं ब्रह्म वदिष्यामीत्युक्तिस्तव मृषाऽभवत् ।
जगतः पुरुषाणाञ्च कर्तृ ब्रह्मेति बुध्यतां ॥ ७ ॥

बालाकिः परविद्यार्थं राजानमुपसन्नवान्।
राजा नाङ्गीचकारैतत् स्वजातेरधमत्वतः॥ ८॥
गुरुत्वं नास्ति मे तुभ्यं ब्रह्म विज्ञापयाम्यहं।
इत्युक्ता पाणिना विप्रमादायान्तःपुरं गतः॥ ९॥
सूत्रात्मैव परं ब्रह्म प्राणो जीव इतीदृशः।
बालाकेर्निश्चयस्तस्य व्यावृत्त्यै सुप्तमागतौ॥ १०॥
सुषुप्ते पुरुषे प्राणो न लीनश्चक्षुरादिवत्।
जीवश्चेत् प्रतिबुध्येत समाहूतः स्वनामभिः॥ ११॥
इति मत्वाह्वयत्प्राणं शास्त्रीयैस्तस्य नामभिः।
नोत्तस्थौ स पुमान् किन्तु शिष्य एवात्र पूर्ववत्॥ १२॥
यष्ट्याऽसौ ताडितः सुप्तः समुत्तस्थौ त्वरान्वितः।
यथा भस्मावृतो वह्निर्वायुना ज्वाल्यते तथा॥ १३॥
प्राणो नात्मा बोधहीनो घटवद्यस्तु बुध्यते।
इन्द्रियैः सहितो भोक्ता जीवोऽसौ चेतनत्वतः॥ १४॥
द्वा सुपर्णेति मन्त्रेण चेतनौ द्वावुदीरितौ।
तयोरन्यतरो भोक्ताऽनश्नन्नन्यः प्रकाशते॥ १५॥
चिच्छायावानहङ्कारो व्याप्तो जागरणे पुमान्।
इन्द्रियैर्विषयान् भुङ्क्ते तं भोक्तारमबुध्यत॥ १६॥
प्राणात्मवाद्यसौ भोक्तृबोधेनैवातिविस्मितः।
बुद्धं ब्रह्मेति सन्तुष्टो नान्यत्प्रष्टुमपेक्षते॥ १७॥
ज्ञपयिष्येऽहमित्येवं राज्ञा तस्मै प्रतिश्रुतं।
शिष्टं बोधयितुं तस्मात्स्वयं प्रश्नं चकार सः॥ १८॥

मन्दधीरपि यः श्रोता श्रद्धालुर्विनयान्वितः ।
अपृष्टेनापि वक्तव्या तस्मै विद्येति शास्त्रधीः ॥ १९ ॥
यो भोक्ताऽयोत्थितः सोऽयं क्वाऽशयिष्ट पुरा क्व वा ।
अभूद्धीरहिता सुप्तिः कुतो वाऽऽगादयं पुनः ॥ २० ॥
बालाकिना न विज्ञातमिदं सर्वमिति स्वयं ।
निश्चित्य त्रितयस्यास्य निर्णयं स्पष्टमब्रवीत् ॥ २१ ॥
हृदयं कमलाकारं देहमध्येऽस्त्यधोमुखं ।
नाड्यस्तस्माद्विनिर्गत्य प्राप्नुवन्त्यखिलं वपुः ॥ २२ ॥
अहङ्कारोपाधिरात्मा जीवो भूत्वा हृदि स्थित
नाडीभिः प्रसृतैः सोऽयैर्जानन् जागरणे स्थितः । २३ ॥
बाह्यभोगप्रदं कर्म यदा क्षीणं तदा पुनः ।
वासनाभोगदे कर्मण्युद्बुद्धे स्वप्नभाग्भवेत् ॥ २४ ॥
स्वप्नं नाडीष्ववेक्ष्याथ कर्मणोऽस्यापि सङ्क्षयात् ।
हृदि सङ्कोचमाप्नोति सा सुषुप्तिरितीर्यते ॥ २५ ॥
नाडीमूलानि हृत्पद्मे पुरीतद्वेष्टिते ऽवसन् ।
यानि तेषु प्रविश्यान्तर्लीयते परमात्मनि ॥ २६ ॥
परमात्मा स्वतः पूर्णः सच्चिदानन्दलक्षणः ।
सोऽहङ्कारपरिच्छिन्नो जीवत्वारोपवान् भवेत् ॥ २७ ॥
अज्ञानकार्योऽहङ्कारोऽवस्थितः फलभुक्तये ।
फलदे कर्मणि क्षीणे लीयतेऽसौ स्वकारणे ॥ २८ ॥
पूर्णैक्यमवाप्नोति परिच्छिन्नो यथा घटे ।
नष्टे तदाकाश ऐक्यं वियता महता व्रजेत् ॥ २९ ॥

यदा न कञ्चन स्वप्नं पश्येत् सुप्तस्तदाखिलं।
विषयेन्द्रियजातं यत्तत् प्राणे प्रविलीयते॥ ३०॥
प्राणशब्दो वायुमाह परमात्मानमप्यसौ।
प्रकृष्टचेष्टाहेतुत्वमुभयत्रापि विद्यते॥ ३१॥
वायौ श्वासक्रिया सर्वसृष्टिस्तु परमात्मनि।
दृष्टिभेदाद्द्वयोस्त्वाचलयो वक्तुं हि शक्यते॥ ३२॥
सुप्तस्याचलयः प्राणवायाविति तटस्थधीः।
अद्वैते द्वैतविलयं मन्यते सुप्त उत्थितः॥ ३३॥
सुप्ताभिप्रायमाश्रित्य परात्मनि जगल्लयः।
अत्योक्तस्तेन पूर्वोक्तप्रश्नयोरुत्तरं भवेत्॥ ३४॥
क्वैषोऽशयिष्ट कुत्रेयं सुप्तिस्तत्रोत्तरं क्रमात्।
परात्मन्यशयिष्टाऽभूदज्ञाने सुप्तिरित्यदः॥ ३५॥
परिच्छिन्नस्य पूर्णात्मतादात्म्यं शयनं भवेत्।
साहङ्कारस्य जगतो विलयः सुप्तिरुच्यते॥ ३६॥
कुत आगादिति प्रश्नस्योत्तरं दृश्यतामिदं।
अज्ञानेनावृतात् पूर्णादागच्छति परात्मनः॥ ३७॥
यदा प्रबुध्यते सुप्तस्तदाऽग्नेर्विस्फुलिङ्गवत्।
प्राणा यथायथं तस्माज्जायन्ते परमात्मनः॥ ३८॥
प्राणाभिमानिदेवानामग्न्यादीनां जनिस्ततः।
लोक्यन्ते विषया अत्रैस्ते देवेभ्यः समुद्गताः॥ ३९॥
सर्वसाधारणः सर्ग एकः प्रातिस्विको ऽपरः।
आकाशादिक्रमादाद्यः प्राणादिक्रमतो ऽपरः॥ ४०॥

सर्वेषां प्राणिनां कर्मचये स्यात् प्रलयो महान्।
पुनः कर्मोद्भवे तेषां स्यात्तदा सृष्टिरीश्वरात्॥ ४१॥
एकस्य कर्मणि क्षीणे लयः स्यात् सुप्तिनामभृत्।
पुनः कर्मोद्भवे तस्य सृष्टिः स्याज्जागराभिधा॥ ४२॥
अद्वैततत्त्वबोधाय सृष्टिः सर्वत्र कथ्यते।
अल्पा सा महती वाऽस्तु सदद्वैतं विबुध्यते॥ ४३॥
प्रौढस्य राजगेहस्य द्वारं स्यात् पुरतो महत्।
पृष्ठतोऽन्तःपुरद्वारं चोरद्वाराख्यमल्पकं॥ ४४॥
महाद्वारेण सहसा दुर्लभं राजदर्शनं।
जनसम्मर्दबाहुल्याद् द्वाराणाञ्च बहुत्वतः॥ ४५॥
अल्पद्वारे स्वामिभक्तो हठाद्राजानमीक्षते।
दृष्टिसृष्ट्याऽनुभूत्यर्थी वेत्त्यात्मानं तथा हठात्॥ ४६॥
महासृष्ट्या तत्पदार्थमादौ ज्ञात्वा तथा पुनः।
त्वंपदार्थं शोधयित्वा वाक्याद्बोधो विलम्बते॥ ४७॥
तस्मादिहाजातशत्रुर्बालाकेरविलम्बतः।
प्रत्यग्ब्रह्मात्मबोधार्थं दृष्टिसृष्टिमवोचत॥ ४८॥
सुप्तावासीद्यदज्ञानमहङ्कारलयोऽत्र हि।
सोऽहङ्कारः कर्मभोगकाले स्यात्पुनरुद्गतः॥ ४९॥
तेनावच्छिन्न आत्मापि कर्ता भोक्तापि पूर्ववत्।
भोक्तुरात्मन उत्पन्नं भोगसाधनमिन्द्रियं॥ ५०॥
इन्द्रियप्रेरको देवानुग्रहः स्वत उद्गतः।
अक्षेभ्योऽनुगृहीतेभ्यो लोका भान्ति समुद्गताः॥ ५१॥

सेयं प्रातीतिकी सृष्टिस्तस्माज्जाता ततः स्वयं ।
जगत्कर्ता परात्मेति क्षणाद्बालोऽपि बुध्यते ॥ ५२ ॥
ईश्वरो महिमोपेतः सोऽप्यन्य इति वासना ।
धीमतां चिरमारूढा वियदादिक्रमस्ततः ॥ ५३ ॥
किं बहूक्त्याऽस्तु या काचित् सृष्टिः सा मायिकी ततः ।
अद्वितीयानन्द आत्मा सुषुप्तावनुभूयते ॥ ५४ ॥
अहङ्कारो मायिको यस्तदवच्छिन्नचेतनः ।
आत्मा जागरणे कृत्स्नं मनसा व्याप्नुयाद्वपुः ॥ ५५ ॥
गूढोऽग्निररणौ व्यापी तथा सुप्तौ चितिर्वपुः ।
व्याप्नोत्यविद्यया गूढा जागरे क्षुरवत् स्थिता ॥ ५६ ॥
नापितस्य क्षुराधाने स्पष्टा भान्ति पृथक् क्षुराः ।
चक्षुरादिषु चिल्लेशाः स्पष्टा भान्ति पृथक्तया ॥ ५७ ॥
सर्वेऽपि करणात्मानः कर्त्रात्मानमिमं सदा ।
अनुसृत्यैव तिष्ठन्ति श्रेष्ठिनं स्वजना इव ॥ ५८ ॥
पुत्रमित्रादिभिः स्वीयैः सार्धं श्रेष्ठी धनी सदा ।
भुङ्क्ते तेऽपि तदिष्टार्थं कुर्वन्तो भोजयन्ति तं ॥ ५९ ॥
एवं जीवः स्वकीयाक्षैः सार्धं शब्दादिकान् सदा ।
भुङ्क्तेऽक्षाणि च शब्दादीन् गृह्णन्ति स्वामितुष्टये ॥ ६० ॥
यत्र तिष्ठति भोक्तासौ सुप्तौ जागरणे पुनः ।
यस्मादुदेति सोऽद्वैतः परमात्मेति बुध्यतां ॥ ६१ ॥
इत्थमद्वैतबोधार्थमहङ्कारे परेश्वरः ।
स्रष्टा स्वप्रतिबिम्बोऽभूदिति श्रुत्यन्तरे श्रुतं ॥ ६२ ॥

यावदद्वैतमात्मानमिन्द्रो नैव विजज्ञिवान् ।
असुरा बहिरन्तःस्थास्तावदभ्यभवन्निमं ॥ ६३ ॥
बहिःष्ठा असुराः स्वर्गे स्थितमेनं बबाधिरे ।
आन्तरा असुराश्चित्ते कामाद्या दुःखदायिनः ॥ ६४ ॥
यदा विजज्ञावात्मानमसुरानखिलांस्तदा ।
हत्वा जयेन देवानां श्रैष्ठ्यं स्वाराज्यमाप्तवान् ॥ ६५ ॥
अजातशत्रुतामेमि जातब्रह्मात्मबोधतः ।
अन्तर्बहिर्वा कः शत्रुर्मम सर्वात्मदर्शिनः ॥ ६६ ॥
ब्रह्माद्याः स्थावरान्ता ये प्राणिनो मम ते वपुः ।
कामक्रोधादयो दोषा जायेरन्मे कुतोऽन्यतः ॥ ६७ ॥
असुराणां स्वात्मताप्तावसुरत्वं हतं भवेत् ।
अयमेव जयस्तस्य देवेषु श्रेष्ठता ततः ॥ ६८ ॥
अद्वैतमपराधीनं स्वराट् स्यात्तेन तत्त्ववित् ।
आत्मानं बोधयित्वैषामधिपोऽधिकपालनात् ॥ ६९ ॥
नैतदिन्द्रस्य माहात्म्यं किन्तु ज्ञानस्य तत्त्वतः ।
अन्योऽप्यद्वैतमात्मानं वेत्ति चेदिन्द्रवद्भवेत् ॥ ७० ॥
अजातशत्रुर्बालाकिं विप्रमित्थमबूबुधत् ।
तथैवोत्तमतागर्वं त्यक्त्वा ऽजानीत बुद्धिमान् ॥ ७१ ॥
विद्वानप्युपसन्नाय दद्याद्विद्यां महादरात् ।
देयात्ताभ्यां स्वभावं तं विद्यातीर्थमहेश्वरः ॥ ७२ ॥

इति श्रीविद्यारण्यमुनिविरचितेऽनुभूतिप्रकाशे कौषीतकिविवरणेऽजातशत्रुविद्याख्यो नवमोऽध्यायः ॥ ९ ॥